वेदांतसंज्ञावली

सटीका

मङ्गेश रामकृष्ण तेलङ्ग इत्यनेन
संशोधिता ।

मूल्यं दशाणकाः

S.V
5

'गुजराती न्युस 'स्थानि क्रय्य-
संस्कृतपुस्तकानि ।

दुर्गासप्तशती देवीसूक्तरहस्यत्रयसहिता		
(पत्राकारा—स्थूलाक्षरा)	...	१—०—०
,, ,, (रेशमी पुट्ठा)	...	१—४—०
,, (मध्यमाक्षर सादा पुट्ठा)	...	०—९—०
,, ,, (रेशमी पुट्ठा)	...	०-१२-०
गणेशसहस्रनामावलिः—	...	०—३—०
विष्णुसहस्रनामावलिः—	...	०—३—०
शिवसहस्रनामावलिः—...	...	०—३—०
देवीसहस्रनामावलिः—...	...	०—३—०
श्रीमद्भागवतं चूर्णिकासहितम्—(स्थूलोत्तमाक्षरं) वेदस्तुतौ श्रीवल्लभाचार्यकृतसुबोधिनीटीकासहितं च सुचिक्कनग्लेजपत्रात्मकं सचित्रं ।	...	१२-०-०
श्रीमद्भागवतं—श्रीधरीटीकासहितं ग्लेज		१०-०-०
सत्यनारायणकथामूलम्—	...	०—३—०
अध्यात्मरामायणं मूलं ...	...	१—८—०
वाल्मीकिरामायणं मूलं ...	...	५—०—०
श्रीमद्वाल्मीकिमुनिप्रणीतं रामायणम्—रामायण-तिलक—रामायणशिरोमणि—रामायणभूषणेति टीकात्रयोपेतम्—		
प्रथमं बालकाण्डम्— ,,	,,	३—०—०
द्वितीयं अयोध्याकाण्डम् ,,	,,	५—०—०
तृतीयं अरण्यकाण्डम् ,,	,,	२-१२-०
चतुर्थं किष्किन्धाकाण्डम् ,,	,,	२-१२-०
पंचमं सुन्दरकाण्डम् ,,	,,	३-८-०
षष्ठं युद्धकाण्डम् ,,	,,	८—०—०
सप्तमं उत्तरकाण्डम् ,,	,,	६—०—०

VEDÁNTA SAMVJNÁVALI

WITH

A COMMENTARY

Gifted by Sri
Sri Swami Dayananada
to
B. Gopal.
12/10/66

EDITED BY

MANGESH RAMAKRISHNA TELANG

PRINTED AND PUBLISHED BY
Manilal Itcharam Desai at
THE NEWS PRINTING PRESS, OF THE GUJARATI
NOS. 20–24, BAKE HOUSE LANE, FORT
BOMBAY.

1926

Price Annas Ten.

वेदान्तसंज्ञावली

सटीका

मङ्गेश रामकृष्ण तेलङ्ग इत्यनेन

संशोधिता ।

सा च

मुम्बय्यां

'मणिलाल इच्छाराम देसाई' इत्यनेन स्वीये

'गुजराती' पत्रस्य न्यूस मुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशिता ।

काळाघोडा बेक-हाउस लेन, फोर्बस स्ट्रीट कोट-मुंबई.

शकाब्दाः १८४८ खिस्ताब्दाः १९२६

मूल्यं दशाणकाः

प्रस्तावना

निखिलशास्त्रेषु अध्यात्मविद्यापरनामकं वेदान्तशास्त्रमेव श्रेष्ठं मुमुक्षूणां परमोपकारकं चेति परिणतमतीनां विदुषामुद्घोषः । अत एव भगवतापि गीतासु "अध्यात्मविद्या विद्यानां" इत्युक्तवता अध्यात्मशास्त्रस्य श्रेष्ठत्वं प्रतिपाद्यते । यद्यपीयमध्यात्मविद्या केवलमुपनिषद्रूपब्रम्हात्मैक्यप्रतिपादकश्रुतिप्रमाणा, तथापि श्रीबादरायणवशिष्ठादिमहर्षिभिः श्रीमद्गौडपादशङ्करप्रभृत्याचार्यैस्तत्परम्पराप्राप्तरहस्यैः श्रीसुरेश्वराचार्य–सर्वज्ञमुन्यादिभिः परमवैदुष्यमण्डितैरन्यैश्च महात्मभिः संसृतिदुःखार्तदीनजनोद्दिधीर्षया परमानन्दप्रदालौकिकविचाररत्नालङ्कृतग्रन्थकदम्बनिर्माणेन परं प्रसादं विस्तरं च प्रापिता । ततोऽज्ञानाश्रद्धालुपुरुषोत्थापितशङ्काकुतर्कादिनिरासाय श्रीवाचस्पतिमिश्र–श्रीहर्ष–चित्सुखाचार्य–मधुसूदनसरस्वतीप्रभृतिभिरसाधारणधिषणैः महोदयैर्भामती–खण्डनखण्डखाद्य–प्रत्यक्तत्वप्रदीपिका–अद्वैतसिद्ध्यादयः तर्कजटिलाः पण्डितंमन्यैर्दुर्ज्ञेया अपि परमोत्कृष्टाः ग्रन्थाः प्रणीताः ।

इत्थं व्याकरणन्यायमीमांसादिशास्त्राणीव वेदान्तशास्त्रमपि ग्रन्थबाहुल्येन पारिभाषिकशब्दसंपत्त्या च परमामगाधतामाससाद । एवं स्थिते तच्छास्त्राध्येतॄणामुपकाराय वेदान्तसार–तत्त्वानुसन्धान–वेदान्तपरिभाषादयो लघवः प्रकरणग्रन्था बहुभिः पण्डितैः प्रणीताः । तेऽपि छात्राणां दुर्गमा इत्यालोच्य तादृशग्रन्थप्रविविक्षूणामुपयोगाय अयं वेदान्तसंज्ञावली ग्रन्थो ग्रन्थकर्त्रा निर्मित इति अस्माकमभिप्रायः । टीकाकारेणापि टीकायाः प्रारम्भे अयमेवाशयो वर्णितः यथा– "ये खलु छात्रा दुरधिगमवेदान्तशास्त्राध्ययनारीप्सवः, ते प्रायेण प्रथमतो वेदान्तसाराख्यं प्रकरणमधीयन्ते पञ्चदशाख्यं वा प्रकरणम् । किन्त्वश्रुतानुभूतवेदान्तशास्त्रपरिभाषितपदतदर्थतया तेषां तत्तद्ग्रन्थपाठे प्रयासबाहुल्यं स्यादेवेति मनसि विभाव्य कश्चिदध्यापकः शास्त्रहिताय वेदान्तशास्त्रीयसंज्ञासंज्ञिज्ञानोत्पादकं वेदान्तसंज्ञावलीनामधेयं प्रकरणं प्रणिणीषुः" इत्यादि । अतिसरलत्वात्प्रचनाग्रथितत्वान्नूनमयं ग्रन्थश्छात्राणां परमोपकारीति ग्रन्थावलोकनेन व्यक्तं भवति ।

मूलकारिकाकर्तुः तथा तट्टीकाकर्तुर्नामदेशकालादिकमितिवृत्तं किमपि संप्रति नोपलभ्यते इति दूयते चेतः। अहो दुर्भाग्यमस्माकं भारतवर्षीयाणां यदत्र बहूनां प्राचीनमहापुरुषाणां ग्रन्थकृतां कवीनां वेतिहासो नोपलभ्यते। अतस्तद्विषये तूष्णीमेव स्थीयतेऽगतिकैरस्माभिः। तथापि कारिकाकारष्टीकाकारश्च उभावपि नातिप्राचीनाविति भाति। यतः कारिकाकारेण २०५ तमकारिकायां (पृ. ७९) श्रीमाधवाचार्यापरनामकविद्यारण्यस्वामिविरचितपञ्चदशीग्रन्थगततत्त्वविवेकाख्यप्रथमप्रकरणस्य नामोल्लेखं कृत्वा तत्रत्यः "विकल्पो निर्विकल्पस्य सविकल्पस्य वा भवेत्" इत्यादिः पञ्चाशत्तमः श्लोकः समुदाहृतः। श्रीविद्यारण्यस्वामिनश्च ख्रिस्तशकस्य १३५० वर्षे आसन्निति इतिहासज्ञानां मतम्। अतः वेदान्तसंज्ञावलीकारः तट्टीकाकारश्च उभावपि ख्रिस्तशकस्य चतुर्दशशतकादूर्ध्वं बभूवतुरित्येतावन्मात्रं वक्तुं शक्यते।

कारिकासु वेदान्तशास्त्रीयपारिभाषिकपदार्थजातं सकलमपि सुगमया वाण्या द्वित्र्यादिसंख्यात्मकपदार्थगणरूपेण संगृहीतम्।

टीकाकृता तु बह्वायासेन सर्वेऽपि पदार्थाः सरलसरण्या विस्तरशो व्याख्याताः। मध्ये मध्ये प्रसङ्गवशात् शास्त्ररहस्यभूताः विवर्तपरिणामवादादयोऽनेके विषयाः मतान्तरसिद्धान्तोद्घाटनपूर्वकं विवृताश्च। अतो नवच्छात्राणामतीवोपयुक्तोऽयं ग्रन्थ इति विभाव्य प्रकाशयितुं प्रवृत्ता वयम्। अत्र चाभीप्सितशब्दार्थज्ञानसौकर्यार्थं अकारादिवर्णानुक्रमबद्धा शब्दसूची ग्रन्थादौ प्रकाशिता पाठकानां बहूपकर्त्री स्यादिति वयमाशास्महे।

ग्रन्थोऽयं पञ्चविंशतिवर्षेभ्यः प्राक्कलिकातानगरे श्रीवेदान्तवागीशोपाख्यश्रीकालीचरणशर्मणा वङ्गाक्षरैर्मुद्रयित्वा प्रकाशित आसीत्। तत्पुस्तकस्य दुष्प्रापत्वात् वङ्गाक्षरानभिज्ञानामनुपयुक्तत्वाच्च सोऽयं ग्रन्थो जिज्ञासूनामुपयोगाय गीर्वाणाक्षरैः प्रथममेवेह प्रकाश्यते। अस्मिन् ग्रन्थे अक्षरसंयोजकादिप्रमादेन यत्किञ्चिदशुद्धं दृश्येत तत्संशोधनीयं कृपालुभिर्विद्वत्प्रवरैरिति विज्ञापयति

कारवारपुर्यां आश्विन शु. १० म्यां, शकाब्दाः १८४८	विदुषामनुचरः मञ्जेशशर्मा।

वेदान्तसंज्ञावलीग्रन्थगतानां पारिभाषिकशब्दानां सूची ।

	पृ.
अ	
अक्षरः	२१, २२, २४
अक्षि	५६
अख्यातिः	६६
अग्निगुणाः	८५
अजहल्लक्षणा	२६
अजिह्मः	७६
अजिह्मादिषट्कम् ...	७६
अज्ञानम् ...	४, ७७
अज्ञानशक्तिः	१२
अज्ञानाद्यम्	२
अणिमा	८२
अण्डजम्	५०
अतिशयतापः	३७
अत्यन्ताभावः ...	७४
अधिकारी ...	४०, ८९
अधिदैवम्	२८
अधिभूतम्	२८
अधिष्ठानम्	८६
अध्यात्मभावः ...	८५
अध्यात्मम्	२८
अध्यारोपः ...	२, ४
अध्यासः ...	४, ५०, ५१
अनलः	८१
अनवस्था	७८
अनन्तशक्तिः ...	७६
अनहङ्कारिता ...	५२
अनादिबोधः ...	७६
अनाद्यम्	५
अनाद्यध्यारोपः ...	४
अनिर्वचनीयख्यातिः ...	६६
अनिर्वाच्यम्	५
अनिष्टप्रसञ्जनम् ...	७८
अनुपलब्धिप्रमाणम् ...	७३
अनुबन्धचतुष्टयम् ...	४०
अनुमानम् ...	४१, ४३
अनुमितिकरणम् ...	४६
अनुवादः	३७
अनृतम्	८
अन्तःकरणचतुष्टयम् ...	४१
अन्तरुपासनम् ...	५२
अन्धः	७६
अन्नमयकोषः	५५
अन्यथाख्यातिः ...	६६
अन्योन्याभावः ...	७४
अन्योन्याश्रयः ...	७८
अपक्षयः	६९
अपरब्रह्म	१८
अपराविद्या	१७
अपरिग्रहः	६४
अपरोक्षधीः	७७
अपवदनसीम ...	८९
अपवादः ...	२१, ८६
अपानः	५९
अपां गुणाः	८५
अपूर्वता	७०
अपूर्वविधिः	३३
अभावः	७४

	पृ.
अभिज्ञा	५३
अभिधानानुपपत्तिः ...	७२
अभिनिवेशः	६९
अभिवदनम्	५३
अभिहितानुपपत्तिः ...	७२
अभ्यासः	७०
अमनस्कत्वम्	५२
अमूर्तः	२०
अम्बरम्	८२
अरिषड्वर्गः	६९
अर्थक्रिया	५३
अर्थवादः ... ३६,	७०
अर्थापत्तिः	७१
अलम्बुषा	८३
अलुप्तशक्तिः	७६
अवच्छिन्नः	२१
अवच्छेदवादः ...	५३
अवस्त्वारोपः ...	२
अवस्तुकम्	२
अवान्तरप्रलयः ...	६४
अविद्या ८, ६९,	७७
अव्यक्तम्	८
अव्ययः	१९
अव्याकृतम्	८
अव्याकृतः	१९
अष्टधाप्रकृतिः	८१
अष्टपाशाः	८२
असंभावना ... १३,	३०
असत्ख्यातिः	६६
असृक्कोषः	७०
अस्तिः	६९
अस्तेयम्	६४
अस्थि	८५
अस्थिकोषः	७०
अस्थितप्रज्ञा	१४
अस्मिता	६९
अहङ्कारः ३०, ४१,	८१
अहिंसा	६४

आ

	पृ.
आकाङ्क्षा	४७
आकाशः	८१
आकाशगुणः ...	८५
आगतिः	७७
आगामिकर्म ...	३८
आतिथ्यम	७५
आत्मख्यातिः ...	६६
आत्मा ... २३,	८२
आत्माश्रयः	७८
आत्यन्तिकप्रलयः ...	६४
आधिदैविकदुःखम् ...	२८
आधिभौतिकदुःखम् ...	२८
आध्यात्मिकदुःखम् ...	२८
आनन्दः	५८
आनन्दत्रयम् ...	३२
आनन्दमयकोषः ९,	५६
आन्तरप्रपञ्चः ...	४
आपः	८१
आभासवादः ...	५३
आरम्भवादः	२९
आरोपः ... ४, ५०,	५१
आरोप्यम्	८५
आलस्यम्	८६
आवृत्तिः ... १२,	७७
आश्रमः	७६

	पृ.
आश्रमचतुष्टयम् ...	३९
आसत्तिः ...	४७, ४८
आसनम्	८१
इ	
इडा	८३
इन्द्रियाणामुपादानानि ...	५८
ई	
ईशः	२१
ईशित्वम्	८२
ईश्वरः	१९
ईश्वरप्रणिधानम् ...	६४
ईश्वरोपाधिः	८
उ	
उत्कृष्टोपाधिः ...	९
उत्पत्तिः	७७
उदानः	५९
उदाहरणम्	४५
उद्भिदम्	५०
उपक्रमः	७०
उपनयः	४५
उपपत्तिः	७०
उपपादकम्	७१
उपमानम्	४१
उपमितिः	४६
उपमितिकरणम् ...	४७
उपरतिः ...	३१, ७६
उपसंहारः	७०
उपस्थम्	५७
उपपाद्यम्	७१
उपादानम्	५३

	पृ.
उपाश्रयः	१८
उपासना	५२
उपासाविषयः ...	५०
उपेक्षा	५०
ए	
एकजीववादः ...	५३
एकाग्रम्	६४
एकादशविधद्रव्यम् ...	८३
एकान्तशीलता ...	७८
एकावली	८९
एषणात्रयम्	३२
ऐ	
ऐश्वर्यम्	७७
ऐश्वर्याष्टकम्	८२
क	
करुणा	५०
कर्मजतादात्म्यम् ...	३१
कर्मत्रयम्	३७
कर्मपञ्चकम्	६१
कर्ममार्गः	१६
कर्मशास्त्रीयव्यवहारः ...	३२
कर्मेन्द्रियकर्माणि ...	५८
कल्पितः	२०
कषायः	५०
कामावसायिता ...	८२
कामः	६९
काम्यकर्म	६१
काम्यकर्मल०	६१
कायदण्डः	३८
कारणशरीरम्	९

	पृ.
कार्यम्	३१
कार्यविनाशः	१३
कुञ्चनम्	८५
कुटीचकः	५२
कुतर्कः	३८
कुम्भकः	३१
कुलम् ... ७६,	८२
कूटस्थः २१, २२,	२५
कूर्मः	५९
कृकरः	५९
कोषः	९
क्रिया	३९
क्रोधः	६९
क्लेशाः पञ्च	६९
क्षयतापः	३७
क्षितिगुणाः ... ८४,	८५
क्षिप्तम्	६४
क्षुध्	७०
क्षुधा	८५
ख	
खम्	८१
ख्यातिपञ्चकम् ...	६६
ग	
गतिः	७७
गन्धः	५७
गमनम्	५८
ग्रन्थतात्पर्यनिर्णय लिङ्गशट्कम् ...	७०
गान्धारी	८३
गार्हस्थ्यम्	३९
गुणत्रयम्	२९
गुणवादः	३७
गुणैक्यम्	८
गुणः	३९
गोत्रम्	७६
गौरवम्	७८
ग्रहणम्	५८
घ	
घृणा	८२
घ्राणम्	५६
च	
चक्रकाश्रयः	७८
चतुर्विधव्यवहारः ...	५३
चलनम्	८५
चित् २, २२,	२५
चितिः १९, २२,	२५
चित्तम्	४१
चित्तादात्म्यम्... ...	३१
चिदानन्दम्	२
चिदाभासावस्थाः ...	७७
चिदाभासः	२०
चेतनः	२५
चैतन्यम्	२२
ज	
जगदाधारः	२१
जडम्	२
जडिमा	८
जपः	७५
जरा	७०

	पृ.
जरायुजम्	५०
जहदजहल्लक्षणा ...	२६
जहल्लक्षणा	२६
जातिः ३१, ६१,	७६
जीवन्मुक्तिः	१८
जीवब्रम्हविभागः ...	७
जीवोपाधिः	९
जीवः २२, २४,	८९
जुगुप्सा	८२
ज्ञाता	३०
ज्ञानम् ३०, ३१,	७७
ज्ञानप्रतिबन्धकाः ...	३०
ज्ञानमार्गः	१६
ज्ञानादित्रयम्	३१
ज्ञानापनोद्यम्	५
ज्ञेयम्	३०

त

तटस्थलक्षणम् ...	१६
तपः	६४
तमिस्रा	८
तमः ... ८,	२९
तर्कभेदाः	७८
तर्काख्यसप्तदोषाः ...	७८
तर्कोदाहरणानि ...	७९
तात्पर्यम् ... ४७,	४८
तात्पर्यग्राहकाणि ...	४९
तादात्म्यम्	३१
तादात्म्याध्यारोपः ...	४
तितिक्षा ... ७६,	७८

	पृ.
तुरीयम्	२१
तूलाविद्या	१८
तृतीयस्थानम्	१६
तृप्तिः	७६
तृष्णा	८५
तैजसाहङ्कारः	३०
तैजसोपाधिः	१०
तैजसः	२०
त्रिदण्डिनः	३८
त्रिपुटी	३०
त्रिविधकालः	३०
त्रिविधलक्षणा... ..	२६
त्रिविधव्यवहारः ...	३२
त्वक्	५६
त्वक्कोषः	७०
त्वचा	८५

द

दण्डत्रयम्	३८
दमः	७६
दशनाडिकाः	८३
दृक्	२
दृक्त्वम्	२१
दृश्यम्	२
दृष्टार्थापत्तिः	७२
देवतापूजनम्	७५
देवदत्तः	५९
देवमार्गः	१६
देवयानः	१६
देवः	१९

	पृ.
देहतादात्म्यम्	३१
देही	२२
दैनंदिनप्रलयः... ...	६४
द्वेषः ... ६९,	८६

ध

धनञ्जयः	५९
धर्मः	८२
धारणा	८१
धावनम्	८५
ध्यानम्	८१
ध्वंसाभावः	७४

न

नभोगुणाः	८६
नागः	५९
नाडी	८५
नामन्	७६
नाशः	७०
निकृष्टोपाधिः	९
निगमनम्	४५
निजानन्दः	३२
नित्यकर्मभेदाः ...	६१
नित्यकर्मलक्षणम् ...	६२
नित्यप्रलयः	६४
नित्यानित्यविवेकः ...	४०
निदिध्यासनम् ...	३१
निद्रा ... ८,	८५
निधनम्	७७
नियमविधिः	३३
नियमः	८१

	पृ.
निरङ्कुशतृप्तिः	७७
निरुद्धम्	६४
निर्गुणम्	१८
निर्विकल्पकसमाधिः १४,	८१
निवृत्तिः	१३
निःश्रेयसम्	१३
निषिद्धकर्म	६१
निषिद्धकर्मल० ...	६३
निस्पृहत्वम्	७८
निषेधमुखवृत्तिः ...	२२
निषेधावधिः	२१
नैमित्तिककर्म	६१
नैमित्तिककर्मल० ...	६३
न्यायावयवाः	४५
न्यायः	४५
न्यासः	१५

प

पङ्कुः	७६
पञ्चज्ञानेन्द्रियाणि ...	५६
पञ्चकर्मेन्द्रियाणि ...	५७
पञ्चकोषाः	५५
पञ्चख्यातिविवेकः ...	६७
पञ्चनियमाः	६४
पञ्चप्रलयाः	६४
पञ्च प्राणाः	५९
पञ्च भूमयः	६४
पञ्च भ्रमाः	६५
पञ्च यमाः	६४
पञ्च विषयाः	५७

	पृ.
पञ्चसप्ततिः भूतगुणाः ...	८५
पञ्चोपवायवः ...	५९
पदजन्यपदार्थोपस्थितिः ...	४८
पदार्थः	२५
पयस्विनी	८३
परब्रह्म	१८
परमहंसः	५२
परमात्मा	२१
परमेश्वरः	१९
परानन्दाप्तिः	१३
परा विद्या	१७
परार्थानुमानम् ..	४५
परिकर्म	५०
परिणामः	६९
परिणामवादः ...	२९
परिसंख्याविधिः ...	३३
परोक्षधीः	७७
पादः	५७
पाणिः	५७
पायुः	५७
पारमार्थिकसत्यम् ...	२७
पावकः	८२
पिङ्गला	८३
पितृमार्गः	१६
पितृयानः	१६
पिपासा	७०
पुत्रैषणा	३२
पुरुषः ... २२,	२५
पूरकः	३१
पूरुषः ... २२,	२५
पूषा	८३
पृथिवी	८२
प्रकृतिः	८
प्रज्ञा	१४
प्रज्ञामान्द्यम्	३८
प्रतिज्ञा	४५
प्रतिबन्धचतुष्टयम् ...	३८
प्रतिबिम्बवादः ...	५३
प्रत्यक्	२३
प्रत्यक्षम्	४१
प्रत्यगात्मा २२, २५,	८९
प्रत्याहारः	८१
प्रपञ्चः २, ४,	८८
प्रमाणचैतन्यम् ...	५४
प्रमाणचतुष्टयम् ...	४१
प्रमाणबाधितार्थः ...	७८
प्रमाणम्	५४
प्रमाता २२, २५,	५४
प्रमातृचैतन्यम् ...	५४
प्रमाचतुष्टयम् ...	५४
प्रमितिः	५४
प्रमितिचैतन्यम् ...	५४
प्रमेयम्	५४
प्रयोजनम्	४०
प्रलयावस्था	८
प्रसारणम्	८५
प्राकाम्यम्	८२
प्राज्ञः	२०

	पृ.
प्रागभावः	७४
प्राणः ...	१९, ५९
प्राणमयकोषः ...	५५
प्राणायामः	८१
प्राणायामत्रयम् ...	३१
प्राणी ...	२२, २५
प्रातिभासिकः ...	२०
प्रातिभासिकसत्यम् ...	२७
प्राप्तिः	८२
प्रायश्चित्तकर्म... ...	६१
प्रायश्चित्तल० ...	६३
प्रारब्धम्	३७
पारमार्थिकः	२१
फ	
फलम्	७०
फलभोगविरागः ...	४०
ब	
बधिरः	४०
बन्धः	७७
बहिरुपासनम्	५२
बहूदकः	५२
बाधः	१३
बाह्यप्रपञ्चः	४
बुद्धिः ...	४१, ८१
बुद्धितत्त्वम्	८२
बृहत्त्वम्	२१
बृंहणम्	२१
ब्रह्म	२, २१, ८८, ८९
ब्रह्मचर्यम् ...	३९, ६४
ब्रह्मलक्षणम्	१६

	पृ.
ब्रह्माद्वैतम्	१
ब्रह्मानन्दः	३२
ब्राह्मप्रलयः	६४
भ	
भगः	७७
भगवान्	७७
भयम् ...	८२, ८६
भविष्यत्कालः ...	३०
भावः	२७
भावरूपम्	५
भूतकालः	३०
भूतगुणाः	८४
भूतग्रामचतुष्टयम् ...	५०
भूताद्यहङ्कारः	३०
भूतार्थवादः	३७
भूमिः	८१
भूमिचतुष्टयम्... ...	५२
भ्रमनिवर्तकदृष्टान्ताः ...	६५
भ्रमाः	६५
भ्रान्तिः	४
भ्रान्तिजतादात्म्यम् ...	३१
भ्रान्तिनाशकदृष्टान्ताः ...	६६
म	
मज्जाकोषः	७०
मदः	६९
मदमूर्तयः	८२
मननम्	३१
मनः	४१
मनोदण्डः	३८
मनोमयकोषः	५६

	पृ.
मरणम्	७०
महत्तत्वविहीनत्वम् ...	५२
महासुषुप्तिः	८
महिमा	८२
महेश्वराङ्गानि	७६
मानगतविपरीतभावना ...	१४
मानगतसंशयः... ...	१३
मानगतासम्भावना ...	१३
माया	८
मार्गः	१६
मात्सर्यम्	६९
मांसम्	८५
मुक्तिः	१८
मुख्यप्राणः	५९
मुख्या वृत्तिः	११
मुग्धः	६७
मुदिता	५०
मूढम्	६४
मूत्रम्	८५
मूर्तः	२०
मूलप्रकृतिः	२९
मूलाविद्या	१८
मेदःकोषः	७०
मेयगतविपरीतभावना ...	१४
मेयगतसंशयः	१३
मेयगतासम्भावना ...	१३
मैत्री	५०
मैत्र्यादिचतुष्टयम् ...	५०
मोक्षशास्त्रीयव्यवहारः ...	३२
मोक्षः	७७
मोहः	६९, ७०, ८६
मौनम्	७८
म्लानसत्त्वम्	९
य	
यत्किञ्चित्	५
यमः	८१
यशः	७७
योगाङ्गानि	८१
योगासनम्	७८
योगः	७८
योग्यता	४७, ४८
र	
रजः	२९
रसज्ञता	५०
रविः	८२
रसनम्	५६
रसः	५७
रागः ...	६९, ८६
रूपम्	५७
रेचकः	३१
रोमन्	८५
ल	
लकुट्टा	८३
लक्षणा ...	११, २७
लक्ष्यलक्षणसम्बन्धः ...	२५
लक्ष्यार्थः	१०
लघिमा	८२
लज्जा ...	८२, ८६

	पृ.
लयस्थानम्	९
लयः	५०
लोकैषणा	३२
लोभः	६९
लौकिकव्यवहारः ...	३२
व	
वचनम्	५८
वन्हिगुणाः	८५
वर्णः	७६
वर्तमानकालः	३०
वशित्वम्	८२
वस्तु ... २, २७,	८८
वस्तुविवर्तः	८६
वाक्	५७
वाक्यजन्यज्ञानकारणानि ...	४७
वाग्दण्डः	३८
वाङ्निरोधः	५२
वादः चतुर्विधः ...	५३
वानप्रस्थः	३९
वायुः ... ८१,	८२
वायुगुणाः	८५
वासनानन्दः	३२
विक्षिप्तम्	६४
विक्षेपः १२, ५०	७७
विज्ञानमयकोषः ...	५६
वित्तम्	८२
वित्तैषणा	३२
विदेहमुक्तिः	१८
विद्या ... १७,	७७
विद्वत्संन्यासः... ...	१५

	पृ.
विविदिषासंन्यासः ...	१५
विधित्रैविध्यम् ...	३३
विपरीतक्रमः	८६
विपरीतभावना १४,	३०
विपर्ययः	४
विपर्ययदुराग्रहः ...	३८
विपर्यासः	४
वियोगः	८५
विराजः	१९
विराट् ... १०,	१९
विवर्तः	८८
विवर्तवादः	२९
विशुद्धसत्त्वम्	८
विशुद्धचित्	६
विशेषणविशेष्यता ...	२५
विश्वोपाधिः	१०
विश्वः	२०
विश्वकारणम्	१९
विषयः	४०
विषयानन्दः	३२
विषयासक्तिः	३०
विष्णुशक्तिः	८
विसर्जनम्	५८
वीर्यम्	७७
वृत्तिः	४१
वृद्धिः	६९
वैकृताहङ्कारः	३०
वैराग्यम् ... ३१,	७७
वैश्वदेवः	७५

			पृ.
वैश्वानरः	...	...	१९
व्रज्या	...	...	१५
व्यभिचारः	...	...	४४
व्यष्टिः	...	८,	९
व्याघातः	...	...	७८
व्यानः	...	...	५९
व्यापारः	...	...	४३
व्याप्तिः	...	...	४४
व्याप्तिग्रहः	...	...	४४
व्याप्तिज्ञानम्	...	...	४३
व्यावहारिकः	...	...	२०
व्यावहारिकसत्यम्		...	२७
व्याहृतिः	...	...	७८
श			
शक्तिः	...	...	११
शक्यसम्बन्धः	...	...	११
शक्यार्थः	...	...	१०
शङ्का	...	...	८२
शङ्खिनी	...	...	८३
शब्दः	...	४१,	५७
शब्दप्रमाणम्	...	...	४७
शब्दप्रवृत्तिनिमित्तानि		...	३९
शब्दार्थः	...	...	१०
शमः	...	...	७६
शमादिषट्कम्		४०,	७६
शरीराधिष्ठानम्		...	२२
शशी	...	...	८२
शीलम्	...	...	८२
शुक्रम्	...	...	८५

			पृ.
शुद्धचेताः	...	...	८९
शेषी	...	...	३४
शेषः	...	...	३४
शोकः	...	...	७०
शोकमोक्षः	...	...	७७
शोकहर्षौ	...	...	८९
शोणितम्	...	...	८५
शौचम्	...	...	६४
श्रद्धा	...	...	७६
श्रवणम्	...	...	३१
श्रवणादित्रयम्		...	३१
श्रीः	...	...	७७
श्रुतार्थापत्तिः	...	...	७२
श्रोत्रम्	...	...	५६
श्लेष्मा	...	...	८५
ष			
षट्कर्माणि	...	...	७५
षट्कोषाः	...	...	७०
षटप्रमाणानि	...	...	७१
षडूर्मयः	...	...	७०
षडैश्वर्यम्	...	७६,	७७
षड्भावविकाराः		...	६९
षड्भ्रमाः	...	...	७६
षण्डकः	...	...	७६
स			
सगुणम्	...	...	१८
सत्ता	...	...	२७
सत्यम्	...	२७,	६४
सत्त्वम्	...	...	२९

	पृ.
सप्त अवस्थाः	७७
सप्तत्वम्	७८
समष्टिः ... ८,	९
समाधिः १४, ७६,	८१
समाधिविघ्नानि ...	५०
समानः	५९
सर्वज्ञता	७६
सर्वानर्थनिवृत्तिः ...	१३
सर्वान्तर्यामी	१९
सलिलम्	८२
सविकल्पकसमाधिः ...	१४
सहचारः	४४
सहजतादात्म्यम् ...	३१
सङ्गः	८५
सञ्चितकर्म	३८
संज्ञाः	१
संज्ञावली	८९
सन्तोषः	६४
सन्ध्या	७५
संन्यासः ... १५,	३९
संन्यासिगुणाः	७८
संन्यासी चतुर्विधः ...	५२
संपद्	५०
सम्बन्धः	४०
संवर्गः ... ५०,	५१
संशयः ... १३,	३०
संसर्गाध्यारोपः ...	४
संसारः	४

	पृ.
संसारचक्रम्	८३
संसारस्वरूपम्	८३
साक्षी २१, २२,	२५
साक्षितादात्म्यम् ...	३१
सादृश्यप्रमा	४६
साद्यध्यारोपः	४
साधनचतुष्टयम् ...	४०
सामानाधिकरण्यम् ...	२५
साहसतापः	३७
सिद्ध्यष्टकम्	८२
सुषुप्तिः	९
सुषुम्ना	८३
सूक्ष्मदेहः ... ९,	१९
सूक्ष्मशरीरम्	९
सूत्रात्मा	१९
स्थितप्रज्ञा	१४
स्थूलशरीरम्	१०
स्नानम्	७५
स्पर्शः	५७
स्वप्नः ... ९,	२०
स्वाध्यायः	६४
स्वार्थानुमानम् ...	४५
स्रष्टृत्वम्	७
स्वतन्त्रता	७६
स्वरूपम्	३१
स्वरूपलक्षणम् ...	१६
स्वर्गितापत्रयम् ...	३७
स्वेदः	८५

	पृ.
स्वेदजम्	५०
ह	
हस्तिजिव्हा	८३
हिरण्यगर्भः	१९
हेतुः	४५
हेत्वादित्रयम्	३१
होमः	७५
हंसः	५२

॥ वेदान्तसंज्ञावली सटीका ॥

नत्वा गुरोः पदयुगं अध्यन्ते तत्प्रसादतः ।
वेदान्तविदिताः संज्ञाः कारिकाभिर्यथामति ॥ १ ॥
ब्रह्माद्वैतं मतं येषां तेषां वेदान्तिनां नये ।
अध्यारोपकृता संज्ञाः नानाः स्युर्व्यवहारतः ॥ २ ॥

सरस्वतीं प्राञ्जलिरानतोऽस्मि
वेदान्तसंज्ञाविवृतिं प्रणेष्यन् ॥
देवी सदा साऽस्तु कृपान्विता मे
कृपा हि तस्याः सकलार्थदात्री ॥ १ ॥

अथाद्ययावदिह यत्नतोऽपि नैयायिकानां भाषापरिच्छेद इति प्रसिद्धं कारिकावल्यभिधानं प्रथमपाठोपयोगि पुस्तकमिव वैदान्तिकानां न किमपि प्रथमपाठोपयोगिप्रकरणपुस्तकमासाद्यते । ये खलु छात्रा दुरधिगमवेदान्तशास्त्राध्ययनारीप्सवः, ते प्रायेण प्रथमतो वेदान्तसाराख्यं प्रकरणमधीयन्ते पञ्चदश्याख्यं वा प्रकरणम् । किन्त्वश्रुताननुभूतवेदान्तशास्त्रपरिभाषितपदतदर्थतया तेषां तत्तद्ग्रन्थपाठे प्रयासबाहुल्यं स्यादेवेति मनसि विभाव्य कश्चिदध्यापकश्छात्रहिताय वेदान्तशास्त्रीयसंज्ञासंज्ञिज्ञानोत्पादकं वेदान्तसंज्ञावलीनामधेयं प्रकरणं प्रणिणीषुः शिष्टाचारं परिपालयन् गुरुचरणस्मरणतन्नमस्काररूपं मङ्गलं विधाय तदेव शिष्यशिक्षार्थं श्लोकेनोपनिबध्य प्रतिज्ञामावेदयति—नत्वेति । वेदान्तविदिता वेदान्तेषु परिज्ञाताः, प्रसिद्धा इति यावत् । संज्ञाः शास्त्रीयाः पारिभाषिकशब्दाः । कारिका "यत्स्वल्पाक्षरवृत्तेन बहुलार्थोऽभिधीयते । कारिकेति समाख्याता" इत्युक्तलक्षणं पद्यम् । यथामतीति विनयप्रदर्शनार्थमुक्तं, न तु स्वाल्पज्ञताज्ञापनार्थम् । यथायथग्रथनात् ॥ १ ॥

यद्यप्येक एव ब्रह्मपदार्थोऽस्ति परमार्थतो ब्रह्माद्वैतवादिनां वेदान्तिनां, न तु नानापदार्थाः सन्ति, तथापि तेषां मते यावत् न ब्रह्म विज्ञायते तावत् लौकिकवैदिकव्यवहारगोचराः कल्पितनानापदार्थास्तथा तदवबोधकाश्च शब्दाः

---

१ द्विधा इतं प्राप्तमिति द्वीतम् । तस्य भावो द्वैतम् । न विद्यते द्वैतं द्विधाभावो यत्र तदद्वैतम् । एतदेवोक्तं वार्तिके "द्विधेतं द्वीतमित्याहुस्तद्भावो द्वैतमुच्यते" इत्यादिना पद्येन ।

२ दृग्दृश्यौ चिज्जडौ वाऽत्र पदार्थौ द्वौ प्रकीर्तितौ ।
दृक्पदार्थो भवेदात्मा प्रपञ्चो दृश्य उच्यते ॥ ३ ॥
अध्यारोपक्रमैरेव नानात्वं स्यात्तयोर्द्वयोः ।
अपवादे तु तन्नास्ति तदैक्यं पारमार्थिकम् ॥ ४ ॥
अध्यारोपः समाख्यातोऽवस्त्वारोपस्तु वस्तुनि ।
वस्तु ब्रह्म चिदानन्दमज्ञानाद्यमवस्तुकम् । ५ ॥

सन्त्येवेति तदभिधानायाह—ब्रह्मेति । नये शास्त्रे । व्यवहारतः व्यवहाराय । लौकिकवैदिकव्यवहारगोचरा नानासंज्ञाः संज्ञिनश्च अध्यारोपकृता अध्यारोपेण जनिताः स्युः । सन्त्येवेत्यर्थः । सापेक्षशब्दत्वात् संज्ञाशब्दः संज्ञिनमप्याक्षिपतीति द्रष्टव्यम् । नानात्वं चात्र अनाद्यज्ञानग्रस्तजीवकथितं न तु तत्पारमार्थिकमिति ध्वनितम् ॥ २॥

पदार्थान्निर्दिशति—दृगिति । द्वावेव पदार्थौ वेदान्तिनामद्वयवादिनां, दृक् दृश्यश्च । अथवा चित् जडश्च । अन्यवादिपरिकल्पितानां पदार्थानामत्रैवान्तर्भावात् द्विविधत्वमेव निरपवादम् । तत्र दृक् पदार्थ आत्मा परमार्थ एकः सर्वदा एकरूपः । दृश्यपदार्थस्तु अविद्यातद्व्याप्यतत्कार्यात्मकः प्रपञ्चः । अस्य त्वपारमार्थिकत्वेऽपि व्यावहारिकसत्ताभ्युपगमेन पदार्थसंज्ञया ग्रहणमविरुद्धम् । मिथ्यापदार्थानामप्यर्थक्रियाकारित्वस्य दृष्टत्वादुपासनादावुपयोगदर्शनाच्च दृश्यानां पारमार्थिकसत्यत्वाभावेऽपि व्यावहारिकसत्यतया पदार्थताऽङ्गीकर्तव्या एवेति नात्र विवदितव्यम् । मिथ्यापदार्थानामर्थकारित्वं चाग्रे दर्शयिष्यामः । दृक् दृश्यश्चेत्यत्र केचिदाचार्याः चिजडाविति आत्मानात्मानाविति सदसदिति पुरुषप्रकृतीति चाहुः । सर्वे ते दृक्दृश्ययोरेव पर्याया इति ॥ ३ ॥

अद्वैतवादिनां मते नानात्वव्यवहारोऽपारमार्थिकः, स तु आध्यासिकनानापदार्थोपाधिपरंपराकृत इति तदभिधातुं आह—अध्यारोप इति । "इत्यादि बहुवचनान्ता गणस्य संसूचकाः" इति वैयाकरणिकी वार्ता । ततश्चाध्यारोपक्रमैः साक्षात्परम्परया च क्रमिकनानाध्यासगणैः तयोर्द्वयोरपि दृग्दृश्ययोः पदार्थयोर्नानात्वमनैकध्यं स्यात् भवतीत्यर्थः । आचार्योऽप्याह "इममेवाध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयादिव्यवहाराः प्रवर्तन्ते" इति । तु पुनः अपवादे अपवादकाले तत् नानात्वं नास्ति । तदा ऐक्यं एकमेवाद्वितीयं ब्रह्म प्रतितिष्ठति । तदेवास्मिन्मते पारमार्थिकं परमार्थसत्यम् ॥ ४ ॥

अपवादो वक्ष्यते । सम्प्रत्यध्यारोपमाह पद्यार्धेन—अध्यारोपेति । अध्यारोप इति लक्ष्यकथनम् । वस्तुन्यवस्त्वारोप इति तु लक्षणवचनम् । अधीत्यव्ययप-

देनाधिष्ठानम्, आरोपपदेन च अवभास उच्यते । अवभासो नाम अतद्रूपमपि तद्रूपेण स्फुरणम् । मिथ्याज्ञानमिति यावत् । यथा असदपि रजतं शुक्तौ रजतरूपेण स्फुरतीति । तथा च वस्तुनि सत्ये अधिष्ठाने अवस्तुनोऽसत्यस्याऽनिर्वचनीयस्यारोपोऽवभास इति लक्षणपदानामर्थः । एतेन सत्यमिथ्यासम्भेदावभासत्वमध्यारोपत्वमिति तल्लक्षणमायातम् । सम्भेदः संवलनं मिथुनीभावो वा । एतदेवोक्तं संक्षेपशारीरकाचार्यैः—"सत्यानृतात्मकमिदं मिथुनं मिथश्चेदध्यस्यते किमिति शून्यकथाप्रसङ्गः" इत्यादिना । यथा इदं रजतमित्येकत्राऽध्यासे नेदं रजतं किन्तु शुक्तिरिति विशेषदर्शनोत्तरकालीनशुक्तिसाक्षात्कारेण रजतभ्रान्तिनिवृत्तिदर्शनादध्यस्तस्य रजतस्य मिथ्यात्वमधिष्ठानस्य च शुक्तेः सत्यत्वमवधार्यते तथाऽन्यत्राप्यवधारणीयम् । अधिष्ठानता चास्मिन् दर्शने शक्तिद्वयवदज्ञानविषयविलासता । विषयता आवृतता । विलासता विक्षिप्तता । विवर्तमानतेति यावत् । इत्थमत्र प्रक्रिया, इदं रजतमित्यादौ शुक्त्याद्यवच्छिन्नचैतन्यनिष्ठमज्ञानं स्वावरणशक्त्या शुक्त्यादीन् विषयीकृत्य आवृत्य स्वविक्षेपशक्त्या च स्वात्मानं विक्षिप्य रजतादिरूपेण विवर्त्य अवभासते । एवं ब्रह्मानुगमेव मायासंज्ञमज्ञानं स्वावरणशक्त्या ब्रह्माणं विषयीकृत्य आवृत्य क्रमेण च विक्षेपशक्त्या स्वात्मानं महदहङ्कारादिरूपेण आकाशादिरूपेण च विक्षिप्य विवर्त्य तस्मिन्नेव ब्रह्मणि महदहङ्कारादिरूपेणाकाशादिरूपेण चावभासते । तत एव हि सर्वत्राध्यासे इदमयमित्याद्यंशस्य सत्यता चाधिष्ठानता च । शुक्त्याद्यं हि वस्तु अज्ञानाच्छादितत्वेनाविकल्पितमेव स्फुरति न तु सविकल्पितम् । तत एव हि तत्सामान्योल्लेखिवचनमिदमयमित्यादीति । अधुना पद्यशेषेण वस्त्ववस्तुन्याह । कालत्रयाऽनपायित्वं वस्तुत्वमिति वस्तुलक्षणम् । तच्च ब्रह्मण्येवास्ति न त्वन्यत्र । अज्ञानतत्कार्याकाशादेरपायवत्त्वेनावस्तुत्वस्य श्रुतिसिद्धत्वान्न तेषु लक्षणगमनप्रसक्तिः । अतएवाह—अज्ञानाद्यमिति । अज्ञानाद्यं अज्ञानतत्कार्यजातं जगदिति यावत् । तथा चाज्ञानतज्जन्याकाशादेरवस्तुत्वे मिथ्यात्वमेव प्रयोजकम् । मिथ्यात्वं च तेषां दृश्यत्वसावयवत्वविकारित्वसापेक्षसिद्धिकत्वेन अपारमार्थिकत्वेन ब्रह्मभिन्नत्वेन वेति बोद्धव्यम् । यद्यपि ब्रह्मातिरिक्तस्य सर्वस्यावस्तुत्वमेवाभिमतं वेदा-

१ अवभासशब्दस्यावयवार्थमादाय वाचस्पतिना अध्यारोपस्य संक्षिप्तलक्षणमित्थमुक्तम्—"अवसन्नो भासः अवभासः, अवसाद इति यावत् । अथवा अवमतो भासः अवभासः अवमान इति यावत् । अवसादः प्रत्ययान्तरेण बाधः । तथा च मिथ्याज्ञानमित्यर्थो लभ्यते । अवमानः यौक्तिकतिरस्कारः । सोऽपि मिथ्याज्ञानस्य नामान्तरमिति" ।

अध्यारोपश्चतुर्धाऽसौ साद्यनादिप्रभेदतः ।
तथा तादात्म्यसंसर्गभेदेन व्यवह्रियते ॥ ६ ॥
अथ वक्ष्येऽस्य पर्यायान्वेदान्तेषु व्यवस्थितान् ।
आरोपो भ्रान्तिरध्यासो विपर्यासो विपर्ययः ॥ ७ ॥
आब्रह्मस्तम्बपर्यन्तं जगदज्ञानजं विदुः ।
तस्य संज्ञा प्रपञ्चेति संसारेति च कीर्तिता ॥ ८ ॥
बाह्यान्तरविभेदेन स द्विधा परिकल्प्यते ।
पृथ्व्याद्यो बाह्यभेदः स्याच्छरीराद्यस्तथान्तरः ॥ ९ ॥

न्तिनां, तेन च "इदं रजतं" इत्यादिभ्रमस्थले शुक्त्यादेरवस्तुतया वस्तुघटिताध्यारोपलक्षणमव्याप्तं स्यादेव, तथापि तन्मते तेषां पारमार्थिकसत्यत्वाभावेऽपि संसारदशायां व्यवहारिकसत्यताऽस्त्येवेति तत्र तत्र व्यावहारिकपदं विशेषणीकृत्याध्यारोपलक्षणं सङ्गमयितव्यम् । तथा च सत्यत्वेनाभिमतायां शुक्तौ इत्येवमादिलक्षणवाक्यं सर्वत्र घटयितव्यमिति ॥ ५ ॥

अध्यारोपभेदानाह—अध्यारोप इति । शुक्त्यादौ रजतादेरध्यारोपः सादिः । ब्रह्मण्यज्ञानतद्धर्मादेरध्यारोपोऽनादिः । अयमहं अहमिदं अहं मनुष्यः इत्यादौ तादात्म्याध्यारोपः । मम शरीरमित्यादौ संसर्गाध्यासः । अध्यारोपश्चेत् शास्त्रविध्युद्भावितेच्छया प्रसाध्यते, तदा आहार्यारोप इत्याख्यायते । यथा शालग्रामादौ विष्ण्वादेरध्यासः । इत्यध्यारोपभेदविवृतिः ॥ ६ ॥

अस्य पर्यायानाह—अथेति । पर्यायान् नामानि ॥ ७ ॥

सम्प्रत्यज्ञानसमुत्थस्य जगतः संज्ञाद्वयमाह—आब्रह्मेति । संसरन्ति स्वादृष्टोपनिबद्धदेहादिपरिग्रहं कुर्वन्ति जीवा यत्र सः संसारः । अज्ञानस्य व्योमादिरूपेण विस्तृतिः प्रपञ्चः । पचि विस्तारे धातुः ॥ ८ ॥

प्रपञ्चद्वयमाह—बाह्येति । स्थूलसूक्ष्मकारणसमुदायानां समष्टिर्महाप्रपञ्च इत्याख्यायते । तस्यावान्तरभेदो बाह्यप्रपञ्चस्तथा आन्तरप्रपञ्च इति । पृथिव्यादिपञ्चभूत-तज्जन्यब्रह्माण्ड-तदन्तर्गतभूर्भुवःस्वर्जनमहस्तपःसत्यनामकलोकसप्तकाऽतलवितलसुतलतलातलमहातलरसातलपातालनामधेयलोकसप्तक—तन्निष्ठजरायुजाण्डजस्वेदजोद्भिज्ज-चतुर्विधभूतग्रामसमुदायो यथायोग्यं विविधनामरूपगुणधर्मशतयाद्याश्रयो बाह्यप्रपञ्चः । अन्नमयादिपञ्चकोशशरीरतया-ऽस्तितादिषड्विधभावविकार-त्वङ्मांसादिषट्कोशका-ऽशनायापिपासादिषडूर्मि-श्रोत्रादिज्ञानेन्द्रियप-

ज्ञानापनोद्यमज्ञानं भावरूपं गुणात्मकम् ।
अनिर्वाच्यमनाद्यं यत्किञ्चिदिति तद्विदुः ॥ १० ॥

त्वक्वागादिकर्मेन्द्रियपञ्चक-प्राणादिवायुपञ्चक-मनआद्यन्तःकरणचतुष्टय-संकल्पाद्यन्तःकरणवृत्तिचतुष्टय-जाग्रदाद्यवस्थात्रय-तद्व्यापार-तदभिमानिविश्वतैजसप्राज्ञ-समाधिमूर्च्छामरण-कामक्रोधाद्यरिषड्वर्ग-साधनचतुष्टय-सात्विकादित्रय-सुखदुःखाज्ञानादिपञ्चक्लेश-मैत्र्यादिचतुष्टय-योगाङ्गयमाद्यष्टक-प्रत्यक्षादिप्रमाणचतुष्टयरोगारोग्यादिसमुदायो यथायोग्यं विविधनामरूपगुणधर्मशक्त्याद्याश्रय आन्तरप्रपञ्च इति प्रपञ्चद्वयविवेकः ॥ ९ ॥

स्वशास्त्रोक्ताज्ञानलक्षणमाह—ज्ञानापनोद्यमिति । अज्ञानमिति लक्ष्यनिर्देशः, परिशिष्टं तु लक्षणम् । किञ्च ज्ञानापनोद्यत्वमेव लक्षणम् । शिष्टानि तु पदानि तद्दृढीकारार्थानि । अज्ञानमित्युक्ते "तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता । तद्विरोधापकर्षौ च नञर्थाः षट् प्रकीर्तिताः ॥" इत्यस्मात् नञोऽभावार्थं गृहीत्वा ज्ञानाभावोऽज्ञानमिति मतिर्मा भूदित्यत उक्तं भावरूपमिति । कार्यं प्रत्यभावस्योपादानकारणतानुपपत्तेस्तस्य भावरूपतैवाङ्गीकर्तव्या । यथा अधर्म इत्युक्ते भावरूपमेव पापं बुध्यते तथास्मिन्दर्शनेऽज्ञानशब्देन भावरूपमेव यत्किञ्चित् अभावविलक्षणं बुध्यताम् । तस्यात्मगुणत्वशङ्का मा भूदित्यत उक्तं गुणाः सत्त्वरजस्तमांसि लाघवप्रकाशावरणादिगुणकानि तदात्मकं तत्स्वरूपम् । तथा च गुणस्य गुणवत्तानुपपत्तेर्मिथ्याज्ञानमज्ञानमात्मगुण इत्यपि पक्षो निराकृतः । गुणत्वं चास्य रज्जुवच्चिदात्मबन्धकत्वेन न तु द्रव्याश्रितत्वेन । अनाद्यमिति जन्यत्वशङ्कानिरासाय । पूर्वज्ञानस्योत्तरज्ञानापनोद्यत्वदर्शनात्तस्य च भावरूपत्वात् गुणात्मकत्वाच्च तत्र लक्षणगमनं मा भूदित्यत आह—अनिर्वाच्यमिति । पूर्वज्ञानं निर्वाच्यमेव न त्वनिर्वाच्यम् । विवक्षितमज्ञानं तु अनिर्वाच्यम् । सत्त्वेनासत्त्वेन सत्त्वासत्त्वेन वा निर्वक्तुं निरूपयितुमशक्यं इत्यर्थः । त्रिगुणात्मकभावरूपत्वेऽपि पूर्वोक्तं पिण्डीकृत्यापि तदित्थमिति दर्शयितुमशक्यत्वात् सर्वप्रमाणासहत्वादप्रत्याख्येयत्वात्तुच्छत्वाच्चोक्तं यत्किञ्चिदिति । किमप्यघटनघटनापटीय इत्यर्थः । अथवास्य स्वसत्तायामपि दैन्यतां कथयितुमाह—यत्किञ्चिदिति । अत एव हि पूर्वत्र भावरूपमित्युक्तं न तु भावमिति । भाववदवभासते न तु भावलक्षणमस्तीति भावरूपशब्दस्यार्थः । एतदुक्तं "अविद्याया अविद्यात्वमिदमेव तु लक्षणम् । यत्प्रमाणासहिष्णुत्वमन्यथा वस्तु सा भवेत्" । तथा "सेयं भ्रान्तिर्निरालम्बा सर्वन्यायविरोधिनी । सहते न विचारं सा तमो यद्व-

मानं चात्र न जानामीत्यनुभूतिः श्रुतिस्तथा ।
आश्रयोऽस्य विशुद्धा चित् विषयश्चापि सा पुनः ॥ ११ ॥

द्दिवाकरम् " । तथा "दुर्घटत्वमविद्याया भूषणं न तु दूषणम् । कथञ्चिद्दृढमानत्वेऽविद्यात्वं दुर्घटं भवेत् " । इत्यादिना संक्षेपशारीरके । ननु श्रुतिप्रसिद्धस्य तादृशाज्ञानस्य व्योमादिरूपेण विततस्य सत्यवद्ब्रह्मसमानत्वेन चिदात्मवदनिवृत्तिः प्रसज्येत, तेन च संसारानिवृत्तिरपि प्रसज्येतेति चेत् । न । तत्प्रत्युत्तरार्थमेवाह—ज्ञानापनोद्यमिति । तादृशमप्यज्ञानमात्मयाथार्थ्यसाक्षात्काररूपात्, ज्ञानान्निवर्तत इत्यर्थः । अत्र नञो विरोधार्थं गृहीत्वा ज्ञानापनोद्यत्व इत्युक्तम् । अत्रैतत्सर्वं पिण्डीकृत्य इदमेव लक्षणं वक्तव्यं—अनिर्वचनीयत्वे सति तत्त्वावबोधप्रतिबन्धविपर्ययावभासहेतुत्वमज्ञानत्वमिति । संक्षेपेण चेत् लक्षणं वक्तुमिच्छसि, तदा मिथ्यात्वे सति साक्षाज्ज्ञाननिवर्त्यत्वम् । अनाद्युपादानत्वे सति मिथ्यात्वमिति वा वक्तव्यम् । ज्ञानेन इच्छाप्रागभावः साक्षान्निवर्तत इति तन्निरासाय मिथ्येति, अज्ञाननिवृत्तिद्वारा ज्ञाननिवर्त्यत्वेऽतिव्याप्तिवारणाय साक्षादिति, तथा शेषोक्तलक्षणे ब्रह्मनिरासार्थं मिथ्यात्वे सतीति, मृदादिनिरासार्थमनादीति, अविद्यात्मनोः सम्बन्धनिरासार्थमुपादानत्वे सतीति । इति तत्तत्पदव्यावर्त्यमुन्नेयम् ॥ १० ॥

उक्तलक्षणाऽज्ञानसद्भावे प्रमाणमाह पद्यार्धेन—मानं चात्रेति । चकारात् स्मृतिरपि समुच्चीयते । तथा च अहमज्ञो मामहं न जानामि इत्याद्यनुभव एव तादृशाज्ञानसद्भावे मानं प्रमाणम् । तथा श्रुतिस्मृती अपि—"देवात्मशक्तिं स्वगुणैर्निगूढाम्" इति श्रुतिः, "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" इति "नाहं प्रकाशः सर्वस्य योगमायासमावृतः" इति च स्मृतिः । न चाहमज्ञ इत्यनुभवस्य ज्ञानसामान्याभावविषयकत्वं वाच्यं, निर्विकल्पकघटितप्रतियोगिकस्य ज्ञानसामान्याभावस्य स्वात्मनि प्रत्यक्षत्वायोगात् । नापि भावरूपमप्यज्ञानं ज्ञानरूपे स्वात्मनि ग्रहीतुं न शक्यते विरोधादिति वाच्यम् । स्वप्रकाशसाक्षिचैतन्येन सह तस्य विरोधाभावात्, अन्तःकरणवृत्त्यैव तु तस्य विरोधात्, अहमज्ञ इत्यहङ्कारगर्भितोल्लेखस्य साक्षिप्रकाशिताऽज्ञानविषय एव विस्पष्टतरव्यवहारदर्शनाच्च । अत एव हि सवितरि दिवान्धपरिकल्पितान्धकारवदुरपह्नवमेवाहमज्ञ इत्यनुभवसिद्धमज्ञानमिति । अस्याश्रयविषयौ निर्दिशति पद्यशेषेण—आश्रय इति । चित् चैतन्यमित्यनर्थान्तरम् । विशुद्धा चित् अस्य अज्ञानस्य आश्रयो विषयश्चेत्यर्थः । विशुद्धत्वं निर्विशेषत्वं सर्वधर्मातीतत्वमिति यावत् ।

जीवब्रह्मविभागेऽपि हेतुत्वं चास्य कीर्तितम् ।
स्रष्टृत्वे ब्रह्मणो जीवकर्तृत्वेऽनादिमत्यपि ॥ १२ ॥

एतदेवोक्तं संक्षेपशारीरके "आश्रयत्वविषयत्वभागिनी निर्विशेषचितिरेव केवला" ॥ इति । न चाज्ञानस्यैकाश्रयविषयतानुपपत्तिः । तस्य तमोरूपत्वात् बाह्यतमोवदुपपत्तेः । तमोरूपत्वं चास्य श्रुतिस्मृतिपुराणादौ तमःशब्दपर्यायैर्व्यवहारात् । तथा च यथा बाह्यं तमः यदेव आश्रयति तदेवावृणोतीति दृष्टम्, तथाऽज्ञानमपि यत्र लब्धाश्रयं भवति तदेवावृणोतीति न काप्यनुपपत्तिः । वस्तुतस्तु अज्ञानस्य केवलजडवृत्तितानुपपत्तेश्चिदाश्रितत्वमप्यङ्गीकर्तव्यम् । तथा च वृद्धवचनं—"यस्याज्ञानं भ्रमस्तस्य भ्रान्तः सम्यक् करोति सः । जडं न विद्यावेद्यत्वान्नातोऽज्ञानं जडाश्रयम्" ॥ इति । न च चैतन्यस्य प्रकाशात्मकत्वेनाऽज्ञानाश्रयत्वं विरुध्यत इति वाच्यम् । अन्तःकरणपरिणामोपहितचैतन्यस्यैवाऽज्ञानविरोधित्वादित्याविदितं प्राक् । अत एव हि निरूपितस्वभावमेवाज्ञानं पण्डिताः "संसारदशायां चिदात्मन्यज्ञानदर्शनं प्रचण्डमार्तण्डमण्डले पेचकदृष्टान्धकारवदुरपह्नवमेव" इत्यनेनैव दृष्टान्तेनावबोधयन्तीति ॥ ११ ॥

अस्य जगत्कारणत्वादिनिर्वाहकत्वमाह—जीवेति । अनादिमति अपि जीवब्रह्मविभागे तथा ब्रह्मणो जगत्स्रष्टृत्वे जीवस्य चाहं कर्तेत्याद्यभिमानकर्तृत्वे अस्य सन्निहितोक्तस्याज्ञानस्य हेतुत्वं कारणत्वं कीर्तितमभिहितं वेदान्तविद्भिरिति योजना । चिन्निष्ठाज्ञानमेव जीवब्रह्मविभागे हेतुस्तथा ब्रह्मणो जगत्स्रष्टृत्वादौ हेतुस्तथा जीवस्य कर्तृत्वाद्यभिमानादौ हेतुरिति श्लोकपदानामर्थः । कचित् वेदान्ते जीवगतकर्तृत्वाद्यवभासहेत्वज्ञानमविद्याशब्देनोच्यते । अन्यन्मायाशब्देन । अनादिरपि जीवेश्वरविभागो न वास्तवः किन्तु मायिक एव सः । अज्ञानविकारत्वात् इत्यद्वैतवादिनां मतम् । न च जीवेश्वरविभागादेरनादित्वेनाजन्यत्वात् तत्र अज्ञानस्य कारणभावानुपपत्तिरिति वाच्यम् । अद्वयब्रह्मानवभासदशायामेव तेषामवभासनात् अज्ञानाधीनसत्ताकत्वाच्च तेनैव हि रूपेण तस्य तत्कारणतोपपत्तेः । किञ्च अनादित्वं तावद्द्विविधं, स्वरूपतः प्रवाहतश्च । आद्यमजन्यानां, द्वितीयं तु जन्यानाम् । तत्र महाप्रलयाङ्गीकारात् जीवब्रह्मविभागादेरनादित्वं प्रवाहत एवाभिमतम् । ततश्च महाप्रलयप्रवाहान्तर्गतमहाप्रलयव्यक्तीनां सादित्वमङ्गीकृत्य तत्तत्प्रलयावसानानन्तरकल्पप्रारम्भकाले पुनः प्रादुर्भूत जीवेश्वरविभागात्तस्य सादित्वमेव भण्यत इति नाज्ञानस्य कारणताक्षतिः ॥ १२ ॥

प्रकृतिः प्रलयावस्थाऽव्यक्तमव्याकृतं तथा ।
महासुषुप्तिः कूटस्थमक्षरञ्च तदुच्यते ॥ १३ ॥
तथा तमोऽनृतं माया निद्राऽविद्या गुणैक्यकम् ।
जडिमा च तमिस्रा च विष्णुशक्तिश्च गीयते ॥ १४ ॥
समष्टिव्यष्टिभेदेन तद्द्वैविध्यमिहोच्यते ।
तेनैवैकत्वनानात्वप्रयोगाणां व्यवस्थितिः ॥ १५ ॥
समष्टिस्त्वीश्वरोपाधिर्मायाशब्देन भण्यते ।
विशुद्धसत्त्वप्राधान्यमत्रोक्तं वेदवादिभिः ॥ १६ ॥

अस्य पर्यायानाह—प्रकृतिरिति । सर्वस्यास्य प्रपञ्चस्य मूलकारणत्वात्प्रकृतिर्मूलप्रकृतिरिति यावत् । प्रकर्षेण निरवशेषेण लीयन्ते सर्वाणि कार्याण्यस्मिन्निति प्रलयः । अविभक्तनामरूपादिरूपत्वात् अव्यक्तमव्याकृतं च । सर्ववृत्तिनिरोधरूपत्वान्महासुषुप्तिः । कूटवदविकृतरूपेण सदृशपरिणामितया तिष्ठतीति कूटस्थम् । ज्ञानं विना न क्षरतीत्यक्षरम् । तुच्छत्वादनृतम् । कार्यविश्रांतिरूपत्वान्निद्रा । विद्याविरोधित्वादविद्या । सत्त्वरजस्तमसां साम्यावस्थारूपत्वात् गुणैक्यं, गुणसाम्यमिति यावत् । प्रकाशतिरोधायकत्वात्तमस्तमिस्रा च । चिद्विलक्षणत्वात् जडिमा । विष्णोर्व्यापकस्य परमात्मनोऽधीनत्वात् विष्णुशक्तिरिति ॥१३॥१४॥

निरूपितमज्ञानमेकमनेकं वेति संशये समाधानार्थमाह—समष्टीति । समष्ट्यज्ञानं व्यष्ट्यज्ञानमित्यज्ञानद्वयं इह अस्मिन् वेदान्तशास्त्रे उच्यते व्यवस्थाप्यते । आचार्यैरिति पूरणीयम् । ततश्च एकत्वबोधकश्रुतीनां तथा नानात्वबोधकशास्त्राणां व्यवस्थितिरविरोधः स्यात् । समष्टिः समूहः । व्यष्टिरेकैकम् । समष्ट्यभिप्रायेणैकत्वव्यपदेशो व्यष्ट्यभिप्रायेण नानात्वव्यपदेश इति विवेकः "अजामेकां लोहितशुक्लकृष्णां" इत्येकत्वबोधकं शास्त्रम् "इन्द्रो मायाभिः पुरुरूप ईयते" इति तु बहुत्वबोधकं शास्त्रम् ॥ १५ ॥

समष्ट्यज्ञानं विवृणोति—समष्टिरिति । समष्ट्यज्ञानमीश्वरस्य सर्वनियन्तुरुपाधिः । सा समष्टिः मायाशब्देन भण्यते उच्यते । अत्र अस्यां अज्ञानसमष्टिरूपायां मायायां विशुद्धस्य रजस्तमोभ्यामकलुषीकृतस्य सत्त्वस्य प्राधान्यं प्राचुर्यं वेदवादिभिर्वेदान्तविद्भिरुक्तमभिहितम् । एतदेवोक्तं पञ्चदशीकारेण "मायाबिम्बो[1] वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः" इत्यादिना ॥ १६ ॥

---

१ मायाबिम्बः मायायां प्रतिबिम्बितं ब्रह्मचैतन्यम् । तां सोपाधिभूतां मायाम् वशीकृत्य तदधिष्ठातृत्वेनाविर्भूय । ईश्वरः सर्वनियन्ता सर्वज्ञश्च स्यादिति श्लोकार्थः ।

सा कारणशरीरं स्यादानन्दमयकोषकः ।
सुषुप्तिश्च लयस्थानमुत्कृष्टोपाधिरेव सा ॥ १७ ॥
जीवोपाधिस्तु तद्व्यष्टिस्तस्याः संज्ञाश्च पूर्ववत् ।
म्लानसत्त्वप्रधानाऽसौ निकृष्टोपाधितां गता ॥ १८ ॥
द्वेधा सूक्ष्मशरीरं स्यात् समष्टिःव्यष्टिभेदतः ।
समस्तं चैकबुद्धिस्थं समष्टिःस्यादरण्यवत् ॥ १९ ॥
भेदबुद्धिकृता व्यष्टिर्विज्ञेया वृक्षवत्तथा ।
समष्टिः सूक्ष्मदेहानामुपाधिः पद्मजन्मनः ॥ २० ॥
एतस्याश्च कृता संज्ञा वेदविद्भिस्त्रिसंख्यका ।
कोषः स्वप्नो लयस्थानं तद्व्यष्टेस्तु तथैव च ॥ २१ ॥

सेति । सा समष्ट्यज्ञानरूपा माया निखिलोपादानत्वात्तथा शीर्यमाणस्वभावत्वात् कारणशरीरं स्यात् । कारणशरीरमित्याख्यां प्राप्नोति इत्यर्थः । तथा आनन्दप्रचुरत्वात् कोषवदात्माच्छादकत्वाच आनन्दमयकोषः । कोष एव कोषकः । स्वार्थे कः । तथा सर्वोपरमत्वात् सुषुप्तिः, तथा व्यष्टिसमष्टिस्थूलसूक्ष्मशरीरलयाधारत्वात् लयस्थानं प्रलय इति यावत् । सा एव माया उत्कृष्टोपाधिः उत्कृष्टस्य ईश्वरस्य उपाधिरुपाश्रयः ॥ १७ ॥

जीवेति । तद्व्यष्टिस्तु व्यष्ट्यज्ञानं तु जीवोपाधिः, तस्याः पूर्ववत् संज्ञाः नामानि सन्ति । ताश्च संज्ञाः—कारणशरीरं प्राज्ञ आनन्दमयकोषः सुषुप्तिर्लयस्थानमिति च । असौ यतो निकृष्टस्य जीवस्य उपाधिभावं गता ततो म्लानसत्त्वप्रधाना मलिनसत्वाधिक्यवती । रजस्तमोभ्यामभिभूतसत्त्वेति यावत् । अत्रापि विद्यापनोद्यत्वेनाविद्येति, अहङ्कारादिकारणत्वेन शीर्यमाणस्वभावत्वेन च कारणशरीरमिति, आनन्दप्रचुरत्वेन कोषवदात्माच्छादकत्वेन चानन्दमयकोष इति, सर्वोपरमत्वात् सुषुप्तिरिति, व्यष्टिस्थूलसूक्ष्मलयाधारत्वात् लयस्थानमिति च कथ्यते । अस्यां चोपहितश्चिदात्मा प्राज्ञ इत्युच्यत इत्यग्रे वक्ष्यते तद्द्रष्टव्यम् ॥ १८ ॥

अज्ञानद्वयमुक्त्वा सूक्ष्मशरीरद्वयमाह—**द्वेधेति** । समष्टिसूक्ष्मशरीरं व्यष्टिसूक्ष्मशरीरं चेति सूक्ष्मशरीरद्वयमित्यर्थः । सदृष्टान्तं समष्टिव्यष्टिलक्षणमाह—**समस्तमिति** । निखिलसूक्ष्मशरीरमेकबुद्धिविषयत्वेन अरण्यवज्जलाशयवद्वा समष्टिः । तथानेकबुद्धिविषयतया वृक्षवज्जलवद्वा व्यष्टिश्च भवतीत्यर्थः । सूक्ष्मदेहानां समष्टिः पद्मजन्मनो हिरण्यगर्भस्योपाधिः,तत्रैव तस्याहमित्यभिमानित्वादिति ॥ १९–२० ॥

एतस्या इति । एतस्याः समष्टेस्त्रिसंख्यका संज्ञा कृता वेदविद्भिरिति योजना । ताः संज्ञाः कथयति—**कोष** इति । कोष इव कोष आत्माच्छादक-

तैजसोपाधितां तस्याः स्थूलेऽप्येवं विधिः स्मृतः ।
तत्समष्टिरुपाधिः स्याद्विराजो ब्रह्मणस्तथा ॥ २२ ॥
व्यष्टिःस्थूलशरीराणां विश्वोपाधिरितीर्यते ।
एतेषूपहिता चिद्यन्नामभाक् तच्च वक्ष्यते ॥ २३ ॥
शब्दार्थो द्विविधः प्रोक्तः शक्यो लक्ष्यस्तथैवच ।
शक्त्या समर्पितः शक्यो लक्ष्यो लक्षणया मतः ॥ २४ ॥

त्वात् । जाग्रद्वासनामयत्वात्स्वप्नः । समष्टिस्थूलप्रपञ्चलयाधारत्वात् लयस्थानमिति चोच्यते । कोषशब्दोऽत्र विज्ञानमयादिकोषत्रयपरोऽवगन्तव्यः । तद्वदेः व्यष्टि-सूक्ष्मशरीरस्य तथैव पूर्ववदेव संज्ञादिकमस्ति । तथा हि—निखिलसूक्ष्मशरीर-मनेकबुद्धिविषयतया जलवद्वृक्षवद्वा व्यष्टिर्भवति । स्थूलप्रपञ्चापेक्षया सूक्ष्मत्वात् शीर्यमाणस्वभावत्वाच्च सूक्ष्मशरीरम् । जाग्रद्वासनामयत्वात् स्वप्नः । व्यष्टिस्थू-लप्रपञ्चलयाधारत्वाच्च लयस्थानमिति ॥ २१ ॥

तैजसेति । तस्याः सूक्ष्मशरीरसमष्टेस्तैजसोपाधितामाहुर्विपश्चित इति शेषः । निखिलसूक्ष्मशरीरं तैजसस्य वक्ष्यमाणलक्षणस्योपाधिरिति यावत् । स्थूलेऽपि स्थूलशरीरेऽपि एवमित्थं विधिर्व्यवस्था । स्थूलशरीरमपि समष्टिव्य-ष्टिभेदेन द्विविधमित्यर्थः । तथा हि—जरायुजाण्डजस्वेदजोद्भिज्याख्यं चतुर्विध-सकलस्थूलशरीरम् वनवज्जलाशयवद्वा एकबुद्धिग्राह्यतया समष्टिः । अत्रापि सूक्ष्मशरीरापेक्षया स्थूलत्वात् शीर्यमाणस्वभावत्वाच्च स्थूलशरीरमिति विवेक्तव्यम् । अन्नविकारत्वात् कोषवदात्मन आच्छादकत्वाच्चान्नमयकोषः । स्थूलभोगायतन-त्वात् जाग्रदिति च संज्ञा भवति । तथा तत्समष्टिः स्थूलशरीरसमष्टिः विराजो विराडिति प्रसिद्धस्य ब्रह्मण उपाधिरिति योजना ॥ २२ ॥

व्यष्टिरिति । या स्थूलशरीराणां व्यष्टिः सा विश्वोपाधिः । विश्वसंज्ञकस्य जीवस्य उपाधिः । एतेषु वर्णितेषु उपाधिषु उपहिता चित् चिदात्मा यन्नाम-भाक् भवति तच्च वक्ष्यते अग्रे इति शेषः । एकाद्वयस्य ब्रह्मचैतन्यस्य वर्णितो-पाध्यनुसारेण यानि यानि नामानि व्यवहारार्थं कल्पितानि शास्त्रकृद्भिस्तानि तानि नामानि त्रिभेदसंज्ञाकथनावसरे वक्ष्यन्ते इति विस्पष्टार्थः ॥ २३ ॥

समष्टिव्यष्टिभेदेनाज्ञानद्वैविध्यमुक्त्वा सम्प्रति शब्दार्थस्यापि द्वैविध्यमाह—
शब्दार्थ इति । शब्दोऽत्र पदरूपः । पदात्मकशब्दश्रवणानन्तरं योऽर्थो बुद्धा-वुपारोहते स शब्दार्थः । पदार्थ इति यावत् । स च द्विविधः शक्यो लक्ष्यश्च ।

शक्तिरर्थेषु शब्दानां मुख्या वृत्तिरिहोच्यते ।
लक्षणा शक्यसम्बन्धः सा चात्र द्विविधा मता ॥ २५ ॥

तत्र शक्त्या समर्पितः शक्यः, पदनिष्ठशक्तिविषय इति यावत् । लक्षणया बोधितो लक्ष्यः, पदवृत्तिलक्षणाविषय इति यावत् । यश्च शक्यार्थः स वाच्यार्थो ज्ञेयः ॥ २४ ॥

शक्तिविषयः शक्य इत्युक्तम् । तत्र शक्यविशेषणीभूतां शक्तिं लक्ष्यविशेषणीभूतां च लक्षणामभिधातुमाह—शक्तिरर्थेष्विति । शब्दानां पदानां अर्थेषु मुख्या वृत्तिः शक्तिः । तथा शक्यसम्बन्धो लक्षणा । सा लक्षणा अत्र अस्मिन् दर्शने द्विविधा द्विप्रकारा । केवललक्षणा लक्षितलक्षणा च इत्यूह्यम् । अत्र पदानां कार्यान्वितेष्वेवार्थेषु शक्तिरिति प्राभाकराणां मतं, तन्निरासायोक्तमर्थेष्विति । लक्षणायामतिव्याप्तिनिवारणायोक्तं मुख्येति । मुख्या सम्बन्धव्यवधानं विना । साक्षादिति यावत् । अर्थेषु वृत्तिः अर्थविषयिणी वृत्तिः । यथा घटपदस्य पृथुबुध्नोदराद्याकृतिविशिष्टे वस्तुविशेषे वृत्तिः । शक्तिरियमस्मिन्मते नेश्वरेच्छा—अनेन पदेनायमर्थो बोद्धव्य इत्येवंरूपा, किन्तु पदार्थान्तरम् । न च मानाभावः । शक्तेः पदार्थान्तरत्वे दाहादिलक्षणकार्यानुपपत्तिरेव मानम् । प्रतिबन्धकाभावस्य त्वभावतया न हेतुत्वम् । दाहादिकार्यं वह्निनिष्ठस्वानुकूलशक्तिपूर्वकं कार्यत्वात् घटवदित्यनुमानमपि प्रमाणम् । उपलक्षणं चैतत् । "परास्य शक्तिर्विविधैव श्रूयते," "शक्तयः सर्वभावानाम्" इत्यादिश्रुतिस्मृतिवचनान्यपि पृथक्शक्तिसद्भावे प्रमाणानि । ननु सन्तु कारणेषु कार्यानुमेयाः शक्तयः, पदनिष्ठा शक्तिस्तु केन कार्येणानुमीयत इति चेत् । अत्रोच्यते । सापि तत्तत्पदजन्यपदार्थज्ञानरूपकार्यानुमेया । तथाहि-पदार्थज्ञानं पदनिष्ठस्वानुकूलशक्तिपूर्वकं पदजन्यपदार्थज्ञानरूपकार्यत्वादिति । ततश्च तादृशशक्तिविषयत्वं शक्यत्वमिति सिद्धान्तः । तच्च जातेरेव न तु व्यक्तेः । व्यक्तीनामानन्त्येन गौरवात् । तथाच गवादिपदस्य जातावेव शक्तिः, तद्विशिष्टलक्ष्ये तु लक्षणा । वृद्धा अप्याहुः "अनन्यलभ्यः शब्दार्थः" इति । यः अनन्यलभ्यः लक्षणादिना न लभ्यः स शब्दार्थः । शक्तिगम्य इत्यर्थः । ततश्च केवलस्य शक्तिगम्यत्वं विशिष्टस्य तु लक्षणागम्यत्वमित्यायातम् । शक्यसम्बन्धो लक्षणा इत्यत्र सम्बन्धपदं साक्षात्परम्परोभयपरम् । तत एव हि लक्षणाया द्वैविध्यलाभः । यत्र शक्यसाक्षात्सम्बन्धः तत्र केवललक्षणा । यत्र शक्यपरम्परासम्बन्धः तत्र लक्षितलक्षणा । यथा गङ्गायां घोषः प्रतिवसतीति वाक्ये गङ्गापदवाच्यभगीरथखातावच्छिन्नजलप्रवाहेण साक्षात्सम्बन्धवति तीरे

अज्ञानस्य तु शक्ती द्वे स्त इत्युक्तं मनीषिभिः ।
आवृतिश्चैव विक्षेपः क्रमाद्वे नामनी तयोः ॥ २६ ॥
अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः ।
किञ्च लोकयितुर्बुद्धिं प्रच्छाद्यात्मस्वरूपकम् ॥ २७ ॥
आवृणोतीति तत्त्वज्ञैरावृतिः शक्तिरुच्यते ।
विक्षेपशक्तिरुक्ता च भवनाद्बहुरूपतः ॥ २८ ॥

गङ्गापदस्य केवललक्षणा । यथा वा रेफद्वयशक्तस्य द्विरेफपदस्य भ्रमरपदघटित-परम्परासम्बन्धेन मधुकरे लक्षितलक्षणा । एवमस्मिन् दर्शने शक्तिर्लक्षणा चेति वृत्तिद्वयमेवाभिप्रेतम् । गौण्यास्तु पराभिमताया वृत्तेः लक्षितलक्षणायामेवान्तर्भावो द्रष्टव्यः । तत्त्वमस्यादिमहावाक्यवर्णनावसरे लक्षणायास्त्रैविध्यमभिहितमाचार्यैः । तच्चाग्रे व्याख्यास्याम इति ॥ २५ ॥

इदानीं जगत्कारणाज्ञानस्य शक्तिद्वयमाह—अज्ञानेत्यादिना पद्येन । आवरणानन्तरं विक्षेपस्य दृष्टत्वात् क्रमादित्युक्तम् । तथा चाज्ञानेनावृतायामेव रज्ज्वां सर्पो विक्षिप्यते सम्भाव्यते इत्यर्थः । विवृणोति—अन्तरिति । अज्ञानं यया शक्त्या दृक् दृशिरूपश्चिदात्मा, दृश्यं तत्प्रकाश्यं बुध्यादि, तयोर्भेदं आत्मान्यो बुद्धिरन्येत्यादिविधमावृणोति तथा शरीरात् बहिः सृष्टिरन्या, ब्रह्मान्यदिति भेदमावृणोति प्रच्छादयतीव सा शक्तिरावृतिरित्युच्यते तत्त्वज्ञैः । किञ्च या शक्तिः लोकयितुर्द्रष्टुर्दर्शनसाधनीं बुद्धिं प्रच्छाद्य स्वात्मनोऽखण्डसच्चिदानन्दात्मभावमावृणोति प्रच्छादयति स्वात्मस्वरूपप्रकाशं तिरोदधातीत्यर्थः, सा शक्तिरावृतिः, अत्रायमभिप्रायः—बृहतैव स्वल्पमावृतं भवतीति दृष्टं न तु स्वल्पेन बृहत् । तत्कथं ब्रह्म स्वापेक्षया अल्पेन अज्ञानेनावृतं स्यादिति भवति संशयः । तदुच्छेदाय किञ्चेत्यनेन लक्षणान्तरमुक्तम् । वस्तुतस्त्वज्ञानस्य मूर्तत्वामूर्तत्वाभ्यामनिर्वाच्यत्वान्न परिच्छिन्नत्वमवधार्यम् । परिच्छेद्यापेक्षयैव तस्याल्पत्वमात्रमुच्यते शास्त्रकृद्भिरिति न कश्चिद्दोषः, बुद्धिं प्रच्छाद्येत्यत्र बुद्धिशब्देन तदनुरक्तचैतन्यं लक्ष्यते । बुद्धेरज्ञानकार्यत्वेन तदावृतत्वानुपपत्तेः । एतदेवोक्तमभियुक्तैः—"घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा निष्प्रभं मन्यते चातिमूढः । तथा बद्धवद्भाति यो मूढदृष्टेः स नित्योपलब्धिस्वरूपोऽहमात्मा" ॥ इति । भवनाद्बहुरूपत इति । नानारूपेणानिर्वाच्यतया चाविर्भावादित्यर्थः । तथा चाज्ञानं यया शक्त्या स्वावृते वस्तुनि तद्विपरीतार्थं विक्षिपते सम्भावयत्युद्भावयति वा सा विक्षेपशक्तिरुच्यते । दृश्यते ह्यधिष्ठानस्वरूपविशेषानवधारणमात्रेणैव तत्र तद्विपरीतार्थ-

द्विधा कार्यविनाशः स्यान्निवृत्तिर्बाध एव च ।
सत्युपादानके चाद्या साकं तेन तथाऽपरः ॥ २९ ॥
निःश्रेयसद्वयं प्रोक्तं वेदान्तेषु मनीषिभिः ।
सर्वानर्थनिवृत्तिश्च परानन्दाप्तिरेव च ॥ ३० ॥
संशयोऽपि द्विधा प्रोक्तो मानमेयगतत्वतः ।
तथाऽसम्भावने द्वे स्तो मानमेयगते हि ते ॥ ३१ ॥

दर्शनमिति । शुक्तिरूप्यादिसादिकार्याध्यासोऽप्यनयैव रीत्या जायते इत्यवगन्तव्यम् । अत्र सिद्धान्तबिन्दुकार आह—द्विविधं ह्यावरणम् । एकमसत्तापादकमन्तःकरणावच्छिन्नसाक्षिचैतन्यनिष्ठं, अन्यदभानापादकं विषयावच्छिन्नब्रह्मचैतन्यनिष्ठम् । घटमहं न जानामीत्युभयावच्छेदकत्वेनानुभवात् । तत्राद्यं परोक्षापरोक्षसाधारणप्रमाणज्ञानमात्रेण निवर्तते । अनुमितेरपि वह्न्यादौ नास्तीति प्रतीत्यनुदयात् । द्वितीयं तु साक्षात्कारेणैव निवर्तते । यदाश्रयं यदाकारं ज्ञानं तदाश्रयं तदाकारमज्ञानं नाशयतीति नियमात् । परोक्षज्ञानस्य विषयेन्द्रियसन्निकर्षाभावेनाऽन्तःकरणमात्राश्रयत्वात् । अपरोक्षज्ञानस्यैव विषयेन्द्रियसन्निकर्षव्यापारजन्यत्वेन विषयान्तःकरणोभयनिष्ठत्वात् । तदुक्तमभियुक्तैः—"परोक्षज्ञानतो नश्येदसत्तावृतिहेतुता । अपरोक्षधिया नश्येदभानावृतिहेतुता"॥ इति । तेन अनुमानादावसत्तावरणनाशात् तद्व्यवहारः । "अभानावरणनिवृत्त्या च सोपाधिकसाक्षात्कारिभ्रमानिवृत्तेः" इत्यलमतिपल्लवितेन ॥ २६–२७–२८ ॥

नाशद्वैविध्यमाह—द्विधेति । कार्याणां जन्यानां घटपटादीनां नाशोऽदर्शनं द्विधा द्विप्रकारः । सति विद्यमाने एव उपादाने यः कार्यस्य नाशः अदर्शनं स निवृत्तिसंज्ञकः, यथा मुसलप्रहारेण घटादेर्नाशः । यत्रोपादानेन सह कार्यं निवर्तते तत्र तन्नाशो बाधसंज्ञकः, यथा शुक्त्यादिसाक्षात्कारानन्तरं तन्निष्ठाज्ञानेन सह कल्पितरूप्यादेरदर्शनाख्यो नाश इति नाशद्वैविध्यविवृतिः ॥ २९ ॥

निःश्रेयसेति । निरतिशयं श्रेयो निःश्रेयसम् । तच्च तत्त्वज्ञानफलम् । अन्यत् सुगममेव ॥ ३० ॥

संशयद्वयमाह पद्यार्धेन—संशय इति । मानमेयगतत्वत इति । प्रमाणगतत्वेन तथा प्रमेयगतत्वेनेत्येवं व्याख्यातव्यम् । संशयः उभयकोटिस्पृक् ज्ञानम् , यथा स्थाणुर्वा पुरुषो वेति । प्रकृते तु श्रुत्या कर्मैव बोध्यते उत ब्रह्म प्रतिपाद्यते इत्येवंरूपा चित्तवृत्तिः प्रमाणगतसंशयः । ब्रह्मैव जगत्कारणं उत प्रधानपरमाण्वादिकं जगत्कारणं इत्थम्भूता चित्तवृत्तिः प्रमेयगतसंशयः । संशयवदसम्भा-

भावना विपरीताख्या मानमेयाश्रिता द्विधा ।
स्थितास्थितप्रभेदेन प्रज्ञाद्वयमिहोच्यते ॥ ३२ ॥
निर्विकल्पसमाधिश्च सविकल्पस्तथाऽपरः ।
हानादानाद्विकल्पानां समाधिद्वयमिष्यते ॥ ३३ ॥

वनापि द्विविधेत्याह पद्यशेषेण । ब्रह्म यदि सिद्धं वस्तु तर्हि पृथिव्यादिवत्तस्य प्रमाणान्तरगम्यत्वम् । अतः कथं श्रुतेः सिद्धब्रह्मप्रतिपादकत्वं सम्भवति फलाभावादपि तन्न सम्भवतीति एवंविधा चित्तवृत्तिः, प्रमाणगतासम्भावना । तथा यल्लक्षणं कारणं तल्लक्षणं कार्यमिति दृष्टत्वात् ब्रह्मणो जगद्विलक्षणत्वेन स्थितत्वात् कथं तस्य जगत्कारणत्वं सम्भवति, न सम्भवत्येवेति एवंरूपा चित्तवृत्तिः प्रमेयगतासम्भावनेति स्थितिः ॥ ३१ ॥

असम्भावनावत् विपरीतभावनाया अपि द्वैध्यमाह पद्यार्धेन—भावनेति । मानमेयाश्रितां प्रमाणप्रमेयोभयगता । तथा हि—ब्रह्मणः सिद्धत्वेन श्रुतीनां तत्प्रतिपादकत्वे निष्फलत्वप्रसङ्गात् श्रुतयः कर्मप्रतिपादका एव न ब्रह्मपरा इति निश्चयः प्रमाणगता विपरीतभावना । तन्तुपटयोः कारणकार्ययोः सारूप्यं दृश्यते । जगद्ब्रह्मणस्तु सारूप्यं न दृश्यते । सारूप्याभावाच्च न ब्रह्म जगत्कारणं, किन्तु प्रकृत्याद्यन्यतममेव जगत्कारणमिति निश्चयः प्रमेयगता विपरीतभावना । एवं संशयादयोऽपि मानान्तरादावुन्नेयाः । तद्यथा—जगदन्तःपातिनि मयि जगद्विलक्षणब्रह्मत्वमस्ति न वेति प्रत्यगात्मविषयकः संशयः । कर्तृत्वाद्यनेकधर्मविशिष्टस्य मम अकर्तृब्रह्मस्वरूपत्वं कथं भवेत्, न भवत्येवेति निश्चयः प्रत्यगात्मविषयका असम्भावना । यद्यकर्ताहं तर्हि कथं मम शास्त्रैः "त्वया कर्म कर्तव्यम्" इति कर्मोपदेशः क्रियते । यतः शास्त्रं कर्तव्यतया मां प्रति कर्मोपदिशति ततः कर्तैवाहमिति निश्चयः प्रत्यग्विषयिणि विपरीतभावना । एवमन्यत् यथायथमूहनीयम् । अधुना प्रज्ञाद्वयमाह पद्यशेषेण । स्थितप्रज्ञा अस्थितप्रज्ञा चेति प्रज्ञाद्वयं इह अस्मिन् दर्शने प्रसिद्धम् । स्थिता ब्रह्माकारेण निश्चला प्रज्ञा बुद्धिः सा । बाह्यानवगाहिनीति यावत् । अस्थिता ईषत् प्रतिष्ठिता या प्रज्ञा बुद्धिः सा । अत्र योगारूढानां स्थितप्रज्ञा, आरुरुक्षुमुनीनामस्थितप्रज्ञा इति प्रज्ञाद्वयविवेकः । सांसारिकाणां तु तदुभयविलक्षणा मतिरित्यवगन्तव्यम् ॥ ३२ ॥

समाधिद्वयमाह—निर्विकल्पेति । व्युत्थानवृत्तितत्संस्कारयोरभिभवेन निरोधसंस्काराविर्भाववशात् चित्तस्य य एकाग्रतापरिणामः स समाधिरिति समाधिलक्षणम् । स च निर्विकल्पसविकल्पभेदेन द्विविधः । विकल्पो विशेषणं विभागो

विद्वद्विविदिषाभेदात्संन्यासद्वयमुक्तवान् ।
पर्यायांश्च श्रुतिः प्राह न्यासव्रज्यादिकानपि ॥ ३४ ॥

वा । निः नास्ति विकल्पो यत्र स निर्विकल्पः । विकल्पेन सह विद्यमानो यः सः सविकल्पः । तथा चाहं ब्रह्म जानामीत्यादिविशिष्टबुद्ध्यन्तर्गतज्ञातृज्ञानज्ञेयरूपाणां विकल्पानां हानात् परित्यागेन निर्विकल्पः, तथा आदानादपरित्यागेन सविकल्पः समाधिः स्यादिति समाधिद्वैविध्यमुच्यते वेदान्तिभिरिति शेषः। एतदेव द्वयं पातञ्जलादौ शास्त्रे यथाक्रममसम्प्रज्ञातसम्प्रज्ञातशब्देन परिभाष्यते । अत्रायं निष्कर्षः—निर्विकल्पसमाधिस्तावद्द्व्यवस्थः । दीर्घकालाभ्यस्तसविकल्पसमाध्यनुभवजनितसंस्कारसहकृतायाश्चित्तवृत्तेर्ज्ञात्रादित्रिपुटीलयपूर्वकमद्वैते ब्रह्मण्येकलीभावेनावस्थानं प्रथमावस्था, ततश्च तदभ्यासपाटवेन लुप्तसंस्कारतया ज्ञात्रादित्रिपुटीलयपूर्वकमखण्डाकाराकारितायाश्चित्तवृत्तेर्विनापि स्वस्फूर्तिं केवलचिदानन्दात्मकतया स्थितिप्रवाहो द्वितीयावस्था । अस्यामेवावस्थायां समाधेः पूर्णता भवति । एवं सविकल्पोऽपि द्व्यवस्थः । तत्र अहं ब्रह्मास्मीति शब्दानुविद्धतया अद्वैते ब्रह्मणि चित्तवृत्तेरवस्थानं प्रथमावस्था । ततश्च ज्ञातृज्ञानज्ञेयलयमनपेक्ष्यैव अहं ब्रह्मास्मीति शब्दाननुविद्धतया अद्वितीये ब्रह्मण्यविच्छेदेन चित्तवृत्तेरवस्थानं द्वितीयावस्था । अस्यामेवावस्थायां सविकल्पसमाधेः पूर्णता भवति । न चात्र ज्ञात्रादिभेदभानकत्वादद्वैतं ब्रह्म न भासत इति वाच्यम् । सुवर्णमयकुण्डलादिभानकाले सुवर्णभानवत् मृण्मयगजादिभानकाले मृद्भानवच्च तद्भानोपपत्तेः । यथा सुवर्णकारादिनिर्मिते सुवर्णकुण्डले, यथा वा कुम्भकारादिनिर्मिते मृण्मयगजे कुण्डलोऽयं गजोऽयं इत्यस्यां बुद्धौ कुण्डलाद्याकारोल्लेखेऽपि तथा गजाद्याकारोल्लेखेऽपि सुवर्णमात्रमेव तथा मृण्मात्रमेव सत्यं भासते, कुण्डलाद्याकारस्य तथा गजाद्याकारस्य कल्पितत्वेन मिथ्यात्वस्य निश्चयात् तथा ब्रह्मविषयकसविकल्पसमाधौ ज्ञात्रादिभानेऽपि तेषां कल्पितत्वेनैव मिथ्यात्वनिश्चयात् सत्यमेव ब्रह्माद्वैतं भासत एव । एवं निर्विकल्पकेऽपि समाधौ जलाकाराकारितलवणानवभासनेन जलमात्रावभासनवदखण्डब्रह्माकाराकारितचित्तवृत्त्यनवभासनेनाखण्डब्रह्ममात्रमवभासत एवेति नास्ति तत्तच्छङ्कावसरः ॥ ३३ ॥

संन्यासद्वयमाह—विद्वदिति । विद्वत्संन्यासो विविदिषासंन्यासश्चेति संन्यासद्वयम् । उक्तवान् आचार्य इत्युद्धृत्य योज्यम् । संन्यासो नाम विधिना सर्वकर्मपरित्यागः सर्वकर्मफलवर्जनं वा । अस्य न्यासः प्रव्रज्या चतुर्थाश्रम इत्येवमाद्याः पर्यायाः । अत्रायं विभागः—येन ब्रह्मविज्ञानलाभार्थं वैराग्यवता प्रेष-

मार्गौ तु द्वौ समाख्यातौ कर्मज्ञानवतां क्रमात्।
पितृपूर्वस्तयोरेको देवपूर्वस्तथाऽपरः ॥ ३५ ॥
अत्यन्तमलिनानां तु गतिर्नास्तीति कथ्यते।
तेषामेवेह तत्त्वज्ञैस्तृतीयं स्थानमुच्यते ॥ ३६ ॥
स्वरूपं च तटस्थं च ब्रह्मणो लक्षणं द्विधा।
इतरेणानिरूप्यं यत्तत्स्वरूपं प्रचक्ष्यते ॥ ३७ ॥

मन्त्रेणैव पुत्रवित्तादिपरित्यागः क्रियते तस्य विविदिषाख्यः संन्यासः। यस्तु गार्हस्थ्य एवोत्पन्नज्ञानः चित्तविश्रान्तिसिद्धये पुत्रकलत्रवित्तादिकं परित्यज्य दण्डकौपीनादिपरिग्रहं करोति तस्य विद्वत्संन्यासः। दण्डादिधारणं तु विद्वत्संन्यासिनामनियतं, विविदिषासंन्यासिनां तु नियतम्। दण्डादित्यागे तेषां प्रायश्चित्तश्रवणात्। अन्यदाश्रमचतुष्टयविवृत्यवसरे वक्ष्यामः॥ ३४ ॥

मार्गाविति। मार्गो यानः पन्था एते पर्यायशब्दाः। ज्ञानशब्दश्चात्रोपासनापरः। कर्मिण उपासकाश्च मृत्वा क्रमात् याभ्यां मार्गाभ्यां लोकान्तरं व्रजन्ति तयोर्मार्गयोरेकः पितृपूर्वः अपरश्च देवपूर्वः। पित्रमार्गो देवमार्गश्चेति यावत्। अत्र कर्मिणां पितृयानः पितृमार्गो वा पन्थाः, उपासकानां तु देवयानो देवमार्गो वेति विभागः। विभागश्च क्रमशब्दबलाल्लभ्यते। पितृयानस्य धूमादिमार्गो दक्षिणमार्गश्चेति संज्ञाद्वयमस्ति। तथा देवयानस्य अर्चिरादिमार्ग उत्तरमार्गश्चेति नामान्तरमस्ति। कर्मिणस्तावत् मृत्वा क्रमेण धूमरात्रिकृष्णपक्षदक्षिणायनपितृलोकचंद्रलोकं गच्छन्तीति तेषां पन्था धूमयानादिशब्देनोच्यते। ज्ञानिनस्तावत् अर्चिरहःशुक्लपक्षोत्तरायणदेवलोकादित्यलोकवैद्युतलोकब्रह्मलोकं क्रमेण प्राप्नुवन्तीति तेषां मार्गोऽर्चिरादिशब्देन आख्यायते। ये तु पुनरत्यन्तमलिनास्तामसाः पापिष्ठतमास्तेषां गतिरुक्तोभयोरेकापि नास्तीति कथ्यते। श्रुतिष्विति शेषः। ते उक्तोभयमार्गभ्रष्टा इति यावत्। अतस्तत्त्वज्ञैः ऋषिभिस्तेषामिहैव स्थानं अवस्थानम्। दंशमशकादिशरीरेण पुनः पुनर्जन्ममरणभाक्त्वमुच्यते। गत्यभावाच्च तेषां स्थानत्वमात्रमुक्तम्। तृतीयत्वं चास्योक्तमार्गद्वयापेक्षयेति बोद्धव्यमिति जीवानां गतिविवेक उक्तः॥ ३५-३६ ॥

सदृष्टान्तं ब्रह्मलक्षणद्वयमाह कारिकाद्वयेन—स्वरूपं चेत्यादिना। असाधारणो धर्मो लक्षणशब्दार्थः। तेनैव ह्यन्यस्मात् व्यावर्तते लक्ष्यम्। स्वरूपंस्वरूपलक्षणम्। तटस्थं तटस्थलक्षणम्। तत्र यदितरानिरूप्यं तत्स्वरूपलक्षणम्, स्वरूपमेव लक्षणं स्वरूपलक्षणमिति विग्रहः। यथा "सत्यं ज्ञानमानन्दं ब्रह्म"

यच्च व्यावर्तकं यावल्लक्ष्यकालं न तिष्ठति ।
तत्तटस्थं विजानीयाद्गन्धवत्त्वं यथा क्षितेः ॥ ३८ ॥
द्वे विद्ये वेदितव्येऽत्र परा चैवापरापि च ।
यया ब्रह्म विजानाति सा परा परिकीर्तिता ॥ ३९ ॥

इत्यत्र सत्यादिकं स्वरूपलक्षणम् । न च स्वस्य स्ववृत्तित्वाभावेन कथं लक्षणत्वमिति वाच्यम् । स्वस्यैव स्वापेक्षया धर्मिधर्मभावकल्पनया लक्षणत्वसम्भवात् । तदुक्तं पद्मपादाचार्येण—"आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्मा अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्ते" इति । अत्र केचित् सच्चिदानन्दात्मकमेकमेव लक्षणमाहुः । सत्यादिकं प्रत्येकमेव लक्षणमित्यपरे । यानि तु सर्वज्ञत्वसर्वेश्वरत्वादिकानि लक्षणानि तानि न स्वरूपलक्षणानि किन्तु तटस्थानि, तेषां प्रपञ्चोपाधिकत्वेनेतरनिरूप्यत्वात् ॥ ३७ ॥

तटस्थलक्षणं वर्णयति—यच्चेति । लक्ष्यकालं लक्ष्यावस्थितिकालमभिव्याप्य न तिष्ठति व्यावर्तकं च भवति तत् तटस्थं तटस्थलक्षणं विजानीयात्।यथा गन्धवत्त्वं क्षितेस्तटस्थलक्षणमिति योजना । तथा च यावल्लक्ष्यकालमनवस्थितत्वे सति व्यावर्तकत्वं तटस्थलक्षणत्वमिति तटस्थलक्षणवाक्यं सम्पद्यते । अत्र स्वरूपलक्षणेऽतिप्रसङ्गनिरासाय सत्यन्तम्। लक्ष्यावृत्तितादृशधर्मेऽतिव्याप्तिवारणाय व्यावर्तकमिति। यथेति स्पष्टप्रतिपत्त्यर्थमुदाहरणम्। परमते महाप्रलये परमाणुषु स्वपरोभयमते उत्पत्तिकाले घटादिषु गन्धाभावात्। ब्रह्मणि तु जगज्जन्मस्थितिलयकारणत्वं तटस्थलक्षणम् । एतच्च "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति" इति श्रुतावुक्तम् । प्रयन्ति प्रलयं गच्छन्ति सन्ति भूतानि यदभिसंविशन्ति प्रविशन्तीत्यर्थः। अत्रापि केचित् लक्षणत्रयमेवेदं परस्परनिरपेक्षं, अत एव "अत्ता चराचरग्रहणादि"त्याद्यधिकरणेषु सर्वसंहर्तृत्वादिकं प्रत्येकं ब्रह्मलिङ्गतयोपन्यस्तमित्याहुः । अन्ये तु "जन्मकारणत्वस्य स्थितिकारणत्वस्य च निमित्तकारणसाधारण्यात् उपादानत्वप्रत्यायनाय प्रपञ्चस्य ब्रह्मणि लयो दर्शितः । भवतु नाम ब्रह्म जगदुपादानं तथापि तज्जन्मनि घटजन्मनि कुलालवत् तत्स्थितौ राज्यस्थेम्नि राजवच्च उपादानादन्यदेव निमित्तं भविष्यतीति शङ्काव्यवच्छेदाय तस्यैव जगज्जन्मजीवननियामकत्वमुक्तम् । तथा चैकमेवेदं लक्षणमभिन्ननिमित्तोपादानतयाऽद्वितीयं ब्रह्म उपलक्षयतीत्युक्तम्" इत्याहुः ॥ ३८ ॥

द्वे विद्ये इति । परा विद्या अपरा विद्या चेति विद्याद्वयम् । तद्विवृणोति—ययेति । देवान् देवलोकान् चन्द्रादिलोकानित्यर्थः । कारणे कार्योपचारात्

अपरा सा समाख्याता यया देवान्व्रजन्ति हि ।
प्रथमोपनिषद्रूपा द्वितीया वेदलक्षणा ॥ ४० ॥
परापरविभेदेन ब्रह्मापि कथ्यते द्विधा ।
परं निर्गुणमाख्यातं सगुणं त्वन्यदुच्यते ॥ ४१ ॥
केचिदाहुस्तूलाऽविद्यां मूलाविद्या मतान्तरे ।
इति द्वित्वमविद्याया विज्ञेयं वेदपाठिभिः ॥ ४२ ॥
मुक्तिश्च द्विविधा ज्ञेया जीवतोऽजीवतोऽपि च ।
इति वेदान्तसंज्ञानां द्विभेदानां सुसंग्रहः ॥ ४३ ॥

३ अथ वक्ष्ये त्रिभेदानां संज्ञानां संग्रहं स्फुटम् ।
उपाश्रयभिदा त्रित्वं ब्रह्मणः परिचक्षते ॥ ४४ ॥

विद्याकारणोपनिषदाख्यस्य वेदभागस्यापि पराविद्यात्वं तथा कर्मप्रतिपादकवेदभागस्याप्यपराविद्यात्वमिति द्रष्टव्यम् ॥ ३९–४० ॥

परेति । परब्रह्म तथा अपरब्रह्म इति ब्रह्मद्वयम् । तद्विशदयति—**परमिति** । निर्गुणत्वं सर्वधर्मातीतत्वम् ॥ ४१ ॥

केचिदिति । तूलाविद्या नानाऽविद्या । जीवोपाधिभूता अविद्या नाना एवेति केचिदाहुः । अन्ये त्वाहुरेकैवाऽविद्या तस्यावरणशक्तयो नानेति मतद्वयमनुसृत्याऽविद्याद्वयमुक्तम् ॥ ४२ ॥

मुक्तिरिति । जीवतः अजीवतश्चेति छेदः । तथा च जीवन्मुक्तिर्विदेहमुक्तिश्चेति मुक्तिद्वयम् । मुक्तिर्मोचनं संसारबन्धनादिति मुक्तिशब्दव्युत्पत्तिः । जीवतो मुक्तिर्जीवन्मुक्तिः । तथा अजीवतो विगतदेहस्य मुक्तिर्विदेहमुक्तिरिति समासविग्रहः । अखिलबन्धरहितत्वे सति प्रारब्धकर्ममात्रशेषत्वे च सति वेदान्तवेद्यब्रह्मात्मनावस्थितत्वं जीवन्मुक्तत्वम् । विदेहमुक्तिस्तु जीवन्मुक्तस्यैव देहपातानन्तरं सिध्यतीति जीवन्मुक्तलक्षणविशेषणभागमपनीय तल्लक्षणं वक्तव्यम् । ततश्च वेदान्तवेद्यब्रह्मात्मस्वरूपेणावस्थितत्वं विशुद्धचिन्मात्रस्वरूपप्रतिष्ठितत्वं वा विदेहमुक्तत्वमिति तल्लक्षणं निष्पद्यते । ब्रह्मसंस्था ब्रह्मनिष्ठता स्थितप्रज्ञा अपरामुक्तिश्चेति जीवन्मुक्तेः संज्ञाः । विदेहमुक्तेस्तु कैवल्यं अमृतत्वं निर्वाणं परामुक्तिरित्येवमाद्याः संज्ञाः सन्ति । इति इत्थं द्वौ भेदौ यासां तासां वेदान्तविदितसंज्ञानां सुसङ्ग्रहः शोभनं यथा स्यात्तथा सङ्ग्रहः सङ्कलनं त्रिचत्वारिंशत्कारिकाभिः कृत इति योजनीयम् ॥ ४३ ॥

अथेति । द्विभेदसंज्ञासङ्ग्रथनानन्तरमित्यर्थः । उपाश्रयः उपाधिः । परि-

विराड्ढिरण्यगर्भश्च परमेश्वर इत्यपि ।
इति ब्रह्मत्रयं वेदे पुराणादावपि स्फुटम् ॥ ४५ ॥
विराट् स्यान्निखिलस्थूलशरीरोपाधिभिश्चितिः ।
वैश्वानरविराजौ चेत्यस्य नामान्तरं जगुः ॥ ४६ ॥
हिरण्यगर्भ इत्युक्तः समस्तैः सूक्ष्मदेहकैः ।
सूत्रात्मा च तथा प्राण इत्यसौ व्यपदिश्यते ॥ ४७ ॥
मायोपाधिकचैतन्यमीश्वरं प्राहुरव्ययम् ।
सर्वान्तर्याम्यसौ देवोऽव्याकृतो विश्वकारणम् ॥ ४८ ॥

च्छेदकल्पनाया हेतुरुपाधिः । एकाद्वयस्यापि ब्रह्मण उपाधिभेदेन त्रित्वं संज्ञात्रयवत्त्वं परिचक्षते शास्त्रकारा इत्यूहितव्यम् ॥ ४४ ॥

तान्भेदान् नामतो निर्दिशति—विराडिति । विराट् इत्येको भेदः । हिरण्यगर्भ इति द्वितीयः । ईश्वर इति तृतीयः । इति अनेन प्रकारेण वेदान्ताख्ये शास्त्रे तथा पुराणादावपि स्फुटं यथा स्यात् तथा ब्रह्मत्रयमुच्यते । विराडादिनामकारणान्याह—विराट् स्यादिति । चितिरपरिच्छिन्नस्वभावं ब्रह्मनामकं चैतन्यं समष्टिस्थूलशरीरोपाधिभिः कृतपरिच्छेदा तत्सर्वाभिमानितया च तत्तदुपाधिषु राजमानतया च विराडिति संज्ञामाप्नोतीत्यर्थः । विविधं राजत इति विराट् । उपाधीनां विविधत्वात् अस्य राजमानतापि विविधेति तात्पर्यार्थः । तथा विश्वेषु समस्तेषु नरेष्वहमित्यभिमन्यत इति वैश्वानरः । विशेषेण विस्पष्टतया वा राजते भासत इति विराजः । एतत्त्रिनामकं विराडाख्यं ब्रह्म क्वचित् मूर्तब्रह्मेत्याख्यायते ॥ ४५–४६ ॥

हिरण्यगर्भ इति । समस्तैः सूक्ष्मदेहकैः कृतपरिच्छेदं तदेव ब्रह्मचैतन्यं समष्टिसूक्ष्मशरीरोपाधिकचैतन्यमिति यावत्, हिरण्यगर्भ इति नाम्ना उक्तः । असौ हिरण्यगर्भः सूत्रात्मनाम्ना तथा प्राणनाम्ना च व्यपदिश्यते । ज्ञानशक्तिमत्त्वात् हिरण्यगर्भः । हिरण्यं ज्ञानं गर्भे यस्येति विग्रहः । मालासूत्रवत् समस्तप्रपञ्चानुस्यूतत्वात् सूत्रात्मा । क्रियाशक्तिमत्त्वाच्च प्राण इति विवेकः । एतत्त्रिनामको हिरण्यगर्भः क्वचित् अमूर्तब्रह्मेति परिभाष्यते ॥ ४७ ॥

मायोपाधिकेति । समष्ट्यज्ञानं मायेति प्रागावेदितम् । तथा च समष्ट्यज्ञानोपाधिकचैतन्यं, मायाशबलं ब्रह्मेति यावत्, ईश्वरं प्राहुः श्रुतयः । ईशनात् सृष्ट्यादिनियमनादीश्वर इति तस्य तथा संज्ञेत्यर्थः । असौ देवः देवनात् द्योतनाद्वा देवः ईश्वरः सर्वान्तर्यामी तथा अव्याकृतः तथा विश्वकारणं जगत्कारण-

न व्यज्यते प्रमाणेन ततोऽव्यक्तममुं जगुः ।
कचिन्मूर्तममूर्तं चाव्याकृतं च क्रमाद्विदुः ॥ ४९ ॥
व्यष्टिस्थूलाद्युपाधित्वादेकोऽप्यात्मा यथाक्रमम् ।
विश्वश्च तैजसश्चेति प्राज्ञश्च परिभाष्यते ॥ ५० ॥
विश्वादौ व्यवहारः स्याज्जीवत्रयमिति क्वचित् ।
विश्वस्य तु चिदाभासस्तथा च व्यावहारिकः ॥ ५१ ॥
तैजसस्य तु नामानि त्रीणि स्युः प्रातिभासिकः ।
स्वप्नश्च कल्पितश्चेति प्राज्ञस्य नामनी शृणु ॥ ५२ ॥

मित्याख्यायते । प्रमाणेन साक्षादिन्द्रियवृत्त्या न व्यज्यते ततः अमुं देवमीश्वरं अव्यक्तं जगुः गीतवन्तः, कथयन्ति पण्डिता इत्यर्थः । सर्वप्राणिहृदयनिष्ठत्वे सति समस्तप्राणिकर्मप्रेरकत्वात्सर्वान्तर्यामी तथा रूपरहितत्वादव्याकृतः तथा सकलाज्ञानतत्कार्यावभासकत्वात् विश्वकारणं विश्वस्य जगतः कारणमिति निर्वचनानि । अत्र विराडादित्रिविभागस्थले केचिदाचार्याः मूर्तं अमूर्तं अव्याकृत-श्चेति त्रिभागं वदन्ति । तत्रापि मूर्तं विराट्, अमूर्तं हिरण्यगर्भः, अव्याकृत ईश्वर इति संगमनीयम् । ४८—४९ ॥

ब्रह्मत्रयं निर्वर्ण्य जीवत्रयं वर्णयितुमाह—व्यष्टीति । यद्यप्येक एव आत्मा तथापि सः व्यष्टिस्थूलाद्युपाधिवशात् यथाक्रमं विश्वादिशब्देन परिभाष्यते । विश्वादिशब्देन सङ्केत्यत इत्यर्थः । स्थूलादीत्यादिशब्दात् सूक्ष्मकारणयोर्ग्रहणम् । तथा च व्यष्टिस्थूलशरीरोपाधिको विश्वः । व्यष्टिसूक्ष्मशरीरोपाधिकस्तैजसः । व्यष्टिकारणोपाधिकः प्राज्ञ इति तिस्रः संज्ञाः । कारणमज्ञानम् । क्वचित् वेदान्ते विश्वादौ विश्वतैजसप्राज्ञेषु जीवत्रयमिति व्यवहारो दृश्यते । एतच्च जाग्रत्स्वप्नसुषुप्त्यवस्थाभेदादित्यवगन्तव्यम् । तु पुनः विश्वस्य विश्वसंज्ञकस्यात्मनोऽन्यत् संज्ञाद्वयमस्ति । चिदाभासस्तथा व्यावहारिकः । एतयोरिदं निर्वचनम् । स्थूलसूक्ष्मकारणशरीराऽसमस्ताभिनिविष्टत्वात् तथा सूक्ष्मशरीरमपरित्यज्य स्थूलशरीरप्रवेष्टृत्वात् विश्वव्यवहारनिर्वाहकत्वात् व्यावहारिकः । चिद्वदवभासमानत्वे सति चिल्लक्षणसहितत्वात् चिदाभास इति विश्वादिनामनिरुक्तिः । ५०—५१ ॥

तैजसश्चेति । तैजसस्य तु त्रीणि नामानि स्युः भवन्तीत्यर्थः । प्रातिभासिकः स्वप्नः कल्पितश्चेति त्रीणि नामानि । तेजोमयान्तःकरणवृत्तिविशिष्टत्वात् तेजसि वासनायां अहं ममाभिमानितया वृत्तत्वाद्वा तैजसः । प्रतिभासकालमात्रेऽवस्थितत्वात् प्रातिभासिकः । प्रतिभासः स्वप्नः । अज्ञानकार्यनिद्राशक्तिक-

पारमार्थिक इत्येकं तथाऽवच्छिन्न इत्यपि ।
दृक्तत्त्वमेवं व्याख्यातं वेदान्तेषु विपश्चिता ॥ ५३ ॥
ब्रह्मकोटिगताः संज्ञाः इमाः स्युः सर्वविश्रुताः ।
तुरीयमीशः साक्षी च परमात्माऽक्षरस्तथा ॥ ५४ ॥
कूटस्थो जगदाधारो निषेधावधि चेत्यपि ।
बृहत्त्वात् बृंहणत्वाद्वा ब्रह्मसंज्ञा प्रवर्तते ॥ ५५ ॥
बृहत्त्वं व्यापकत्वं स्याद्वृद्धिहेतुस्तु बृंहणम् ।
अपेक्षया विराडादेस्तुरीयमिति चोच्यते ॥ ५६ ॥
विश्वस्यास्य नियन्तृत्वादीशः स्यादीश्वरस्तथा ।
साक्षी स्यादीक्षणात्साक्षादक्षरो नित्यभावतः ॥ ५७ ॥

ल्पितत्वात् स्वप्न इति कल्पित इति च व्यपदेशः । एवं प्राज्ञस्य तु नामद्वयमस्ति । पारमार्थिक इत्येकं नाम, तथा अवच्छिन्न इत्यपरम् । अत्रैवं निरुक्तिः–शरीरद्वयोपादानव्यष्ट्यज्ञानतत्कार्यावभासकत्वादस्पष्टोपाधितया चानतिप्रकाशकत्वात् प्रज्ञारूपचैतन्यप्रधानत्वाच्च प्राज्ञः । अवस्थात्रयेऽप्यनुस्यूततया विद्यमानत्वात् पारमार्थिकः । अविद्याहङ्कारदेहाद्युपाधिपरिच्छिन्नत्वेन भासमानत्वादवच्छिन्न इति । एवमित्थं दृक्तत्वं आत्मतत्वं व्याख्यातं विपश्चिता आचार्येण । अत्रेदमवधेयम् । यदेव नित्योदितचैतन्यं पूर्वं दृक्पदार्थतया उक्तं तदेव समष्टिस्थूलसूक्ष्मकारणशरीरोपाधिषु विराडादिनामभाक् तथा तदेव व्यष्टिस्थूलसूक्ष्मशरीरोपाधिषु विश्वादिनामभाक् इति ॥ ५२–५३ ॥

एकस्य दृक्पदार्थस्य समष्टिव्यष्ट्युपाधिकृता द्वयीकोटिः प्रदर्शिता । एका ब्रह्मकोटिः, द्वितीया जीवकोटिः । तत्र या ब्रह्मकोटिगाः संज्ञाः वेदान्तादिशास्त्रे प्रसिद्धास्ताः संक्षेपेणाह–तुरीयमिति । अपिशब्दात् शान्तं शिवमद्वैतमित्याद्याः संज्ञाः समुचिताः इति द्रष्टव्यम् । ब्रह्मादीनां संज्ञानां प्रवृत्तिनिमित्तान्याह–बृहत्त्वादित्यादि सार्धचतुष्टयपद्येन । दृक्पदार्थश्चैतन्यमेव वृद्धौ चराचराणामुपचये शरीरवृध्यादौ वा हेतुः कारणं, अतो ब्रह्मेति संज्ञा । विराड्हिरण्यगर्भेश्वरापेक्षया चतुर्थत्वात् तुरीयं तुर्यमित्यपि संज्ञा ॥ ५४–५५–५६ ॥

विश्वस्येति । विश्वनियन्तृत्वात् ईश ईश्वरश्च । ईश नियमने धातुः । साक्षीति । ईश्वरो मायोपहितमेवेश्वरनामकं चैतन्यं स्वोपाधिभूताया मायायाः साक्षादीक्षणात् विनैव वृत्तिव्यवधानमपरोक्षतया दर्शनात् प्रकाशनादिति यावत् ।

परमत्वात्तथात्मत्वात् परमात्मा निगद्यते ।
आश्रयत्वाच्च जगतो जगदाधार उच्यते ॥ ५८ ॥
निषेधमुखवृत्तीनां श्रुतीनामवधित्वतः ।
निषेधावधिभूतं स्यात् कूटस्थो निर्विकारतः ॥ ५९ ॥
अथ वक्ष्ये जीवकोटिगताः संज्ञा यथोदिताः ।
प्रत्यगात्मा शरीराणामधिष्ठानं तथाऽक्षरः ॥ ६० ॥
जीवः साक्षी च कूटस्थश्चिच्चैतन्यं चितिस्तथा ।
पुरुषश्च प्रमाता च प्राणी देही च पूरुषः ॥ ६१ ॥

साक्षीत्युच्यते । दृष्टं हि लोके औदासीन्यबोधाभ्यामेव साक्षित्वमिति । नित्यभावतः नित्यत्वात् क्षयोदयरहितत्वादिति यावत् ॥ ५७ ॥

परमत्वादिति । आत्मत्वं नित्यप्राप्तत्वं सदोदितचैतन्यरूपत्वमिति यावत् । अत सातत्यगमने धातुः । यश्च क्वचिदपि नाभावप्रतियोगी बोधरूपश्च स आत्मा । तस्यैव नित्यप्राप्तत्वात् । परमत्वं स्वाश्रितमायाशक्तिद्वारा सृष्टिस्थितिप्रलयकर्तृत्वम् । उपाधेरवशीभूतत्वेन सर्वोत्कृष्टत्वं वा । आश्रयत्वं अधिष्ठानत्वं, जगदधिष्ठानत्वमित्यर्थः ॥ ५८ ॥

निषेधेति । निषेधमुखेन वृत्तिर्बोधकता यासां तासां "नेति नेत्यात्मा" "अनण्वह्रस्वमदीर्घं" इत्यादिश्रुतीनां अवधित्वतः अवधित्वात् तात्पर्यपर्यवसानभूमित्वात् वेदान्तिनां नये शास्त्रे निषेधावधिभूतं जगन्निषेधावधिभूतमिति यावत्, संज्ञा जातेति योजना । अत्र परमात्मन इति सम्बन्धिपदं तथा जातेति क्रियापदमुद्धृत्य योज्यम् ॥ ५९ ॥

अथेति । अथ ब्रह्मकोटिगतसंज्ञाकथनानन्तरं जीवकोटिगता यथोदिताः वेदान्तेषु यथावस्थिताः संज्ञा वक्ष्ये इत्यन्वयः । वक्ष्ये इति वर्तमानसामीप्ये लृट् । प्रत्यक् इति एका संज्ञा, आत्मा इत्यपरा । प्रत्यगात्मा इत्यप्येकसंज्ञानिर्देशः । शरीराणां शरीरत्रयाणां स्थूलसूक्ष्मकारणानां अधिष्ठानं आश्रयः । ततश्च शरीरत्रयाधिष्ठानमिति संज्ञापि ॥ ६०–६१ ॥

---

१ साक्षी तावद्द्विविधः । जीवसाक्षी तथा ईश्वरसाक्षी । तत्र अन्तःकरणोपहितचैतन्यं जीवसाक्षी तथा मायोपहितचैतन्यमीश्वरसाक्षीति वेदान्तपरिभाषादौ निर्णीतम् । अकर्तृत्वे सति द्रष्टृत्वमिति साक्षिलक्षणं उभयत्रैव वर्तते । उभयत्रैव उपहितस्य आत्मचैतन्यस्य असङ्गोदासीनप्रकाशरूपत्वस्य तुल्यत्वादिति विज्ञेयम् ।

अञ्चति प्रतिलोमेन यतोऽतः प्रत्यगुच्यते ।
सातत्यगमनादात्मा गमनं ज्ञप्तिरुच्यते ॥ ६२ ॥

अभिहितसंज्ञाप्रवृत्तौ निमित्तान्याह—अञ्चतीत्यादिना पद्यपञ्चकेन । प्रातिलोम्येन अनृतजडदुःखात्मकाहङ्कारादिभ्यो वैलक्षण्येन सच्चिदानन्दात्मकतया अञ्चति प्रकाशत इति प्रत्यक् । तथा चाहङ्कारो नात्मा, देहो नात्मा, इन्द्रियाणि नात्मा, इत्येवं निष्कृष्टाहङ्कारादिचैतन्यं प्रत्यगित्युच्यते । तदेवाहं प्रत्ययालम्बनत्वादात्मा । अतति सातत्येन गच्छति जानातीत्यात्मा । "सर्वे गत्यर्थाः प्राप्त्यर्था ज्ञानार्थाश्चे"ति वृद्धानां वचनादततेर्ज्ञानार्थता । तथा च निरुपाधिचैतन्यमेवात्मनः स्वरूपं, तच्च प्रतिशरीरं बुद्ध्यादिभिः परिच्छिन्नमिव सत् प्रत्यगिति वेदान्तमतम् । नन्वात्मनश्चित्स्वरूपत्वमसिद्धम् । सङ्गिरन्ते हि वादिनश्चिज्ज्ञानमित्यनर्थान्तरं, तच्चात्मवृत्तिकमिन्द्रियार्थसन्निकर्षजं विरोधिज्ञानादिनाश्यं चेति । तथा च ज्ञानस्योत्पत्तिविनाशशालित्वेनानित्यत्वात् तत्स्वरूपत्वे त्वात्मनोऽप्यनित्यता, तथा ज्ञाननानात्वेन चात्मनोऽपि प्रतिक्षणमन्यथान्यथापत्तिश्च स्यात् । न चेष्टापत्तिः । कृतहानाकृताभ्यागमादिदोषप्रसङ्गात् । नित्यश्चैकश्चात्मा, ज्ञानमनित्यमनेकं चेति नित्यानित्ययोरेकानेकयोरेकभावानुपपत्तेर्घटज्ञानवानहमिति ज्ञानाश्रयत्वेनैवात्मनो भानाच्च ज्ञानगुणक एवात्मेत्यवसीयते । अत्रोच्यते—नहि चैतन्यमेव मुख्यं ज्ञानम् । तस्य तद्भास्यत्वेन तद्विलक्षणत्वात् । प्रसिद्धश्च भास्यभासकयोर्भेदः । ज्ञानं हि नाम घटपटाद्यंशे जातमिति साक्षादनुभूयते, न तु तत्र चैतन्यं जातमित्यनुभूयते । चैतन्यं तु तत्र साक्षी । ज्ञानमप्यसाक्षिकं नाभ्युपेयते प्रामाणिकैः । अतोऽन्तःकरणपरिणतिविशेषो ज्ञानं वृत्त्याह्वयं, चैतन्यं तु ततोऽन्यत्तदवभासकम् । ततश्च ज्ञानस्यागन्तुकत्वे नानात्वेऽपि च चैतन्यस्यागन्तुकता नानारूपता वा न किमपि प्रसज्यते । यदुक्तं ज्ञानाश्रयत्वेनात्मनो भानमिति तदपि न साधु मन्ये । ज्ञानभिन्नस्य ज्ञानकर्मत्वेनैवापरोक्षत्वनियमात् । नाप्यात्मा नित्यानुमेयोऽसन्दिग्धत्वात् । नहि कदाचिदपि कोऽप्यात्मवानहमस्मि नास्मि वेति सन्दिह्यते । अतः सिध्यत्येवात्मनश्चिद्रूपत्वं स्वप्रकाशत्वं चेति। सन्ति च श्रुतयः स्वप्रकाशत्वसाधिकाः परप्रकाशतानुमानविरोधिन्यः "न विज्ञातेर्विज्ञातारं विजानीयाः," "विज्ञातारमेव केन विजानीयाः," "अत्रायं पुरुषः स्वयंज्योतिः" इत्याद्याः । प्रसङ्गाच्चात्रैवात्मनः किंपरिमाणकता चिन्त्यते । आत्मा नाणुपरिमाणवान्, शरीरव्यापिचैतन्यानुपलम्भप्रसङ्गात् । नापि मध्यमपरिमाणः, तस्य सावयवत्वेनानित्यत्वप्रसङ्गात् । परिशेषात् सतस्तावदख-

नाऽसौ क्षरत्यवस्थासु यतोऽतोऽक्षरनामभाक् ।
प्राणान्धारयतीति जीवसंज्ञामुपेयिवान् ॥ ६३ ॥

ण्डब्रह्मात्मभावात् "स वा एष महान् अज आत्मा" इत्यादिश्रुतेश्च परममहत्परिमाणएवात्मेति स्वीकर्तव्यमेव । एतदेवाह—नासाविति । यतः असौ अवस्थासु जाग्रत्स्वप्नसुषुप्तिनामकासु न क्षरति एकरूपतया तत्सर्वानुस्यूततया च तिष्ठति ततोऽक्षरनामभाक् भवतीति शेषः । अयमभिसन्धिः—जाग्रति तावच्चिदात्मा विषयेन्द्रियसन्निकर्षजनितान्तःकरणवृत्तिसमारूढः स्थूलानेव विषयान् घटपटादीन् तत्तदाकारधारिण्यश्च ज्ञानाख्यान्तःकरणवृत्तीरवभासयति । तत्र विषयाकारान्तःकरणवृत्तौ ज्ञानत्वव्यवहारः, वृत्त्यवभासे तु ज्ञाततान्यवहारः । वृत्त्यवभासः वृत्तेरपि प्रकाशः । सच साक्षिरूपेणात्मचैतन्येन सम्पद्यते । इयं ज्ञाततावादिभिरनुव्यवसायशब्देनोच्यते । यथा जाग्रति तथा स्वप्नेऽपि । तत्र हि तावच्चिदात्मा जाग्रत्संस्कारजनितान्तःकरणिकविषयाकारपरिणतिमात्रं जानाति । निवृत्तेन्द्रियव्यापारवत्त्वात् । एवं सुषुप्तावप्युत्थितस्य सुखमहमस्वाप्सं प्रसन्नं मे मनः, दुःखमहमस्वाप्सं स्त्यानं मे मनः, गाढमूढोऽहमस्वाप्सं क्लान्तं मे मनः, एवमाद्यभिलापदर्शनात् तदानीं मनोव्यापाराभावात् निर्विकल्परूपा एव सुखदुःखमोहवृत्तय आविद्यकाः स्वादृष्टवशादुद्भूतास्तेनैवात्मचैतन्येन साक्षिरूपिणा प्रकाशिता इत्यनुमीयते । यथैकस्मिन् दिवसेऽवस्थात्रयद्रष्टुरेकत्वमेकरूपत्वं च तथा दिनान्तरे मासाद्यन्तरेऽपीति । घटज्ञानानन्तरं पटज्ञानं पटज्ञानानन्तरं कुड्यज्ञानमित्येवंक्रमेणान्तःकरणात् विच्छिद्य विच्छिद्य उद्गच्छतां वृत्तिज्ञानानामन्तरालमपि सह वृत्त्यभावैः स एवात्मा सर्वसाक्षी प्रकाशयति । तत एव हि अहङ्कारादीनामात्मप्रकाशसंसर्गात् संशयाद्यगोचरत्वमिति । अत एव सिद्धमात्मनः सर्वदा सर्वास्वेवावस्थासु सर्वबुद्धेः प्रतिसंवेदित्वं, तस्मादपि च सिद्धं तस्यैकत्वमक्षरत्वं चेति । प्राणान् वायुभेदान् इन्द्रियाणि वा । जीव प्राणधारणे धातुः ॥ ६२–६३ ॥

---

१ अस्मिन् पादे एकाक्षरन्यूनत्वेन छन्दोभङ्गो दृश्यते । २ अत्र तदानीमहं निद्राक्रान्त आसं, इदानीं जागर्मि इत्याद्यनुभवबलादवस्थात्रयद्रष्टुरात्मन एकत्वमेकरूपत्वं चावधार्यत इत्यभिसन्धिः । ३ अन्तरालत्वसाम्यात् सन्दिग्धसाध्यवत्तया जन्ममरणयोरन्तरालमपि पक्षीकृत्य प्रकल्पितेनैव सदातनत्वादिना हेतुना तत्रापि चैतन्यरूपस्यात्मनोऽक्षरत्वादि कमनुमातव्यम् ।

व्यवधानं विनाऽध्यस्तानपरोक्षतया यतः ।
ईक्षते ऽसौ ततः साक्षी कूटस्थो बुद्धिसंज्ञितः ॥ ६४ ॥
निरपेक्षप्रकाशत्वाच्चिच्चितिश्चेति नामनी ।
बुद्धिमुद्दीपयन्नेव चेतनाख्यामगादसौ ॥ ६५ ॥
शयनाद्बन्धनाद्वापि पूर्षु पूरुषपूरुषौ ।
प्रमाश्रयः प्रमातासौ प्राणी च प्राणधारणात् ॥ ६६ ॥
सामानाधिकरण्यं च विशेषणविशेष्यता ।
लक्ष्यलक्षणसम्बन्धः पदार्थः प्रत्यगात्मनाम् ॥ ६७ ॥

व्यवधानमिति । विनैव वृत्तिव्यवधानं अपरोक्षतया स्वस्मिन्नध्यस्तान् पदार्थान् अहङ्कारादीन् यत ईक्षते पश्यति प्रकाशयति ततोऽस्य साक्षीति संज्ञा । निबन्धान्तरेऽपि "स्वान्तःकरणभासकं चैतन्यमात्रं साक्षी" इति सिद्धान्तितम् । स एव तु तत्र जीवसाक्षीत्युच्यते । कूटशब्दो मिथ्यापरपर्यायः । तथा च कूटे मिथ्याभूतायां बुद्धौ प्रतिबिम्बरूपेण तिष्ठतीति कूटस्थः ॥ ६४ ॥

निरपेक्षेति । स्वयंप्रकाशत्वादित्यर्थः । बुद्धिमुद्दीपयन्निति । बुद्धिं चेतयन्नित्यर्थः । चेतयन् बुद्धौ स्वप्रतिबिम्बमर्पयन् ॥ ६५ ॥

शयनादिति । पूर्षु शरीरेषु सिनोति निबध्नाति वा स्वात्मानमिति पुरुषः पूरुषश्च । पृषोदरादित्वात् साधुः । शयनं साभासेनावस्थानम् । बन्धनं तदभिमानित्वेन स्वात्मविस्मरणम् । प्रमाणजनितान्तःकरणिकी वृत्तिः प्रमा, तदाश्रयः तद्विशिष्टः सन् प्रमातेति संज्ञा । अत्रेदमवधेयम् । स्वात्मचैतन्यमेवान्तःकरणविशिष्टं सत् प्रमाता । अन्तःकरणोपहितं सत् साक्षी । इति साक्षिप्रमात्रोर्भेदः । विशेषणत्वं च कार्यान्वयित्वे सति व्यावर्तकत्वम् । उपाधित्वं तु कार्यानन्वयित्वे सति व्यावर्तकत्वे च सति वर्तमानत्वम् । यथा रूपी घट इत्यादौ रूपादेर्घटान्वयित्वेन घटान्तराद्व्यावर्तकत्वेन च विशेषणत्वम् । यथा वा न्यायमते कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रमित्यादौ कर्णशष्कुल्यादेर्नभोऽनन्वयित्वेन घटाद्यवच्छिन्ननभोभागं व्यावर्त्य उपाधित्वम् । उपाधिरेवायं नैयायिकैः परिचायक इत्युच्यत इति परिभाषाकृद्भिरुक्तम् ॥ ६६ ॥

तत्त्वमस्यादिमहावाक्ये त्वन्यथा सम्बन्धत्रयमित्युक्तं प्राक् । तदिदानीमाह–सामानाधिकरण्यं चेति । पदयोः सामानाधिकरण्यं, पदार्थयोर्विशेषणविशेष्यभावः, प्रत्यगात्मलक्षणयोर्लक्ष्यलक्षणभावश्चेति श्लोकयोजना । लक्षणं तत्त्वमस्यादिवाक्यम् । तच्चोक्तसम्बन्धत्रयेणाखण्डार्थबोधकं भवति । अखण्डार्थः

लक्षणाया विधास्तिस्रो जहती लक्षणा बुधैः ।
अजहल्लक्षणा चान्याऽपरा चोभयरूपिणी ॥ ६८ ॥

निर्विकल्पप्रतीतिः । संसर्गानवगाहिज्ञानमिति यावत् । यथा सोऽयं देवदत्त इति वाक्ये स इति तत्कालविशिष्टदेवदत्तवाचकशब्दस्य अयमित्यस्य च एतत्कालविशिष्टदेवदत्तवाचकशब्दस्य एकस्मिन्नेव देवदत्तपिण्डे तात्पर्येण सम्बन्धः सोऽयंपदयोः सामानाधिकरण्यमुच्यते, तथा तत्त्वमसीतिवाक्येऽपि परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्य तथाऽपरोक्षत्वादिविशिष्टचैतन्यवाचकत्वंपदस्य च चैतन्यमात्रे तात्पर्यसम्बन्धः तत्त्वंपदयोः सामानाधिकरण्यमुच्यते । यथा तस्मिन्नेव वाक्ये पदार्थयोस्तत्कालविशिष्टदेवदत्तैतत्कालविशिष्टदेवदत्तयोः परस्परभेदव्यावर्तकतया परस्परं विशेषणविशेष्यभावस्तथा तत्त्वमस्यादिवाक्येऽपि तत्त्वं पदार्थयोः परोक्षत्वादिविशिष्टचैतन्यापरोक्षत्वादिविशिष्टचैतन्ययोः परस्परभेदव्यावर्तकतया विशेषणविशेष्यभावः । यथा च तस्मिन्नेव वाक्ये सोऽयं शब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेन अविरुद्धदेवदत्तेन सह लक्ष्यलक्षणभावः तथा तत्त्वमस्यादिवाक्येऽपि तत्त्वंपदयोस्तदर्थयोर्वा विरुद्धभागपरित्यागेन अविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः । सोऽयमिति तत्त्वमसीति च वाक्यं लक्षणं, देवदत्तेति ब्रह्मेति च लक्ष्यमिति सामानाधिकरण्यादिसम्बन्धत्रयविवृतिः ॥ ६७ ॥

इदानीं लक्षणात्रयमाह—लक्षणाया इति । विधाः प्रकाराः । बुधैः पण्डितैः । उक्ता इति वाक्यशेषः । तानेव प्रकारान्नामत आह—जहतीति । जहती लक्षणा जहल्लक्षणा । अन्या अजहल्लक्षणा । अपरा उभयरूपिणी जहदजहल्लक्षणेत्यर्थः । तत्र वाच्यार्थमशेषतः परित्यज्य तत्सम्बन्धिनि अर्थान्तरे शब्दस्य वृत्तिर्जहल्लक्षणा । वाच्यार्थाऽपरित्यागेन तत्सम्बन्धिनि शब्दस्य वृत्तिरजहल्लक्षणा । वाच्यार्थैकदेशपरित्यागेनैकदेशे शब्दस्य वृत्तिर्जहदजहल्लक्षणा । इयमेव निबन्धान्तरे भागलक्षणेत्युच्यते ॥ ६८ ॥

---

१ गङ्गायां घोषः प्रतिवसतीति जहल्लक्षणा । घोष आभीरपल्ली । अत्र गङ्गाघोषयोराधाराधेयभावो प्रमाणबाधित इति गङ्गापदेन जलप्रवाहरूपमुख्यार्थमशेषतः परित्यज्य तत्सम्बन्धितीरमुच्यते । शोणो धावतीत्यत्र अजहल्लक्षणा । अत्र धावनं वेगगमनम्, तच्च शोणस्य बाधितमिति शोणशब्दस्य वाच्यार्थं वर्णविशेषमपरित्यज्यैव तद्विशिष्टपश्वादिपदार्थं अजहल्लक्षणया बोधयति । सोऽयं देवदत्त इत्यत्र जहदजहल्लक्षणा । अत्र तावत् तत्कालैतत्कालविशिष्टदेवदत्तलक्षणस्य वाच्यार्थस्य विरोधात् विरुद्धं तत्कालैतत्कालविशिष्टत्वांशं परित्यज्यैव अविरुद्धं देवदत्तांशं जहदजहल्लक्षणया बोध्यते ।

लक्षणा शक्तिसदृशी शक्तिवल्लक्ष्यबोधनात् ।
शक्ये बाधं च तात्पर्ये दृष्ट्वैवाऽसौ प्रवर्तते ॥ ६९ ॥
प्रतीयते यदस्तीति तत्सत्यं परिचक्षते ।
भावः सत्ता तथा वस्तु संज्ञास्तिस्रोऽस्य तत्त्रिधा ॥ ७० ॥
व्यावहारिकमित्येकमपरं प्रातिभासिकम् ।
पारमार्थिकमित्यन्यदेवं सत्यं त्रिधा मतम् ॥ ७१ ॥

लक्षणालक्षणमाह—**लक्षणा शक्तिसदृशीति** । शक्तिसादृश्यं लक्षणेति तन्त्रान्तरम् । यथा शक्तिः शब्दस्याभिधावाच्यमर्थं बोधयति तथा लक्षणापि लक्ष्यं वक्तुस्तात्पर्यविषयीभूतमर्थं बोधयतीति शक्तिसादृश्यं लक्षणा । असौ लक्षणा, शक्ये शक्तिबोध्ये मुख्ये अर्थे वक्तृतात्पर्ये वा बाधं उपपत्त्यभावं दृष्ट्वा एव प्रवर्तते । एतेन मुख्यार्थबाधस्तात्पर्यानुपपत्तिर्वा लक्षणाया बीजं इत्युक्तं भवति । शक्तिसदृशी लक्षणेति लक्षणायाः परिचितिमात्रं न तु लक्षणम् । लक्षणं तु अभिधेयाविनाभूतप्रवृत्तित्वम् । अभिधेयो वाच्यार्थः तदविनाभूते तत् सम्बद्धपदार्थान्तरे प्रवृत्तिः मुख्यार्थसम्बधिनो वाक्यार्थान्वयिनः पदार्थस्य बोधकत्वेनोपस्थानमिति यावत् ॥ ६९ ॥

लक्षणात्रयमुक्त्वा सत्यत्रयं वक्तुं प्रथमं तावत् सत्यशब्दस्यावयवार्थमाह—**प्रतीयत इति** । अस्त्यर्थकात् अस्धातोः शतृप्रत्यये सदिति रूपम् । ततो भावार्थतद्धिते सत्यमितिपदं निष्पद्यते । तथा च यत् प्रतीतिविषयं भवति तत् सत्यं परिचक्षते विद्वांसः । अत्र तावत् प्रथमं निरुपाधिकत्वोक्त्या संकोचकाभावात् सत्यशब्दः प्रत्यक्त्वेन नित्यप्रतीयमाने ब्रह्मणि मुख्यया वृत्त्या प्रवर्तते, पश्चात्तु प्रतीयमानत्वरूपगुणेन यत्किञ्चित्कालावच्छेदेन प्रतीयमाने घटपटादौ गौण्या वृत्त्या प्रवर्त्तत इति द्रष्टव्यम् । अस्य सत्यस्य भावः सत्ता वस्तु च इत्येतास्तिस्रः संज्ञाः । तच्च सत्यं त्रिधा भेदत्रयवत् ॥ ७० ॥

के ते भेदा इत्यत आह—**व्यावहारिकमिति** । व्यावहारिकसत्यमित्येको भेदः । प्रातिभासिकसत्यमित्यपरो भेदः । पारमार्थिकसत्यमित्यन्यो भेदः । संसारदशायां यावत् व्यवहारं घटोऽयं पटोऽयमित्यादिज्ञानव्यवहारनिष्पादनात् घटपटादिषु व्यावहारिकसत्यत्वम् । प्रतिभासकाले स्वप्नादौ प्रतीयमानेषु प्रतीतिमात्रशरीरगजतुरगादिषु प्रातिभासिकसत्यत्वम् । प्रतिभासः स्वप्नमनोरथभ्रा-

---

१ "यस्योच्चारणमात्रेण सहजं यत्प्रतीयते । तस्य शब्दस्य या शक्तिः साभिधा परिकीर्तिता" ॥ असौ रूढेरेव नामान्तरम् ।

दुःखमाध्यात्मिकं ज्ञेयमाधिभौतिकमित्यपि।
आधिदैविकमप्येतद्दुःखत्रयमुदाहृतम् ॥ ७२ ॥
अध्यात्ममधिभूतं च तथाधिदैवमेव च।
अध्यात्मिकत्रयं ह्येतदुपासार्थमिहोच्यते ॥ ७३ ॥

न्त्यादिः। कालत्रयप्रतीतिविषयत्वात् ब्रह्मात्मनि पारमार्थिकसत्यत्वमिति सत्यत्रयविवेकः ॥ ७१ ॥

दुःखत्रयमाह—आध्यात्मिकमिति। दुःखत्रयं तापत्रयमित्यनर्थान्तरम्। आत्मानमधिकृत्य प्रवर्तत इत्याध्यात्मिकम्। तच्च द्विविधं, शारीरं मानसं चेति। आत्मशब्दो हि शरीरे मनसि च प्रयुज्यते। शारीरं नाम दुःखं वातपित्तश्लेष्मविपर्ययकृतं ज्वरादि। मानसं प्रियवियोगाप्रियसंयोगजनितम्। भूतेभ्यो जरायुजाण्डजस्वेदजोद्भिजेभ्यः सकाशादुत्पन्नमाधिभौतिकम्। देवानामिदं दिवः प्रभवति वा दैवं, तदधिकृत्य यदुपजायते तदाधिदैविकम्। तच्च शीतोष्णवातवर्षाशनिपातादि। यद्यपि सर्वमेव दुःखं मानसं तथापि मनोमात्रजन्यत्वाजन्यत्वाभ्यां मानसत्वामानसत्वव्यपदेशो बोद्धव्य इति ॥ ७२ ॥

अध्यात्मादित्रयमाह—अध्यात्ममिति। एतत् संनिहितोक्तं अध्यात्मादित्रयं उपासनार्थं इह अस्मिन् वेदान्ते उच्यते। तथाहि अध्यात्मं विश्वः, अधिभूतं विराट्, अधिदैवं विष्णुः। अध्यात्मं जाग्रत्, अधिदैवं पालनं, अधिभूतं सत्त्वगुणः। एवमध्यात्मं तैजसः, अधिभूतं हिरण्यगर्भः, अधिदैवं ब्रह्मा। अध्यात्मं स्वप्नः, अधिदैवं सृष्टिः, अधिभूतं रजोगुणः। एवमध्यात्मं प्राज्ञः, अधिभूतमव्याकृतं, अधिदैवं रुद्रः। अध्यात्मं सुषुप्तिः, अधिदैवं प्रलयः, अधिभूतं तमोगुणः। एवमध्यात्माधिभूताधिदैवानामेकत्वात् प्रणवावयवानामेतेषामुपहितानामैक्योपासनया हिरण्यगर्भलोकप्राप्तिः, तथा अन्तःकरणशुद्धिद्वारा क्रममुक्तिश्चेत्युक्तमुपासनाकाण्डे। अन्यत्रापि, "बुद्धिरध्यात्मं बोद्धव्यमधिभूतं ब्रह्मा तत्राधिदैवतम्। अहङ्कारोऽध्यात्ममहङ्कर्तव्यमधिभूतं रुद्रस्तत्राधिदैवतम्। मनोऽध्यात्मं सङ्कल्पयितव्यमधिभूतं चन्द्रस्तत्राधिदैवतम्। श्रोत्रमध्यात्मं श्रोतव्यमधिभूतं दिशस्तत्राधिदैवतम्। त्वगध्यात्मं स्पर्शयितव्यमधिभूतं वायुस्तत्राधिदैवतम्। चक्षुरध्यात्मं द्रष्टव्यमधिभूतं सूर्यस्तत्राधिदैवतम्। पाणिरध्यात्मं आदातव्यमधिभूतं इन्द्रस्तत्राधिदैवतम्। पादावध्यात्मं गन्तव्यमधिभूतं विष्णुस्तत्राधिदैवतम्। पायुरध्यात्मं उत्स्रष्टव्यमधिभूतं मृत्युस्तत्राधिदैवतम्। उपस्थोऽध्यात्मं आनन्दमधिभूतं प्रजापतिस्तत्राधिदैवतम्। जिह्वाध्यात्मं रसयितव्यमधिभूतं वरुणस्तत्राधिदैवतम्।

आरम्भः परिणामश्च विवर्तश्चेति च त्रिधा।
वादो विवदमानानां दृश्यते कार्यजन्मनि ॥ ७४ ॥
सत्त्वं रजस्तमश्चेति गुणत्रयमुदाहृतम्।
तदेव सर्वशास्त्रेषु मूला प्रकृतिरुच्यते ॥ ७५ ॥
धर्मैर्लघ्वादिभिः सत्त्वं चलाद्यै रज उच्यते।
गुर्वादिभिस्तम इति त एते व्यापिनो मताः ॥ ७६ ॥

नासाध्यात्मं घ्रातव्यमधिभूतं पृथ्वी तत्राधिदैवतम्। वागध्यात्मं वक्तव्यमधिभूतं अग्निस्तत्राधिदैवतम् ॥" इति ॥ ७३ ॥

वादत्रयमाह–**आरम्भ** इति। कार्यजन्मनि कार्योत्पत्तौ विवदमानानां अन्यथान्यथा वदतां वादिनां नैयायिकादीनां मध्ये समुदायतस्त्रिधैव आरम्भः परिणामो विवर्तश्चेति त्रिप्रकारो वादो दृश्यते। तथाहि–यथा दुग्धमेव दध्याकारं परिणमते तथा प्रकृतिरपि पुरुषसंनिधानमात्रेण जगदाकारेण परिणामं गता इति सांख्यानां परिणामवादः। यथा बहुमृत्कणिका संमिलिता घटो जायते यथा वा बहुतन्तुः संमिलितः पटो जायते, तथा बहुपरमाणु द्व्यणुकादिक्रमेण मिलितं सत् जगदुत्पादयतीति न्यायवैशेषिकानामारम्भवादः। यथा रज्जुविवर्तः सर्पो रज्जुरेव तथा चिद्विवर्तो जगच्चिदेवेति वैदान्तिकविशेषाणां विवर्तवादः। प्रागभावप्रतियोगित्वं कार्यत्वमिति ब्रुवाणानां न्यायवैशेषिकाणां मते कार्याणामसतामेवोत्पत्तिरङ्गीकृता। अतस्तेषां मते आद्यक्षणसम्बन्धरूपोत्पत्तिरारम्भशब्देनोच्यते। सत्कार्यवादिनस्तु सांख्या उपादानसमसत्ताककार्योत्पत्तिः परिणाम इति परिणामलक्षणमाहुः। यदभिन्नं कार्यमुत्पद्यते तदुपादानकारणमित्युपादानकारणलक्षणम्। तेन समा सत्ता यस्य कार्यस्य तथाभूतकार्यस्यापत्तिरुद्भवः। यथा व्यावहारिकसत्ताकदुग्धात् तत्समसत्ताकदधिरूपकार्यापत्तिरित्यर्थः। अनिर्वचनीयमायावादिनो वेदान्तिकास्तु उपादानविषमसत्ताककार्यापत्तिरिति विवर्तलक्षणं वदन्ति। उपादानात् विषमा सत्ता यस्य कार्यस्य तदापत्तिरिति तस्याक्षरिकोऽर्थः। यथा व्यावहारिकसत्ताकशुक्तौ प्रातिभासिकसत्ताकरजतोद्भवः। एवमेवोक्तं वार्तिके–"सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः। अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदाहृतः" ॥ इति वादत्रयविवेकः ॥ ७४ ॥

सत्त्वादित्रयमाह–**सत्त्वमिति**। स्पष्टा योजना ॥ ७५ ॥

सत्त्वादीन् लक्षयति–**धर्मैरिति**। लघ्वादिभिर्धर्मैः सत्त्वं चलाद्यैर्धर्मैः रजो गुरुत्वादिधर्मैश्च तमो लक्ष्यते। त एते सर्वे गुणाः सत्त्वादयो व्यापिनः सर्व-

अहंकारस्त्रिधापि स्याद्वैकृतस्तैजसस्तथा।
भूतादिश्चेति वेदान्ते सांख्ये च परिगीयते ॥ ७७ ॥
भूतो भवन्भविष्यंश्च कालोऽपि त्रिविधो मतः।
ज्ञाता ज्ञानं च ज्ञेयं च त्रिपुटीति निगद्यते ॥ ७८ ॥
असम्भावनया सार्धं विपरीता च भावना।
संशयश्च तथा ज्ञाने प्रतिबन्धा भवन्ति हि ॥ ७९ ॥

संयोगिन इत्यर्थः। तथा च लघुत्वादिवत्त्वं सत्त्वत्वं, स्पन्दनादिमत्त्वं रजस्त्वं, गुरुत्वादिमत्त्वं तमस्त्वमिति तेषां लक्षणम्। लघ्वादित्यादिशब्देन प्रकाशप्रसन्नताभिष्वङ्गप्रीतिपुष्टितितिक्षासंतोषादिभेदाः संगृह्यन्ते। चलाद्यैरित्यादिशब्दात् उपष्टम्भकत्व-शोकसन्तापद्वेषद्रोहेर्ष्यामत्सराद्यसंख्या भेदा गृह्यन्ते। गुर्वादिभिरित्यादिशब्देन आवरणमोहप्रमादालस्यनिद्रादीनां संग्रहः स्यात्। इत्थमनन्तभेदमपि सत्त्वं समासतः सुखात्मकं, असंख्यभेदमपि रजः संक्षेपतो दुःखात्मकं, तथा तमोऽपि संक्षेपेण मोहात्मकमाहुः। वचनं चोक्तमत्र—“सत्त्वं प्रकाशकं विद्यात् रजो विद्यात्प्रवर्तकम्। तमो विमोहनं विद्यात् त्रैगुण्यं मानवर्जितम्” ॥ इत्यादि। अहङ्कारत्रैविध्यमाह--अहङ्कार इति। त्रिगुणबुद्धितत्त्वोत्पन्नत्वादहङ्कारस्य त्रैविध्यं बोद्धव्यम्। सात्विकाहङ्कारो वैकृतवैकारिकशब्दाभ्यामुच्यते, राजसाहङ्कारः तैजसशब्देन, तथा तामसाहङ्कारो भूतादिशब्देन। एतच्च तत्वाभिप्रायेणोक्तम्। व्यावहारिके तु सामान्याहङ्कारो विशेषाहङ्कारश्चेति द्वैविध्यमेव ॥ ७६ ॥

कालत्रयमाह पद्यार्धेन—भूत इति। भवन् वर्तमानः। भूतः अतीतः। भविष्यन् अनागतः। अनुभूतव्यक्तिकत्वमतीतत्वं, स्वव्यापारोपारूढत्वं वर्तमानत्वं, भविष्यद्व्यक्तिकत्वमनागतत्वमिति लक्षणम्। यत्प्रागभावेन यःकालोऽवच्छिद्यते स तस्य भविष्यत्कालः। यत्प्रध्वंसेन यः कालोऽवच्छिद्यते स तस्यातीतकालः। येन हि वस्तुना यः कालोऽवच्छिद्यते स तस्य वर्तमान इति वैशेषिका आहुः। ज्ञात्रादित्रयमाह पद्यशेषेण—ज्ञातेति। एतज्ज्ञानादित्रयं त्रिपुटीति निगद्यते त्रिपुटीशब्देनोच्यते। त्रयाणां पुटानां प्रकाराणां ज्ञात्रादीनां समाहारस्त्रिपुटीत्यर्थः ॥ ७७ ॥

ज्ञानप्रतिबन्धत्रयमाह—असम्भावनयेति। सार्धं सह। ज्ञाने तत्त्वज्ञानोत्पत्तौ असम्भावना तथा विपरीतभावना तथा संशयः, एते प्रतिबन्धाः। एतेषां लक्षणादिकं प्रागेवोक्तम् ॥ ७८ ॥

उक्तासम्भावनादिनिवर्तकश्रवणादित्रयमाह—श्रवणमिति। एतत्पद्यपूर्वार्धोक्तं हि प्रसिद्धं श्रवणादित्रयं तेषां असम्भावनाविपरीतभावनासंशयानां निवर्तक-

श्रवणं मननं चैव निदिध्यासनमित्यपि ।
श्रवणादित्रयं ह्येतत्क्रमात्तेषां निवर्तकम् ॥ ८० ॥
ज्ञानादित्रयमित्युक्तिर्यत्र तत्र विभावयेत् ।
ज्ञानं चोपरतिश्चेति वैराग्यं मोक्षकारणम् ॥ ८१ ॥
हेतुस्वरूपकार्याणि हेत्वादित्रयमुच्यते ।
तेषां तेषां लक्षणानि विज्ञेयान्यनुशीलनात् ॥ ८२ ॥
प्राणानां निग्रहोपाया रेचकाद्याः क्रियाक्रमाः ।
प्राणायामत्रयत्वेन वर्ण्यन्ते वेदवादिभिः ॥ ८३ ॥
तादात्म्यं स्यादहन्तायाश्चिच्छायादेहसाक्षिभिः ।
सहजं कर्मजं चेति भ्रान्तिजं च क्रमात्त्रिधा ॥ ८४ ॥

माहुर्विद्वांस इति योज्यम् । तत्र श्रवणं संशयनिवर्तकं, मननमसम्भावनानिवर्तकं, निदिध्यासनं तु विपरीतभावनानिवर्तकमिति विवेकः । अत्रेयं कारिकापाठक्रममनादृत्यैव व्याख्याता अर्थक्रमानुरोधादित्यवगन्तव्यम् । श्रवणादीनां लक्षणं त्वग्रे वक्ष्यते ॥ ७९ ॥

ज्ञानोपरतिवैराग्यानां हेतुस्वरूपकार्याण्याह–ज्ञानमिति । तेषां ज्ञानादीनाम् । तेषां हेत्वादीनाम् । अनुशीलनात् अध्ययनकौशलात् । तथा हि–ज्ञानस्य हेतुः श्रवणादित्रयम् । अहं देहेन्द्रियाद्यतिरिक्तः साक्षी, प्रतीयमानप्रपञ्चोऽप्यसत्य इति दृढनिश्चयो ज्ञानस्य स्वरूपम् । अत्र निश्चयस्य दार्ढ्यं नाम संशयादिराहित्यम् । अनात्मस्वात्मत्वबुद्ध्यभावो ज्ञानस्य कार्यम् । तथा वैराग्यस्य हेतुर्विषयेषु दोषदृष्टिः, स्वरूपं वान्ताशनवद्धेयताबुद्धिः । कार्यं पुनराशाभावः । एवमुपरतेर्हेतुर्यमनियमप्राणसंयमादिः । स्वरूपं चित्तनिरोधः । कार्यं सर्वव्यवहारनाशः । इति ज्ञानोपरतिवैराग्याणां हेतुस्वरूपकार्याणि । वैराग्यस्यावधिर्ब्रह्मलोकतृणीकारः । अज्ञानकाले देहादावात्मत्वविषयिणी दृढा बुद्धिर्यथा तथा तदप्रतीतिपूर्वकमहं ब्रह्मास्मीति दृढनिश्चयो बोधस्यावधिः । सुषुप्तिवत् समस्तवस्तुविस्मृतिरुपरतेरवधिरित्यपि विज्ञेयम् ॥ ८०–८१–८२ ॥

प्राणायामत्रयमाह–प्राणानामिति । रेचकाद्याः रेचकपूरककुम्भकाख्याः क्रियाक्रमाः प्राणायामशब्देनोच्यन्त इत्यर्थः । तादात्म्यत्रयमाह–चिच्छाया चिदाभासः अन्तःकरणस्थं प्रतिबिम्बचैतन्यमिति यावत् । देहः षाट्कौषिकः । साक्षी अन्तःकरणोपलक्षितचैतन्यम् । तैः सह अहन्तायास्तादात्म्यं तप्तायःपिण्डवत्परस्पराध्यासकृतमैक्यं क्रमात्सहजं कर्मजं भ्रान्तिजं चेति त्रिधा त्रिप्रकारं बोद्धव्य-

विनासम्बन्धिनाशेन सहजं न निवर्तते।
कर्मक्षयात्तथा ज्ञानात्कर्मजं भ्रान्तिजं नहि ॥ ८५ ॥
पुत्रैषणा तथा वित्तैषणा लोकैषणा तथा।
एषणात्रयमित्युक्तं तद्धि स्याद्बन्धकारणम् ॥ ८६ ॥
त्रिविधो व्यवहारोऽत्र वर्ण्यते वेदविज्जनैः।
लौकिकः कर्मशास्त्रीयो मोक्षशास्त्रीय इत्यपि ॥ ८७ ॥
वासनाविषयब्रह्मानन्दांश्चाहुः समासतः।
अन्तर्भवन्ति तेष्वेव निजानन्दादयस्तथा ॥ ८८ ॥

मिति शेषः। सहजतादात्म्यं कर्मजतादात्म्यं भ्रान्तिजतादात्म्यं इत्यहङ्कारस्य चिच्छायादेहसाक्षिभिस्तादात्म्यत्रयमित्यर्थः। तत्र चिच्छायया सह यदहङ्कारस्य तादात्म्यं तत्सहजं स्वाभाविकमिति यावत्। यच्च देहेन सह अहङ्कारस्य तादात्म्यं तत्कर्मजम्। यच्च साक्षिणा सह तद्भ्रान्तिजमिति विवेकः ॥ ८३–८४ ॥

त्रयाणां तादात्म्यानां निवृत्तौ निमित्तं क्रमं चाह–विनेति। प्रथमार्धयोजना सुगमा। द्वितीयार्धयोजना त्वेवं–कर्मक्षयात् कर्मजं तथा ज्ञानात् भ्रान्तिजं हि निश्चितं न। स्यादिति शेषः। तथा हि–सम्बन्धिनोश्चिच्छायाहङ्कारयोः सतोः सहजस्य निवृत्तिर्न भवति किन्तु सम्बन्धिनाशे निवृत्तिर्भवति। यथा शरावोदकनिमित्तोदयस्य सवितृप्रतिबिम्बस्य विना शरावोदकनिवृत्तिं न तन्निवृत्तिर्भवति, निवृत्त्या तु शरावोदकस्य निवृत्तिर्भवति तद्वत्। यत्तु शरीराहङ्कारयोस्तादात्म्यं तत् कर्मक्षयान्निवर्तते। यच्चात्माहङ्कारयोस्तादात्म्यं तज्ज्ञानान्निवर्तते। ब्रह्मात्मतत्त्वसाक्षात्कारात्तु त्रिविधमपि तादात्म्यं युगपदेव निवर्तत इति तादात्म्यत्रयनिवृत्तिनिमित्तक्रमौ विज्ञेयौ। अज्ञानादेवाहमित्यात्मपरिच्छेदो भवति, ज्ञानेन त्वज्ञाननिवृत्तावपरिच्छिन्न एवाहमिति निश्चयो ब्रह्मात्मतत्त्वसाक्षात्कारशब्देनोच्यते॥८५॥

एषणात्रयमाह–पुत्रैषणेति। एषणा इच्छा, इदं मे भवतु एतद्विधज्ञानम्। इति इत्थं एषणात्रयमुक्तम्। तच्चैषणात्रयं बन्धस्य संसारस्य कारणं निमित्तमित्यर्थः॥८६

त्रिविधेति। लोकयात्रानिर्वाहको लौकिकः। विधिनिषेधपराणि ऋग्वेदादीनि कर्मशास्त्राणि तेभ्य आगतः प्राप्तो वा कर्मशास्त्रीयः। विधिनिषेधशून्यप्रत्यग्ब्रह्मपराणि वेदान्तवाक्यानि तेभ्यो विदितो व्यवहारो मोक्षशास्त्रीय इति व्यवहारत्रयविवेकः ॥ ८७ ॥

आनन्दत्रयमाह–वासनेति। वासनानन्दो विषयानन्दो ब्रह्मानन्दश्चेति आनन्दत्रयविभागः। एतेष्वानन्देषु निजानन्दादयोऽन्तर्भवन्ति। अतः समासतः

तिस्रो विधा विधेर्ज्ञेया द्वयोर्मीमांसयोर्बुधैः।
अपूर्वो नियमश्चैव परिसंख्या च नामतः॥ ८९॥
अप्राप्तप्राप्तिफलको विधिराद्यः प्रकीर्त्यते।
द्वितीयः पक्षतः प्राप्तावप्राप्तांशप्रपूरकः॥ ९०॥
तृतीयः शेषिणोर्नित्यप्राप्तावेकस्य शेषिणः।
शेष्यन्तरनिवृत्त्यर्थ एकस्मिन् शेषिणि द्वयोः॥ ९१॥

संक्षेपेणानन्दत्रयमुच्यते। ग्रन्थकृद्भिरिति शेषः। निजानन्दादय इत्यत्रादिशब्देन मुख्यानन्दात्मानन्दयोगानन्दाद्वैतानन्दा गृह्यन्ते। एतेषां ब्रह्मानन्देऽन्तर्भावः। यश्च विद्यानन्द उक्तः पञ्चदश्यादिग्रन्थेषु तस्य विषयानन्देऽन्तर्भावो द्रष्टव्यः॥ ८८॥

विधित्रैविध्यमाह—तिस्र इति। द्वयोः पूर्वोत्तरयोर्मीमांसयोः। विधेरज्ञातार्थज्ञापकस्य वेदभागस्य लिङ्लोट्तव्यादिसमन्वितवैदिकवाक्यस्येति यावत्। तिस्रो विधाः प्रकारा बुधैर्विज्ञेया इत्यन्वयः। तेषां विधिभेदानां नामान्याह—अपूर्व इति। अपूर्वविधिर्नियमविधिः परिसंख्याविधिरिति तेषां नामानीत्यर्थः॥८९॥

तान् लक्षयति—अप्राप्तेति। अप्राप्तस्य प्राप्तिः फलं यस्य सोऽप्राप्तप्राप्तिफलकः। कालत्रयेऽपि कथमप्यप्राप्तस्य प्राप्तिफलको विधिराद्योऽपूर्वविधिः। यथा व्रीहीन् प्रोक्षतीति। नात्र व्रीहीणां प्रोक्षणस्य संस्कारकर्मणो विना नियोगं (विधायकशब्दम्) मानान्तरेण प्राप्तिरस्ति। प्रोक्षतीति लेटो रूपं "लेट् च विध्यर्थे" इति पाणिनिः। पक्षतः पक्षे प्राप्तस्य अप्राप्तांशपरिपूरणो विधिर्द्वितीयो नियमविधिः, यथा व्रीहीन् अवहन्तीति। अत्र विध्यभावेऽपि पुरोडाशप्रकृतिद्रव्यतया व्रीहीणां तण्डुलनिष्पत्त्याक्षेपादेवावहननप्राप्तिर्भविष्यतीति न तत्प्राप्त्यर्थं विधिः, किन्तु आक्षेपादवहननप्राप्तौ तद्वदेव लोकावगतकारणत्वाविशेषात् नखविदलनादिरपि पक्षे प्राप्नुयात् इत्यवहननाप्राप्तांशसम्भवात् तदंशपरिपूरणफलः सम्भाव्यत इत्यवधेयम्॥ ९०॥

तृतीय इति। शेषिणोः शेषिद्वयमध्ये एकस्य शेषिणो नित्यप्राप्तौ शेष्यन्तरनिवृत्त्यर्थः अन्यशेषनिवृत्तिफलकस्तृतीयः परिसंख्याविधिः। अथवा एकस्मिन् शेषिणि द्वयोः शेषयोर्नित्यप्राप्तौ शेषान्तरनिवृत्तिफलको विधिस्तृतीय इति योजना। "शेषः परार्थत्वात्" इति जैमिनिसूत्रात् शेष उपकारकोऽङ्गमिति यावत्। शेषी उपकार्यः प्रधानमिति शेषशेषिशब्दार्थः। उदाहरणं तु इमामिति। अग्निचयने "इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते" इति तथा गृहमेधीये

अथवा शेषयोर्नित्यप्राप्तौ शेषान्तरस्य च ।
निवृत्तिफलकः सोऽसाविमामित्यादिको यथा ॥ ९२ ॥

"आज्यभागौ यजतीति" । अग्निचयने अश्वरशनाग्रहणं गर्दभरशनाग्रहणं चोभयमनुष्ठेयम् । तत्राश्वरशनाग्रहणे "इमामगृभ्णन्" इति मन्त्रो लिङ्गादेव रशनाग्रहणप्रकाशनसामर्थ्यरूपात् नित्यं प्राप्नोतीति न तत्प्राप्त्यर्थस्तदप्राप्तांशपरिपूरणार्थो वा विधिः, किन्तु लिङ्गाविशेषात् गर्दभरशनाग्रहणेऽपि मन्त्रः प्राप्नुयादिति तन्निवृत्त्यर्थः । तथा ग्रहमेधीयस्य दर्शपूर्णमासप्रकृतिकत्वात् अतिदेशादेव आज्यभागौ नित्यं प्राप्नुत इति न तत्र विधिस्तत्प्राप्त्यर्थस्तन्नियमार्थो वा किंत्वतिदेशात् प्रयाजादिकमपि प्राप्नुयादिति तन्निवृत्त्यर्थः । एवमेवोक्तं भट्टकुमारिलेन प्राच्यां मीमांसायाम् "विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते" । अस्यार्थः-विधिरपूर्वविधिः । यस्य यदर्थत्वं प्रमाणान्तरेणाप्राप्तं तस्य तदर्थत्वेन यो विधिः सोऽपूर्वविधिः, यथा "यजेत स्वर्गकाम इति" । यागस्य हि स्वर्गार्थत्वं न प्रमाणान्तरेण ज्ञायते किन्त्वनेनैव विधिनेति भवत्ययमपूर्वविधिः । पक्षेऽप्राप्तस्य तु यो विधिः स नियमविधिः, यथा "व्रीहीनवहन्ति" इति । अनेन हि विधिना अवघातस्य न वैतुष्यार्थत्वं बोध्यते अन्वयव्यतिरेकसिद्धत्वात्तस्य किन्तु नियमः । स चाप्राप्तांशपूरकः । वैतुष्यस्य हि नानोपायसाध्यत्वात् यस्यां दशायां अवघातं परित्यज्य उपायान्तरं ग्रहीतुं आरभते तस्यां दशायां अवघातस्याप्राप्तत्वेन तद्विधानात्मकमप्राप्तांशपूरणमेवानेन विधिना नियमाख्येन क्रियते । अतश्च नियमविधावप्राप्तांशपूरणात्मको नियम एव वाक्यार्थः पक्षेऽप्राप्तदशायामिति यावत् । अपूर्वविधौ त्वत्यन्ताप्राप्तमेव यागविधानमिति तयोर्भेदः । उभयस्य युगपत्प्राप्तावितरव्यावृत्तिपरो यो विधिः स परिसंख्याविधिः, यथा "पञ्च पञ्चनखा भक्ष्याः" इति । इदं हि वाक्यं न भक्षणविधिपरं, तस्य रागतः प्राप्तत्वात् । नापि नियमपरं, पञ्चनखापञ्चनखभक्षणस्य युगपत्प्राप्तेः पक्षे प्राप्त्यभावात् । अत इदमपञ्चनखभक्षणनिवृत्तिपरमिति भवति परिसंख्याविधिः । असौ तावत् द्विधा, श्रौती लाक्षणिकी चेति । तत्र "अत्र ह्येवावपन्ति" इत्यत्र श्रौती परिसंख्या । एवकारेण पवमानातिरिक्तस्तोत्रव्यावृत्तेरभिधानात् । "पञ्च पञ्चनखा भक्ष्याः" इत्यत्र तु लाक्षणिकी, इतर व्यावृत्तिपरपदस्याभावात् । अत एवैषा त्रिदोषग्रस्ता । दोषत्रयं च श्रुतहानिरश्रुतकल्पना प्राप्तबाधश्चेति । श्रुतस्य पञ्चनखभक्षणस्य हानात् अश्रुतापञ्चनखभक्षणनिवृत्तिकल्पनात् प्राप्तस्यापञ्चनखभ-

स्वीकुर्वन्ति विधिं केचिन्नियमं त्वपरे पुनः।
केचिद्वदन्ति श्रवणे विधिर्नैकोऽपि युज्यते॥ ९३॥

क्षणस्य बाधनादिति। अस्मिंश्च दोषत्रये दोषद्वयं शब्दनिष्ठं, प्राप्तत्वाख्यस्तु दोषः अर्थनिष्ठः इति विधित्रयविवेकः॥ ९१–९२॥

विविक्तासु तिसृषु विधेर्विधासु किंविधः श्रवणविधिराश्रीयते वेदान्तिभिरिति भवति विचारणा। तत्राह–स्वीकुर्वन्तीति। केचिदाचार्याः श्रवणे विधिमपूर्वविधिं स्वीकुर्वन्ति। अपरे पुनर्नियमम्। केचित्तु वेदान्तश्रवणे नैकोऽपि विधिर्युज्यत इति वदन्ति। तथाहि–अपूर्वविधिरेवायमप्राप्तत्वात्। न हि वेदान्तश्रवणं ब्रह्मसाक्षात्कारे हेतुरित्यत्र अन्वयव्यतिरेकप्रमाणमस्ति। कृतश्रवणस्यापि बहुशस्तदनुत्पत्तेरकृतश्रवणस्यापि वामदेवादेस्तदुत्पत्तेरुभयतो व्यभिचारात्। न वा श्रवणमात्रं श्रोतव्यार्थसाक्षात्कारहेतुरिति शास्त्रान्तरश्रवणे गृहीतः सामान्यनियमोऽस्ति येनात्र विशिष्य हेतुत्वग्राहकाभावेऽपि सामान्यमुखेनैव हेतुत्वं प्राप्यत इति शंकेत। गान्धर्वादिशास्त्रश्रवणस्य हि षड्जादिस्वरसाक्षात्कारे हेतुत्वाभ्युपगमेऽपि कर्मकाण्डादिश्रवणात् तदर्थधर्मादिसाक्षात्कारादर्शनेन व्यभिचारात्। तस्मादपूर्वविधिरेवायमिति प्रकटार्थकारादयः।

अन्ये तु विवरणानुसारिणः–"जुष्टं यदा पश्यत्यन्यमीशम्" इत्यादिश्रवणात् भिन्नात्मज्ञानान्मुक्तिरिति भ्रमसम्भवेन मुक्तिसाधनज्ञानाय भिन्नात्मविचारस्वरूपशास्त्रान्तरश्रवणेऽपि पक्षे प्रवृत्तिः स्यात् इत्यद्वितीयात्मपरवेदान्तश्रवणनियमविधिः सम्भवति। अत्र त्वात्मशब्दस्य "इदं सर्वं यदयमात्मा" इत्यादिप्रकरणपर्यालोचनया अद्वितीयात्मपरत्वादित्याहुः। अपरे तदेकदेशिनस्त्वाहुः–वेदान्तश्रवणेन न ब्रह्मात्मसाक्षात्कारः किन्तु मनसैव सः। "मनसैवानुद्रष्टव्यः" इति श्रुतेः। शास्त्राचार्योपदेशशमदमादिसंस्कृतं मन एवात्मदर्शने करणमिति गीताभाष्यवचनाच्च। श्रवणं तु निर्विचिकित्सपरोक्षज्ञानार्थमिति तादर्थ्येनैव नियमविधिरिति। एवमन्येऽप्याचार्या नियमपक्षमेवावलम्बन्ते।

वार्तिकानुसारिणस्तु केचिद् ब्रह्मज्ञानार्थं वेदान्तश्रवणे प्रवृत्तस्य चिकित्साज्ञानार्थं चरकादिग्रन्थश्रवणे प्रवृत्तस्येव मध्ये मध्ये व्यापारान्तरेऽपि प्रवृत्तिः स्यादिति तन्निवृत्तिफलकः श्रोतव्य इति भवति परिसंख्याविधिः। "ब्रह्मसंस्थोऽमृतत्वमेति" इति छान्दोग्येऽनन्यव्यापारत्वस्य मुक्त्युपायत्वावधारणात्। सम् पूर्वस्य तिष्ठतेः समाप्तिवाचितया ब्रह्मसंस्थाशब्दिताया ब्रह्मणि समाप्तेरनन्यव्यापाररूपत्वात्।

प्राशस्त्यं निन्दितत्वं वा यद्बोधयति तद्वचः।
अर्थवादस्त्रिधा सोऽपि विध्याद्यनुगतो मतः॥ ९४॥

"तमेवैकं जानथ अन्या वाचो विमुञ्चथ" इत्याथर्वणे कण्ठत एव व्यापारान्तर-प्रतिषेधाच्च। "आसुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तया" इत्यादिस्मृतेश्चेत्याहुः।

आचार्यवाचस्पतिमतानुसारिणस्तु "आत्मा श्रोतव्य" इति मननादिवदात्म-विषयकत्वेन निबध्यमानं श्रवणं आगमाचार्योपदेशजं आत्मज्ञानमेव न तु श्रुति-तात्पर्यविचाररूपम्। तत्त्वे न तत्र कोऽपि विधिः। ज्ञानं हि नाम वस्त्वधीनं न विध्यधीनमिति। अत एव समन्वयसूत्रे आत्मज्ञानविधिनिराकरणानन्तरं भाष्यम् "किमर्थानि तर्हि आत्मा वा अरे द्रष्टव्य इत्यादीनि वचनानि" "विधि-च्छायानि स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीति ब्रूमः" इत्यादि। यदि च वेदान्ततात्पर्यविचाररूपं श्रवणं तदा तस्य तात्पर्यनिश्चयद्वारा वेदान्ततात्पर्य-भ्रमसंशयरूपप्रतिबन्धकनिरास एव फलं न प्रतिबन्धकान्तरनिरासो ब्रह्मा-वगमो वा। तत्फलकत्वं च तस्य लोकत एव प्राप्तं, साधनान्तरं च किञ्चित् विकल्प्य समुच्चित्य वा न प्राप्तमिति न तत्र विधित्रयस्याप्यवकाशः। न च सहकार्यन्तरविधिरित्यधिकरणे बाल्यपाण्डित्यमौनशब्दितेषु श्रवणमनननिदिध्या-सनेषु विधिरभ्युपगत इति वाच्यम्। विचारे विचार्यतात्पर्यनिर्णयहेतुत्वस्य वस्तुसि-द्ध्यनुकूलयुक्त्यनुसन्धानरूपे मनने तत्प्रत्ययाभ्यासरूपे निदिध्यासने च वस्त्व-वगमवैशद्यहेतुत्वस्य लोके सिद्धत्वेन तेषु विध्यनपेक्षणात्। विधिच्छायार्थवाद-स्येव प्रशंसाद्वारा प्रवृत्त्यतिशयकरत्वमात्रेण तत्र विधित्वव्यवहाराच्च। एवं च श्रवणविध्यभावेऽपि कर्मकाण्डविचारवद्ब्रह्मकाण्डविचारोऽपि अध्ययनविधिमूल एवेत्याहुरिति दिक्॥ ९३॥

अर्थवादत्रयं वक्तुं प्रथममर्थवादलक्षणमाह—प्राशस्त्यमिति। यत् वचः वाक्यं प्राशस्त्यं स्तुतिं निन्दितत्वं निन्दां वा विधेयस्य निषेध्यस्य च लक्षयति लक्षणया बोधयति तत् वाक्यमर्थवादः। स अर्थवादः त्रिधा त्रिविधः। स च त्रिभेदवान् अर्थवादः विध्याद्यनुगतः। आदिशब्दो निषेधसंग्रहाय। विध्य-नुगतो निषेधानुगतश्चेति यावत्। तथा च सर्वेऽप्यर्थवादाः स्वार्थप्रतिपादने प्रयोजनमलभमानाः प्रयोजनवदर्थपर्यवसायिविधिनिषेधापेक्षितप्राशस्त्यनिन्दे लक्ष-णावृत्त्या समर्प्य यथायथं विधिनिषेधवाक्येन सहैकवाक्यतां भजन्त इत्यर्थो लभ्यते। अयमत्र निष्कर्षः—प्राशस्त्यनिन्दान्यतरपरवाक्यमर्थवादः। तस्य च लक्षणया प्रयोजनवदर्थपर्यवसानम्। तथा हि—अर्थवादवाक्यं हि स्वार्थप्रतिपादेन

गुणवादोऽनुवादश्च भूतार्थवाद इत्यपि।
विरोधेऽवधृते चैव तद्धाने वै यथाक्रमम् ॥ ९५ ॥
स्वर्गितापत्रयं प्रोक्तं क्षयातिशयसाहसाः।
कर्मत्रयं तथा प्रोक्तं तत्र प्रारब्धसंज्ञकम् ॥ ९६ ॥

प्रयोजनाभावात् विधेयनिषेध्ययोः प्राशस्त्यनिन्दितत्वे लक्षणया प्रतिपादयति। स्वार्थमात्रपरत्वे त्वानर्थक्यप्रसङ्गात् "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" इति जैमिन्युक्तेः। न चेष्टापत्तिः। "स्वाध्यायोऽध्येतव्य" इति विधिना सकलवेदाध्ययनं तदर्थज्ञानं च कर्तव्यमिति बोधयता सर्वस्य वेदस्य प्रयोजनवदर्थपर्यवसायित्वं च सूचयता उपात्तत्वेनानर्थक्यानुपपत्तेः। अत एव हि सोऽर्थवादो द्विविधः, विधिशेषो निषेधशेषश्चेति। तत्र "वायव्यं श्वेतमालभेत भूतिकामः" इत्यादिविधिशेषस्य "वायुर्वै क्षेपिष्ठा देवता" इत्यादेर्विधेयार्थप्राशस्त्यबोधकतया अर्थवत्त्वम्। "बर्हिषि रजतं न देयम्" इत्यादेर्निषेधशेषस्य "सोऽरोदीत् यदरोदीत् तद्रुद्रस्य रुद्रत्वम्" इत्यादेर्निषेध्यनिन्दितत्वबोधकतया अर्थवत्त्वम्। न च प्राशस्त्यादिबोधकस्य निष्प्रयोजनत्वेन नार्थवादसार्थकत्वमिति वाच्यम्। आलस्यादिवशात् अप्रवर्तमानस्य पुंसः प्रवृत्तिजनकत्वेन तद्बोधस्योपयोगादिति न किञ्चिदपि हीनम् ॥ ९४ ॥

अर्थवादस्त्रिधेत्युक्तम् तद्विवृणोति—गुणेति। विरोधे गुणवादः, अवधृते अनुवादः, तदुभयरहिते च भूतार्थवाद इति योजना। एतदेवोक्तं वृद्धैः—"विरोधे गुणवादः स्यादनुवादोऽवधारिते। भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः"॥ इति। अस्यार्थः—प्रमाणान्तरविरोधे सत्यर्थवादो गुणवादः। यथा "आदित्यो यूप" इत्यादिः। अत्र यूपे आदित्याभेदस्य प्रत्यक्षबाधितत्वात् आदित्यवदुज्ज्वलत्वरूपगुणोऽनेन लक्षणया प्रतिपाद्यते। प्रमाणान्तरावगतार्थबोधकोऽनुवादः। यथा "अग्निर्हिमस्य भेषजम्" इत्यादिः। अत्र हि अग्नेर्हिमविरोधित्वं प्रत्यक्षेणावगतम्। प्रमाणान्तरविरोधतदवगतिरहितार्थबोधकोऽनुवादः, यथा "इन्द्रो वृत्राय वज्रमुदयच्छत्" इत्यादिः। अत्र तावत् भारतरामायणादाविव वृत्तान्तः कश्चिदविरुद्धः प्रतीयते प्रमाणान्तरेणाप्राप्तश्च न त्वनुष्ठेयं किञ्चित् प्रतीयते अतो भूतार्थवादः। त्रिविधानामेषां विधिनिषेधस्तुतिनिन्दापरत्वे समानेऽपि गुणवादानुवादयोर्बाधितविषयत्वात् ज्ञातज्ञापकत्वाच्च स्वार्थे प्रामाण्याभावः। भूतार्थवादस्य तु स्वार्थे प्रामाण्यं न वारयितुं शक्यते, स्वतःप्रामाण्यवादे तस्यौत्सर्गिकत्वादित्यवधेयम् ॥ ९५ ॥

स्वर्गिणस्तापत्रयमाह—स्वर्गीत्यर्धपद्येन। क्षयतापोऽतिशयतापः साहसता-

तथागामि संचितं च वेदान्तेषु मनीषिभिः।
मनोवाक्कायभेदेन दण्डेन स्युस्त्रिदण्डिनः॥ ९७॥

---

४ अथ वक्ष्ये चतुर्भेदाः संज्ञाः शिष्यहिताय वै।
प्रज्ञामान्द्यं कुतर्कश्च विपर्ययदुराग्रहः॥ ९८॥

पश्चेत्यर्थः। तद्यथा—स्वार्जितधनक्षयेण मानवानां मनोविकारात्मकस्तापो यथा तथा भोगेन पुण्यकर्मक्षये स्वर्गिणां पुनःपतनभीतिजस्तापः स एव क्षयतापः। तथा स्वर्गलोकगमनसमये स्वाधिकतरदेवतास्थापितलोकदर्शनेन यस्तापः सोऽतिशयतापः। तथा पुण्यकर्मक्षयानन्तरं सुरकोटिभिर्मुद्गरमुसलादिप्रहारेणेव कम्पितसर्वाङ्गतया पतनं तज्जनिततापेन वा घृतकाठिन्यविलयनवत् स्वर्गिदेहविलयनं साहसताप इत्युच्यते। अयं पतनतापोऽप्युच्यते। कर्मत्रयमाह—कर्मेति। शरीरारम्भकं कर्म प्रारब्धम्। प्रारब्धकर्मफलभोक्ता सन् मरणपर्यन्तं कृतं पुण्यपापरूपं कर्म आगामीत्युच्यते। जन्महेतुभूतं स्थितं पूर्वजन्मकृतं कर्म सञ्चितमिति कर्मत्रयविवेकः॥ ९६॥

दण्डत्रयं त्रिदण्डीशब्दस्यार्थं चाह पद्यशेषेण—मन इति। मनोदण्डः, वाग्दण्डः, कायदण्डश्चेति त्रिविधो दण्डो येषां ते त्रिदण्डिनः। अत्रोक्तं दक्षेण "वाग्दण्डे मौनमातिष्ठेत्कायदण्डे त्वनीहता। मानसस्य तु दण्डस्य प्राणायामो विधीयते"। अत्र मौनादीनां वागादिदमनहेतुत्वाद्दण्डत्वमिति। त्रिदण्डसंन्यासापेक्षया एकदण्डसंन्यासस्य श्रेष्ठत्वमुक्तं परमहंसोपनिषदि—"ज्ञानदण्डो धृतो येन एकदण्डी स उच्यते। काष्ठदण्डो धृतो येन सर्वाशी ज्ञानवर्जितः। स याति नरकान् घोरान् महारौरवसंज्ञकान्" इति। अत्र अज्ञानतत्कार्ययोर्दमनहेतुत्वात् ज्ञानस्यापि पृथक् दण्डत्वमुक्तम्। अयं ज्ञानदण्डो येन धृतः स संन्यासी एव मुख्य एकदण्डीत्युच्यते। मानसस्य तु ज्ञानदण्डस्य चित्तविक्षेपेण विस्मृतिर्मा भूदिति तत्स्मारकः काष्ठदण्डो ध्रियते। स यदि ज्ञानवर्जितः सर्वाशी च स्यात् तदा नरकान् याति प्राप्नोति इति योजना। सर्वाशी वर्ज्यावर्ज्यमविचार्य सर्वमश्नातीति सर्वाशी। वेषमात्रेण पुरुषार्थसिद्धिमभिप्रेत्य येन काष्ठदण्डो धृतः स एव नरकान् याति न तु ज्ञानिन इति भावार्थः॥ ९७॥

अथेति। अथ त्रिभेदसंज्ञासंकलनानन्तरं शिष्याणां हिताय चतुर्भेदाः संज्ञा वक्ष्ये इति योजना। गुरुणा बोधितस्याप्यर्थस्य बुद्ध्या अग्रहणं प्रज्ञामान्द्यम्। प्रज्ञाया बुद्धेर्मान्द्यं मन्दीभावः अतीक्ष्णतेति यावत्। प्रतिपादितस्यार्थस्य वैपरी-

विषयासक्तिरेतद्वै प्रतिबन्धचतुष्टयम् ।
ज्ञाने तस्य निवृत्तिः स्यात् श्रवणाद्यैर्यथायथम् ॥ ९९ ॥
शब्दप्रवृत्तौ चत्वारि निमित्तान्यूचिरे पृथक् ।
जातिर्गुणः क्रिया चैव सम्बन्धश्चेति शाब्दिकैः ॥ १०० ॥
ब्रह्मचर्यं च गार्हस्थ्यं वानप्रस्थश्च नामतः ।
संन्यासश्चेति जानीयादाश्रमाणां चतुष्टयम् ॥ १०१ ॥

त्येन ग्रहणं कुतर्कः । विपर्यये अनात्मन्यात्मत्वबुद्धौ दुराग्रहः अत्यभिनिवेशो विपर्ययदुराग्रहः । अहं मेधावी श्रोत्रियः पण्डितोऽहं विरक्तोऽहमिति देहेन्द्रियादावभिमानितेति यावत् । विषये रूपरसादौ रूढा आसक्तिर्विषयासक्तिः । ज्ञाने ज्ञानोत्पत्तौ वै प्रसिद्धं एतत् प्रतिबन्धचतुष्टयं विद्यत इति योजनीयम् । तस्य चतुष्टयस्य निवृत्तिस्तु श्रवणमननिदिध्यासनशमादिषट्कैः यथायथं स्यात्, स्यादिति शेषः । तत्रायं विवेकः—श्रवणेन प्रज्ञामान्द्यं, मननेन प्रोक्तलक्षणः कुतर्कः, निदिध्यासनेन विपर्ययदुराग्रहः, शमादिषट्कैः विषयासक्तिर्निवर्तते ॥ ९८ ॥ ९९ ॥

शब्दप्रवृत्तिनिमित्तचतुष्टयमाह—शब्द इति । शब्दप्रवृत्तौ नामोत्पत्तौ निमित्तं कारणं पदशक्यतावच्छेदकमिति यावत् । तच्च क्वचिज्जातिः, क्वचिद्गुणः, क्वचित्क्रिया, क्वचित्सम्बन्धश्चेति ॥ १०० ॥

आश्रमचतुष्टयमाह—ब्रह्मेति । अवान्तरभेदमविवक्षित्वैवमुक्तम् । तद्विवक्षा चेत्तदा तदनैकध्यमेव । तद्विशोधनार्थमेवात्र कात्यायनस्मृतिरर्थतोऽनुक्रम्यते— "गायत्र्यो ब्राह्मः प्राजापत्यो बृहन्निति" ब्रह्मचारी चतुर्विधः । तत्र उपनयनादूर्ध्वं यस्त्रिरात्रमक्षारलवणाशी गायत्रीमधीयते स गायत्र्यः । यस्तु ब्रह्मणो वेदस्य ग्रहणान्तं ब्रह्मचर्यं चरति स ब्राह्मः । यश्च गृही सन् ऋतुकाले स्वदाराभिगामी नित्यं परस्त्रीविमुखः स प्राजापत्यः, संवत्सरं वेदव्रतकृतबटुर्वा प्राजापत्यः । आमरणं गुरुकुलवासी नैष्ठिको बृहन्नित्युच्यते । गृहस्थोऽपि चतुर्विधः, वार्ताकः शालीनो यायावरः घोरसंन्यासिकश्चेति । तत्र कृषिगोरक्षादिकया वैश्यादिवृत्त्या जीवन् नित्यनैमित्तिकादिक्रियापरो वार्ताक इत्युच्यते । यायावरस्तु अयाचितवृत्तिर्याजनाध्यापनप्रतिग्रहविमुखः । शालीनस्तु गृहस्थः षट्कर्मनिरतो याजनादिवृत्तिः । संचीय उद्धृतपरिभूताभिरद्भिः कार्यं कुर्वन् प्रत्यहं कृतोञ्छवृत्तिः ग्रामवासी घोरसंन्यासिक इत्युच्यते, हिंसाविमुखत्वात् । वानप्रस्थोऽपि चतुर्विधः, वैखानस उदुम्बरो वालखिल्यः फेनपश्चेति । तत्र अकृष्टपच्यौषधिभिर्ग्रामबहिष्कृताभिरग्निहोत्रादि कर्म कुर्वन् वैखानस इत्युच्यते । यस्तु प्रातरुत्थाय यां दिशं

नित्यानित्यविवेकश्च फलभोगविरागिता ।
शमादिषट्कसंपत्तिर्मुमुक्षा च तथाऽपरा ॥ १०२ ॥
इत्युक्तमात्मशास्त्रेषु साधनानां चतुष्टयम् ।
तद्वतामधिकारित्वमात्मब्रह्मविचारणे ॥ १०३ ॥
विषयश्चाधिकारी च सम्बन्धश्च प्रयोजनम् ।
वेदान्तेषु प्रसिद्धं स्यादनुबन्धचतुष्टयम् ॥ १०४ ॥

पश्यति तत्रोदुम्बरबदरनीवारश्यामाकैः कर्मपरः स उदुम्बरः । यस्तु जटावल्कलधारी अष्टौ मासान् वृत्त्युपार्जनं कृत्वा चातुर्मास्ये संगृहीताशी कार्तिक्यां संगृहीतपुष्पफलत्यागी स वालखिल्यः । फेनपस्तु शीर्णफलवृत्तिः यत्र क्वचिद्वसन् स्वकर्मनिरतः । एवं परिव्राजकोऽपि चतुर्विधः—कुटीचको बहूदको हंसः परमहंसश्चेति । तत्र स्वपुत्रपौत्रगृहे भिक्षां चरन्तस्त्रिदण्डिनः कुटीचकाः । बहूदकास्तु त्रिदण्डिनः शिक्यजलपवित्रपादुकासनाः शिखायज्ञोपवीतकौपीनकाषायवेशधरास्तीर्थान्यटन्तो भैक्ष्यं चरन्त आत्मानं प्रार्थयन्ते । हंसा एकदण्डिनः शिखावर्जं यज्ञोपवीतधराः शिक्यकमण्डलुपाणयः ग्रामैकरात्रवासिनः कृच्छ्रचान्द्रायणादिव्रतपराः । परमहंसास्तु एकदण्डधरा मुक्ता अयज्ञोपवीतिनः त्यक्तसर्वधर्माणः केवलमात्मनिष्ठा इति बहवो भेदाः । एतानेव भेदान् मनसिकृत्य ब्रह्मसूत्रकारस्तृतीयाध्यायचतुर्थपादीयाष्टादशसूत्रे बहुवचनं प्रयुक्तवानिति ॥ १०१ ॥

साधनचतुष्टयमाह—नित्येति । यदल्पं तन्मर्त्यं यत्कृतकं तदनित्यमिति विवेचनं नित्यानित्यविवेकः । अनात्ममात्रस्य क्षयिष्णुत्वादैहिकामुष्मिकभोगवितृष्णत्वं फलभोगविरागिता । शमो दम उपरतिस्तितिक्षा समाधानं श्रद्धा चेति शमादयः षट् । तेषां सम्पत्तिः सिद्धिः । तत्र लौकिकव्यापारात् मनस उपरमः शमः । बहिरिन्द्रियाणामुपरमो दमः । ज्ञानार्थं विहितनिषिद्धकर्मसंन्यास उपरतिः । शीतोष्णादिद्वन्द्वसहनं तितिक्षा । निद्रालस्यप्रमादपरित्यागेनैकस्मिन् ध्येये मनसः स्थितिः समाधानम् । मुमुक्षा मोक्षेच्छा ॥ १०२ ॥

इत्युक्तमिति । आत्मशास्त्रेषु वेदान्तेषु । तद्वतां विवेकवैराग्यशमदमादिमताम् ॥ १०३ ॥

अनुबन्धचतुष्टयमाह—विषयश्चेति । विषयो जीवब्रह्मैक्यम्, वेदान्तशास्त्रस्य इति शेषः । अधिकारी साधनचतुष्टययुक्तः । सम्बन्धः जीवब्रह्मैक्यस्य तत्प्रतिपादकोपनिषदश्च बोध्यबोधकभावलक्षणः । प्रयोजनं तदैक्यप्रमेयगताज्ञाननिवृत्तिः । स्वरूपानन्दाभिव्यक्तिरिति केचित् । अत्रानुबन्धशब्दो वेदान्तविचाराधिकारप्रयोजकरूप इति बोद्धव्यम् ॥ १०४ ॥

मनो बुद्धिरहंकारश्चित्तं चैतच्चतुष्टयम् ।
आन्तःकरणिकं भेदं वृत्तिभेदाद्विदुर्बुधाः ॥ १०५ ॥
प्रत्यक्षमनुमानं च तथोपमानशब्दकौ ।
प्रमाणानां चतुष्कं स्यात्प्रमाणं करणं मितेः ॥ १०६ ॥
वृत्तिरैन्द्रियके या स्यात्संनिकर्षप्रभावतः ।
तत्तद्विषयसंसृष्टा सा प्रत्यक्षमिति स्थितिः ॥ १०७ ॥

अन्तःकरणचतुष्टयं संकल्पादिवृत्तिचतुष्टयं चाह—**मन इति** । बुधाः पण्डिता मनआदिचतुष्टयं आन्तःकरणिकं अन्तःकरणसम्बन्धिभेदं वृत्तिभेदादेवेति विदुः जानन्ति । एकमप्यन्तःकरणं वृत्तिभेदाच्चतुर्विधमिति विशदार्थः । तथाहि—संकल्पवृत्तिरूपेण परिणतमन्तःकरणं मनः मननात्मकं वा । संकल्पवृत्तिहेतुर्वा मनः संकल्पः । निश्चयवृत्तिरूपेण परिणतमन्तःकरणं बुद्धिः । निश्चयात्मिका वा बुद्धिः निश्चयहेतुर्वा बुद्धिरध्यवसायः । अभिमानवृत्तिरूपेण परिणतमन्तःकरणं अहंकारः । अभिमानाकारा अभिमानकरी वा बुद्धिवृत्तिरहंकारः । पूर्वोत्तरानुसन्धानरूपवृत्तिमदन्तःकरणं चित्तम् । अनुसन्धानात्मकं अनुसन्धानकरं वेति विवेकः ॥१०५॥

प्रमाणचतुष्टयमाह—**प्रत्यक्षमिति** । मितिः प्रमितिः प्रमा ज्ञानमिति पर्यायाः । तथाच यत् मितेः प्रमायाः करणं व्यापारवत्कारणं साधकतममिति यावत् तत्प्रमाणम् । एतेन प्रमितिकरणत्वं प्रमाणत्वमिति प्रमाणलक्षणं पर्यवसितम् । एतच्च प्रत्यक्षादिभेदेन चतुर्विधम् । उपमानं च शब्दश्चेति द्वन्द्वे "परं लिङ्गं द्वन्द्वतत्पुरुषकर्मधारयेषु" इत्यनुशासनात्पुंलिङ्गता ॥ १०६ ॥

प्रत्यक्षं वर्णयति—**वृत्तिरिति** । संनिकर्षप्रभावतः संनिकर्षसामर्थ्यात्तत्तद्विषयावच्छिन्नचैतन्यसंसृष्टा या ऐन्द्रियकी इन्द्रियसम्बन्धिनी वृत्तिरन्तःकरणस्य तत्तद्विषयाकारा परिणतिः सा प्रत्यक्षम् । इति स्थितिः सिद्धान्तः । संनिकर्षः संसर्गः संयोगतादात्म्यादिरूपः । अत्रेदं बोद्धव्यम्—प्रत्यक्षशब्दः प्रमाप्रमाणोभयपरः । तत्र प्रमापक्षे प्रतिगतमक्षमिति व्युत्पत्तिः, प्रमाणपक्षे तु अक्षस्य अक्षस्य प्रति विषयं वृत्तिरिति व्युत्पत्तिः । अक्षमिन्द्रियम् । ज्ञानं हि नाम द्विविधम् । परोक्षमपरोक्षं चेति । तत्र यदपरोक्षं तत्प्रत्यक्षमित्युच्यते । तच्च विषयेन्द्रियसंनिकर्षजनितं विषयदेशेऽन्तःकरणवृत्त्यभिव्यक्तविषयचैतन्यमेव । अत एव हि दर्शनान्तरेषु "इन्द्रियार्थसंनिकर्षजं ज्ञानं प्रत्यक्षं" इत्याहुः । यत्र तु संनिकर्षाभावात् विषयदेशे वृत्तिनिर्गमाभावः तत्र परोक्षमेव ज्ञानम् । अत्र वैदान्तिका एवमाहुः—शब्दानुमानावगतेभ्यः प्रत्यक्षावगते तावदतीव स्पष्टतानुभूयते । न

हि रसालपरिमलादिविशेषे शतवारमाप्तोपदिष्टेऽपि प्रत्यक्षावगत इव स्पष्टतास्ति। सा च स्पष्टता प्रमाणप्रमेयचैतन्ययोरभेदादेव जायते। यदेव हि ब्रह्मनामकं नित्यचैतन्यं तदेवान्तःकरणवृत्त्यवच्छेदेन प्रमाणचैतन्यं तथा विषयावच्छेदेन प्रमेयचैतन्यमित्युच्यते। प्रमेयचैतन्यं विषयचैतन्यमित्यनर्थान्तरम्। तयोरभेदो वृत्तिनिर्गमद्वारेण सिद्ध्यति। यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान्प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति, तथा अतिस्वच्छतैजसद्रव्यत्वेन शीघ्रप्रसारिसात्त्विकमन्तःकरणं संनिकर्षबलात् चक्षुरादिद्वारा निर्गत्य तत्तद्विषयदेशं प्राप्य तत्तद्विषयाकारं भवति। एतदेव ह्यस्मिन् दर्शने वृत्तिनिर्गमशब्देनोच्यते। तथा चायं घट इत्यादिप्रत्यक्षस्थले घटादेस्तदाकारवृत्तेश्च बहिरेकस्मिन् देशे सहावस्थानात्तदुभयावच्छिन्नचैतन्ययोरेकीभावो भवति। परिभाषाकारोऽप्येवमेवाह। यथा च लोके स्वच्छतरस्फटिकमणिप्रतिफलितः सौरालोकः स्वसंक्रान्त्या भित्तिगतमालोकसामान्यं द्विगुणीकृत्येव तद्गतमतिनिबिडमपि तमो निरवशेषमपनुद्य भित्तिं विस्पष्टयत्युज्ज्वलयति वा, तथा वृत्तिप्रतिफलितचैतन्यमपि स्वसंक्रान्त्या तत्तद्विषयावच्छिन्नचैतन्यं द्विगुणीकृत्येव तद्गतमज्ञानमशेषतो निहत्य तत्स्पष्टतामापादयत्येव। एतदेव रहस्यं हृदये कृत्वा केचित्साक्षिचैतन्यसंसर्गिषु अहंकारसुखदुःखादिष्वापरोक्ष्यं सदाकृतमिति घटादावपि विषयसंसृष्टमेव चैतन्यमापरोक्ष्यहेतुरिति विषयावच्छिन्नब्रह्मचैतन्याभिव्यक्तये वृत्तिनिर्गमं समर्थयन्ते। अपरे त्वभिव्यक्तस्यैव स्वप्रकाशचैतन्यस्य तादात्म्यात्प्रत्यक्षग्राह्ये स्पष्टता, अनुमानादिगम्ये तदभावादस्पष्टतेत्याहुः। तथा शाब्दवृत्तिवेद्यस्यापि ब्रह्मणो मननात्प्राक् अज्ञानानिवृत्त्या चास्पष्टता, तदनन्तरं तन्निवृत्तौ स्पष्टतेति वृत्तिनिर्गममुपपादयन्ति। अन्ये तु विषयगताज्ञानस्य लाघवात्समानाधिकरणाज्ञाननिवर्तकत्वसिद्धौ वृत्तिनिर्गममेव साधयन्ति। अन्ये पुनः बाह्यप्रकाशस्य बाह्यतमोनिवर्तकत्वं सामानाधिकरण्ये सत्येव दृष्टमिति दृष्टान्तानुरोधाद्विषयदेशे वृत्तिनिर्गमः सिध्यतीत्याहुः। एकदेशिनस्तु आवरणाभिभवार्थं वृत्तिनिर्गमानपेक्षायामपि चिदुपरागार्थं प्रमातृचैतन्यस्य विषयप्रकाशकब्रह्मचैतन्याभेदाभिव्यक्त्यर्थं वा तदपेक्षेत्याहुः। भगवान् वशिष्ठोऽपि "उपलम्भो हि सदृशसम्बन्धादुपजायते" इत्याह। सदृशयोः प्रमातृप्रमेयचैतन्ययोर्वृत्तिद्वारकादैक्यसम्बन्धात् उपलम्भः प्रत्यक्षं जायत इति वशिष्ठवचनार्थः। सर्वथा हि चैतन्ययोर्वृत्तिद्वारकमैक्यं प्रत्यक्षमिति प्रत्यक्षलक्षणं नाति वर्तते। परिभाषाकारेणापि "न हि इन्द्रियजन्यत्वेन ज्ञानस्य साक्षात्त्वं, अनुमित्यादेरपि मनोजन्यतया साक्षात्त्वापत्तेः" इत्याद्युक्त्वा साक्षात्कारापरनाम-

करणं यत्त्वनुमितेरनुमानं तदेव हि ।
व्याप्तिज्ञानभवं ज्ञानमनुमित्यभिधं विदुः ॥ १०८ ॥
व्याप्तिज्ञानं तु करणं व्यापारस्तत्र संस्कृतिः ।
एवं वेदान्तिनः प्राहुरथैवं व्याप्तिलक्षणम् ॥ १०९ ॥

प्रत्यक्षस्य प्रयोजकपृच्छायां वृत्तिद्वारकश्चैतन्ययोरभेद एव प्रत्यक्षप्रयोजक इति सिद्धान्तितमिति दिक् ॥ १०७ ॥

क्रमप्राप्तमनुमानं वर्णयति—करणमिति । अनुमीयते अनेनेत्यनुमानम् । करणे ल्युट् । यत् अनुमितेः करणं व्यापारवदसाधारणकारणं तत् हि प्रसिद्धमनुमानमित्यन्वयः । एवं चानुमितिकरणमनुमानमित्यनुमानलक्षणमायातम् । अनुमानघटकानुमितिलक्षणमाह—व्याप्तिज्ञानभवमिति । व्याप्तिज्ञानभवं व्याप्तिज्ञानजन्यम् अनुमितिरभिधा नाम यस्य तत् । विदुः पण्डिता जानन्ति । अत्र [1]व्याप्तिज्ञानत्वेन व्याप्तिज्ञानजन्यज्ञानमनुमितिरित्येव वक्तव्यम् । तेन व्याप्तिज्ञानानु[2]व्यवसायादौ नातिप्रसङ्गस्तेषां [3]तत्त्वेन तज्जन्यत्वाभावात् ॥ १०८ ॥

ननु तादृशव्याप्तिज्ञानस्यानुमितिजनकत्वमात्रमुत तत्करणत्वमित्याशङ्कयाह—व्याप्तिज्ञानं त्विति । एतेन "व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिः, तत्करणमनुमानं, तच्च तृतीयलिङ्गपरामर्शः[4]" इति यत् दर्शनान्तरमतं तन्नानुमतं वेदान्तिनामिति दर्शितं भवति । व्याप्तिज्ञानस्यैव तत्करणसम्भवे तद्व्यतिरिक्तपरामर्शाङ्गीकारानौचित्यात् । उपलक्षणमिदम् । तेन लिङ्गमनुमितिकरणं तत्परामर्शोऽवान्तरव्यापार इत्यपि परमतमननुमतमेव । विनष्टस्यानागतस्य च लिंगस्य तदानीमभावेन ततो[5]ऽप्यनुमित्यापत्तेः । तस्मादनुमितिकरणत्वाद्व्याप्तिज्ञानमेवानुमानशब्दाभिधेयं न तु लिंगतत्परामर्शाविति सिद्धमेव । ननु व्याप्तिज्ञानस्य

---

१ व्याप्तिज्ञानत्वेन न तु विषयत्वादिना इति भावः । २ अत्रादिपदं तज्जन्यस्मृतिशाब्दज्ञानादिसंग्रहार्थम् । ३ अनुव्यवसायस्मृतिशाब्दज्ञानादिषु विषयत्व—समानविषयाद्भवत्व—पदार्थज्ञानत्वादिना हेतुत्वात् तत्त्वेनाहेतुत्वमिति तात्पर्यार्थः । ४ महानसादौ धूमादिज्ञानं प्रथमं, पक्षे ततो द्वितीयम्, ततो व्याप्तिं स्मृत्वा पक्षे धूमादिपरामर्शात्मकं ज्ञानं तृतीयम्, ततो वन्ह्याद्यनुमितिरिति तृतीयलिङ्गपरामर्शात्मकज्ञानमनुमितिकरणमिति नैयायिकानां पक्षः । अत्र हि पक्षधर्मताज्ञानद्वारा उद्बुद्धे संस्कारे व्याप्तिज्ञानस्यान्वयव्यतिरेकाभ्यामनुमितिजनकत्वाभ्युपगमस्यावश्यकतया तद्रहितस्य परामर्शस्य तद्धेतुत्वासिद्ध्या तत्करणत्वस्य दूरनिरस्तत्वमित्यरुचिकारणं तत्र वेदान्तिकानामित्यवधेयम् । ५ योग्यलिङ्गकानुमितौ परामर्शस्य व्यापारत्वासम्भवेन तत्करणत्वासम्भवतया व्यभिचारात् लिङ्गं नानुमितिकरणमित्यप्यनुसन्धातव्यम् ।

अशेषसाधनाधाराश्रितं यत्साध्यमुच्यते ।
तेन हेतोः समं व्याप्तिः सामानाधिकरण्यकम् ॥ ११० ॥
अदृष्टव्यभिचारस्य सहचारस्य दर्शनात् ।
जायते तद्ग्रहः पुंस इति वेदान्तिनां मतम् ॥ १११ ॥

करणत्वे तद्व्यापारो वक्तव्यो, व्यापारवदसाधारणकारणस्यैव करणत्वात् इत्यभिप्रेत्य आह—व्यापारस्तत्रेति । व्यापारस्तज्जन्यत्वे सति तज्जन्यजनकः । संस्कृतिः संस्कारः, व्याप्तिज्ञानसंस्कार इत्यर्थः । न च संस्कारजन्यं ज्ञानं स्मृतिरिति स्मृतिलक्षणं, तस्य चानुमितावप्यनुगमादनुमित्यात्मकज्ञानस्यापि स्मृतित्वापत्तिरिति वाच्यम् । संस्कारमात्रजन्यत्वस्य स्मृतित्वप्रयोजकतया संस्कारध्वंससाधारणसंस्कारजन्यत्वस्य तदप्रयोजकत्वात् । न च यत्र व्याप्तिस्मरणादनुमितिस्तत्र तस्याः संस्कारजन्यत्वं व्यभिचरितं, व्याप्तिस्मृत्या संस्कारनाशादिति वक्तव्यम् । व्याप्तिस्मृतिजन्यानुमितिस्थलेऽपि संस्कारनाशानभ्युपगमेन व्यभिचाराभावात् । न हि स्मृतेः संस्कारनाशकत्वनियमोऽस्ति, स्मृतिधारादर्शनात् । न च संस्कारस्यानुमितिहेतुत्वे ऽनुद्बुद्धादपि तस्मादनुमितिप्रसङ्ग इति वाच्यम् । तदुद्बोधस्यापि[1] सहकारित्वात् । तथा च पर्वतोऽयं धूमवानिति पक्षधर्मताज्ञाने[2] धूमो वह्निव्याप्य इत्यनुभवाहितसंस्कारस्योद्बोधे च सति वह्निमानित्यनुमितिर्भवति, न तु मध्ये व्याप्तिस्मृतिस्तज्जन्यं वा वह्निव्याप्यधूमवानयमिति विशेषणविशिष्टज्ञानं परामर्शाभिधेयमनुमितिहेतुत्वेन कल्पनीयं, गौरवात् मानाभावाच्चेति निर्गलितार्थः ॥ १०९॥

व्याप्तिं लक्षयति—अशेषेति । अशेषं तत्तत् साधनं तस्य आधार आश्रयस्तदाश्रितं यत्साध्यं तेन समं सह हेतोः सामानाधिकरण्यं व्याप्तिरित्यक्षरार्थः । उच्यते मनीषिभिरिति योजना । अत्र साधनतावच्छेदकावच्छिन्नसाधनाश्रयाश्रितसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति[3] समुदायार्थः । एवं च सति यत्किञ्चित् वन्ह्यादिसाधनाश्रयाश्रितयत्किञ्चिद्धर्मादिविशिष्टसाध्यसामानाधिकरण्यमादाय पर्वतो धूमवान् वन्हेरित्याद्यसद्धेतौ नातिप्रसङ्गः॥ ११० ॥

एवं भूता व्याप्तिर्येन गृह्यते तदिदानीमाह—अदृष्टेति । व्यभिचारादर्शने सति सहचारदर्शनेन गृह्यते इत्यर्थः ॥ १११ ॥

---

१ तदुद्बोधस्य पक्षधर्मताज्ञानजन्यस्य संस्कारोद्बोधस्य । २ व्याप्यस्य पक्षवृत्तित्वं पक्षधर्मता । व्याप्यं हेतुः । ३ अत्र प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यत्र भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिरिति नैयायिकानां वाक्यरचना । यत् धूमः । प्रतियोगितावच्छेदकं घटत्वा-

परार्थस्वार्थभेदेन तद्द्वैविध्यमिहोच्यते ।
परार्थं न्यायसाध्यं तु स्वार्थं प्रागुक्तमेव हि ॥ ११२ ॥
न्यायोऽवयवितं वाक्यं त्रयस्तेऽवयवास्त्विह ।
प्रतिज्ञाद्यास्त्रयो वा स्युरुदाहारमुखा इति ॥ ११३ ॥

एवमनुमानं लक्षयित्वा परार्थस्वार्थभेदेन तद्द्वैविध्यमाह–परार्थेति । तस्य यथोक्तलक्षणानुमानस्य द्वैविध्यं द्विविधत्वं इह अस्मिन् वेदान्तशास्त्रे उच्यते । वेदान्तविद्भिरिति शेषः । तत्र तयोर्मध्ये परार्थं परविवादविषयार्थसाधकं न्यायसाध्यं न्यायप्रयोज्यमित्यर्थः । यत्तु स्वार्थं स्वविवादगोचरार्थसाधकं तत्प्राक् पूर्वोक्तकारिकायां उक्तमभिहितम् । हि अवधारणे । तच्च निरुक्तव्याप्तेर्ज्ञानमेव । तथा च वक्ष्यमाणलक्षणन्यायजन्यज्ञानप्रयोजकं व्याप्तिज्ञानं परार्थानुमानमिति निर्गलितार्थः ॥ ११२ ॥

न्यायशब्दार्थमाह–न्यायोऽवयवितमिति । अवयवा विद्यन्तेऽत्रेत्यवयवितम् । वक्ष्यमाणावयवघटितमहावाक्यमिति यावत् । वस्तुतस्तु अनुमानप्रयोजकवाक्यार्थज्ञानजनकवाक्यत्वं न्यायत्वमिति तल्लक्षणं विस्पष्टम् । कति अवयवा इत्यपेक्षायामाह–त्रय इति । अवयवास्तावत् इह अस्मिन् शास्त्रे त्रय एव । ते च प्रतिज्ञाद्याः प्रतिज्ञाहेतूदाहरणानीति त्रयः । उत अथवा उदाहारमुखाः उदाहरणाद्यास्त्रयः स्युः । उदाहरणाद्या उदाहरणोपनयनिगमनानि । अत्र यत् शिवदत्ताचार्येण प्रतिज्ञादीनां पञ्चानां लक्षणमुक्तं तदेवानुक्रम्य लिख्यते । साध्यतावच्छेदकावच्छिन्नसाध्यविषयताविलक्षणविषयताकबोधाजनकत्वे सति प्रकृतपक्षे प्रकृतसाध्यबोधजनकमहावाक्यैकदेशत्वं प्रतिज्ञावयवत्वं, यथा पर्वतो वह्निमानित्यादि । साध्यतावच्छेदकावच्छिन्नसाध्यान्वितस्वार्थकताद्दशैकदेशत्वं हेत्ववयवत्वं, यथा धूमादिति । साधनवत्ताप्रयुक्तसाध्यवत्तानुभावकोक्तावयवत्वं उदाहरणावयवत्वं, यथा यो यो धूमवान् स स वह्निमान् यथा महानस-मिति । प्रकृतोदाहरणोपदर्शितव्याप्तिविशिष्टपक्षबोधजनकन्यायैकदेशत्वमुपनयावयवत्वं, यथा वह्निव्याप्यधूमवांश्चायं तथा चायमिति । व्याप्तिविशिष्टपक्षधर्महेतुज्ञाप्यसाध्यविशिष्टपक्षबोधकन्यायैकदेशत्वं तादृशसाध्यबोधकन्यायैकदेशत्वं वा निगमनावय-

दिकं, तदवच्छिन्नं घटादिकं, तद्भिन्नवह्निरूपं साध्यम् । तेन वह्निना समं सह तस्य धूमस्य । इति निरुक्तवाक्यघटकपदानामर्थः ।

१ हेतुवाक्यार्थक । २ पञ्चम्या ज्ञाप्यत्वमर्थः । धूमज्ञानज्ञाप्यो वह्निः । वह्निः धूमज्ञानजन्यज्ञानविषय इति यावत् ।

या सादृश्यप्रमा ख्याता सैवोपमितिसंज्ञिका ।
करणं तत्र यत्तत्स्यादुपमानप्रमाणकम् ॥ ११४ ॥
तथा च दृष्ट गोः पुंसो दृष्ट्वा गवयपिण्डकम् ।
प्रथमं जायते बुद्धिरयं गोसदृशस्त्वथ ॥ ११५ ॥

वत्वं, यथा तस्मादग्निमानिति । अत्रैवं विवेक्तव्यं–प्रथमपक्षे उपनयनिगमनकृत्यं हेतुप्रतिज्ञाभ्यां, द्वितीये तु पक्षे हेतुप्रतिज्ञाकृत्यं उपनयनिगमनाभ्यां कर्तुं शक्यम् । उपयोगिज्ञानं च सर्वावयवकृत्यमिति ॥ ११३ ॥

उपमानं विवेचयति–येति । अत्राप्युपमीयते अनेनेत्युपमानमिति व्युत्पन्न उपमानशब्दो लक्षणं, अव्युत्पन्नस्तु लक्ष्यम् । या सादृश्यप्रमा सैव उपमितिरिति सादृश्यप्रमोपमित्योर्घटकलशवत्पर्यायता अभिहिता । तथा च उपमितिप्रमायाः करणमसाधारणकारणमुपमानमित्यर्थः स्यात् । तदेतदुपमानमुदाहरणेन विशदयति–तथा चेति । दृष्टा गौर्येन सः दृष्टगुस्तस्य पुंसः पुरुषस्य कदाचित् वनं गतस्य गवयपिण्डं गवयाख्यपशुं दृष्ट्वा प्रथममादौ भवत्येतादृशी मतिः अयं गोसदृशः गोभिन्नत्वे सति गोगतबहुधर्मवानिति । अथ अनन्तरं अनेन सदृशी मदीया गौरिति निश्चयो जायते । तयोर्मध्ये प्रथमं "अयं गोसदृशः" इति गोनिरूपितगवयपिण्डनिष्ठसादृश्यज्ञानं करणं, द्वितीयं तु "अनेन सदृशी मदीया गौः" इति गवयपिण्डनिरूपितगोनिष्ठसादृश्यज्ञानं फलं प्रमितिरिति यावत् । अत्र प्रथमज्ञाने जाते सति द्वितीयज्ञानस्योपदर्शनात् तद्विना तदभावात् इत्यन्वयव्यतिरेकाभ्यां प्रथमज्ञानस्योपमानत्वं द्वितीयज्ञानस्योपमितित्वमिति स्थितिः । न चास्य प्रत्यक्षेण गतार्थता । गोपिण्डस्य तदेन्द्रियासंनिकर्षात् । यदा हि गवयप्रतियोगिकगोनिष्ठसादृश्यज्ञानं जायते तदा गोपिण्डेनेन्द्रियसंनिकर्षो नास्तीति तज्ज्ञानं न प्रत्यक्षप्रमाणफलमिति निश्चेतव्यम् । यत्तु तत्त्वकौमुद्यां "गवयस्य चक्षुःसंनिकृष्टस्य गोसादृश्यज्ञानं तत्प्रत्यक्षमेव । अत एव स्मर्यमाणायां गवि गवयसादृश्यज्ञानं प्रत्यक्षम् । न ह्यन्यत् गवि सादृश्यमन्यच्च गवये । भूयोऽवयवसामान्यसंयोगो जात्यन्तर्वर्तिजात्यन्तरे सादृश्यमुच्यते सामान्ययोगश्चैकः । स चेत् गवये प्रत्यक्षो, गव्यपि तथा इति नोपमानस्य प्रमाणान्तरत्वमस्ति" इत्यभिहितं तन्न वेदान्तिनां तोषमावहति । प्रोक्तविधया रीत्या सादृश्यैकत्वेऽपि प्रतियोगिधर्मिभेदेन भेदस्याभ्युपगन्तव्यत्वात् । इन्द्रियसंनिकृष्टगवयनिष्ठसादृश्यज्ञानस्य प्रत्यक्षत्वेऽपि तदसंनिकृष्टगोनिष्ठस्य तस्य प्रत्यक्षत्वासम्भव एव । नाप्यनुमानेनास्य गतार्थता । न हि मदीया गौरेतन्निरूपितसादृश्यवती गोनिरूपित-

जायतेऽनेन सदृशी मदीया गौस्तयोर्द्वयोः।
प्रथमं करणाख्यं स्याद्द्वितीयं तु फलं स्मृतम् ॥ ११६ ॥
तात्पर्यविषयीभूतसंसर्गो ऽन्यप्रमाणतः।
बाध्यते न हि वाक्यस्य यस्य तत्स्यात्प्रमाणकम् ॥ ११७ ॥
चत्वारि कारणानि स्युर्वाक्यजन्यधियं प्रति।
आकाङ्क्षायोग्यताऽऽसत्तितात्पर्याणि यथायथम् ॥ ११८ ॥
आकाङ्क्षा स्यात्पदार्थानां जिज्ञासायोग्यता मिथः।
तात्पर्यविषयीभूतसंसर्गाबाध एव यः ॥ ११९ ॥

सादृश्यवत्त्वात् इत्यनुमातुं शक्यम्। गोनिरूपितगवयनिष्ठसादृश्यस्य गव्यवर्तमानत्वेन पक्षावृत्तितया तल्लिङ्गत्वाभावात्। नाप्यनुमानान्तरेण गवयनिरूपितगोनिष्ठसादृश्यप्रमासम्भवोऽस्ति। अस्तु वा यथाकथञ्चिदनुमानोत्थानं, तथापि गोनिष्ठसादृश्यं नानुमानप्रमेयं उपमिनोमीत्यनुभवविरोधात्। यत्र यत्रानुमानावतारणसम्भवस्तस्य तस्यानुमानप्रमेयत्वे तु प्रत्यक्षसिद्धस्य घटादेरपि तत्प्रमेयतया तत्सिषाधयिषया सर्वत्र अयं घटः कम्बुग्रीवादिमत्त्वात् घटान्तरवत् इत्येवमादिना प्रत्यक्षप्रमाणस्याप्यनुमानेऽन्तर्भावः स्यात्। तस्मादुपमानं न प्रत्यक्षाद्यन्तर्गतं किन्तु पृथक् प्रमाणमिति वेदान्तिभिः सिद्धान्तितमिति ॥११४–११५–११६॥

शब्दप्रमाणं वर्णयति—तात्पर्येति। यस्य वाक्यस्य तात्पर्यविषयीभूतसंसर्गः अन्यप्रमाणतः प्रमाणान्तरेण न बाध्यते तत् वाक्यं प्रमाणमिति योजना। स्वार्थे कः। लक्षणं तु मानान्तराबाधिततात्पर्यगोचरीभूतपदार्थसंसर्गबोधकवाक्यत्वं शब्दप्रमाणत्वमिति। वह्निना सिञ्चेदितिवाक्यस्य प्रमाणतानिरासाय मानान्तराबाधितेति। 'प्रजापतिरात्मनो वपामुदखिदत्' इत्यादावव्याप्तिवारणाय तात्पर्यगोचरीभूतेति। शब्दसमानार्थकप्रमाणान्तरेऽतिव्याप्तिवारणाय वाक्येति च विशेषणं प्रयोक्तव्यम्। अन्यप्रमाणत इत्यस्य सजातीयप्रमाणान्तरेणेत्यर्थः कार्यः। साजात्यं च व्यावहारिकतत्त्वावेदकत्वेन। तेन पारमार्थिकतत्त्वावेदकैः "नेहनानास्ति किञ्चन" इत्यादि वेदान्तैर्घटानयनादिसंसर्गस्य यागस्वर्गादिसाध्यसाधनभावस्य च बाधेऽपि न क्षतिरिति द्रष्टव्यम् ॥ ११७ ॥

वाक्यजन्यज्ञाने चत्वारि कारणानि। तानीदानीमाह—चत्वारीति। सुगमा योजना ॥ ११८ ॥

आकांक्षां निरूपयति—आकांक्षेति। पदार्थानां मिथः परस्परं जिज्ञासायोग्यता जिज्ञासाविषयत्वयोग्यत्वं आकांक्षा स्यादित्यन्वयः। क्रियादिश्रवणे

स एव योग्यता नाम चासत्तिः स्यादुपस्थितिः ।
पदजन्यपदार्थानां व्यवधानं विना हि या ॥ १२० ॥
यत्तत्प्रतीतिजननयोग्यत्वं तद्धि पण्डिताः ।
तात्पर्यमाहुरथवा देयं तत्र विशेषणम् ॥ १२१ ॥

कारकादेर्जिज्ञासाविषयत्वदर्शनात् पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वमेव आकांक्षायाः स्वरूपमित्यर्थः । न च लाघवादावश्यकत्वाच्च विषयत्वपर्यन्तमेवाकांक्षायाः स्वरूपमस्तु न तु योग्यत्वपर्यन्तमिति वाच्यं, अजिज्ञासोरपि वाक्यार्थबोधदर्शनात् । तथा च जिज्ञासारहितस्य वाक्यजन्यज्ञाने पदार्थानां परस्परजिज्ञासाविषयत्वाभावेऽपि तद्योग्यतासत्त्वान्नाव्याप्तिः । यत्र त्वभेदान्वयः तत्र समानविभक्तिमत्पदप्रतिपाद्यत्वमेवाकांक्षाग्राहकमवच्छेदकं, अन्यत्र तु क्रियात्वकारकत्वादिकमिति ।

योग्यतामाह—तात्पर्येति । यस्तात्पर्यविषयीभूतसंसर्गस्याबाधः स एव योग्यतेत्यन्वयः । अत एव वह्निना सिञ्चतीत्यादौ तादृशसंसर्गस्य बाधात् न योग्यता । "प्रजापतिरात्मनो वपामुदखिदत्" इत्यादावपि तात्पर्यविषयीभूतपशुप्राशस्त्यबोधनत्वस्याबाधात् योग्यता । तत्त्वमस्यादिवाक्येष्वपि वाच्याभेदबाधेऽपि लक्ष्यस्वरूपाभेदे बाधाभावात् योग्यतेति तत्र तत्रानुसन्धातव्यम् ॥ ११९ ॥

आसत्तिं लक्षयति—आसत्तिः स्यादिति । या हि व्यवधानं विना अव्यवधानेन पदजन्यपदार्थानामुपस्थितिः सैवासत्तिरिति योजना । एतेन अव्यवधानेनान्वयप्रतियोग्युपस्थितिरासत्तिरित्यासत्तिलक्षणं फलितम् । मानान्तरोपस्थापितपदार्थस्यान्वयबोधे ग्रहणाभावात् कारिकायां पदजन्येत्युक्तम् । ततश्चाश्रुतपदार्थस्थलेऽन्वययोग्यपदार्थोपस्थापकपदाध्याहारः सङ्गच्छते । यथा द्वारमित्याद्युक्ते पिधेहीत्यादिकमिति ॥ १२० ॥

तात्पर्यं लक्षयति—यदिति । हि अवधारणे । यत् तत्प्रतीतिजननयोग्यत्वं तदेव तात्पर्यं आहुः पण्डिता इति योजना । पदार्थसंसर्गानुभवजननयोग्यत्वं तात्पर्यत्वमित्यर्थः । ये तु तत्प्रतीतीच्छयोच्चरितत्वं तात्पर्यत्वमिति तात्पर्यलक्षणमाहुस्तेषां लक्षणं न साधीयः, अर्थज्ञानशून्येन पुरुषेण उच्चरितात् वेदादर्थप्रत्य-

---

१ आनयेति क्रियायाः प्रवेशे घटमिति कारकस्य जिज्ञासाविषयत्वं, घटमिति कारकस्य श्रवणे आनयेति क्रियायाः एव, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति स्वर्गकरणश्रवणे समिधो यजति इडा यजतीत्यादीतिकर्तव्यतायाः, तच्छ्रवणे करणस्य चेति विस्पष्टार्थोऽनुसन्धेयः ।

तद्व्यतीतप्रतीतीच्छाऽप्रयुक्तत्वमिति स्थितिः।
न्यायैः प्रकरणाद्यैश्च तात्पर्यं गृह्यते बुधैः॥ १२२॥
एवमाहुर्वेदविदः प्रमाणानां चतुष्टयम्।
प्रमाणद्वयमन्यत्तु वक्ष्यतेऽग्रे परिस्फुटम्॥ १२३॥

याभावप्रसङ्गात्। न चानेन तदर्थप्रतीतीच्छया एतद्वेदवाक्यमुच्चारितमिति तात्पर्यभ्रमात् तदर्थज्ञानं सम्भवतीति वाच्यम्। विशेषदर्शनेन भ्रमविरोध्यध्यापकनिष्ठाव्युत्पत्तिज्ञानेन तस्याप्यभावात्। (तस्यापि भ्रमस्यापि)। ननु मास्तु तत्तात्पर्यज्ञानादेव वाक्यार्थबोधः। ईश्वरीयतात्पर्यज्ञानादेव स भविष्यतीति चेत्। न। ईश्वरानङ्गीकर्तुरपि सांख्यमीमांसकादेर्वैदिकवाक्यार्थप्रत्ययोपलब्धेः। अतः पदार्थसंसर्गानुभवजननयोग्यत्वमेव तात्पर्यत्वमिति सुष्ठूक्तम्। तथा च गेहे घट इति वाक्यं गेहघटसंसर्गप्रतीतिजननयोग्यं, न तु पटसंसर्गप्रतीतिजननयोग्यमिति। अनेकार्थपदप्रयोगे तु विशेषणदानेन दोषोद्धारः कार्यः। विशेषणं च तात्पर्ये तदितरप्रतीतीच्छयानुच्चरितत्वमिति। तथा च यत् वाक्यं यत्प्रतीतिजननयोग्यत्वे सति तदन्यप्रतीतीच्छया नोच्चरितं तद्वाक्यं तत्संसर्गपरमिति तत्र लक्षणवाक्यं स्यात्। एवं च भोजनकाले सैन्धवमानयेति वाक्यमश्वप्रतीतिजननयोग्यमपि भोजनप्रकरणे प्रयुक्तत्वात् लवणान्यप्रतीतीच्छयानुच्चरितत्वेन नाश्वसंसर्गज्ञानजनकं भवति। न चोभयप्रतीतीच्छयोच्चरितेऽव्याप्तिः। तदन्यमात्रप्रतीतीच्छयानुच्चरितत्वस्य विवक्षितत्वात्। तदन्यमात्रप्रतीतीच्छयानुच्चरितत्वमुभयप्रतीतीच्छयोच्चरितत्वमेव। न चैवमेकप्रतीतीच्छयोच्चरितेऽव्याप्तिरिति वाच्यम्। तदन्ययावत्प्रतीतीच्छयानुच्चरितत्वमित्यर्थस्य तदानीं विवक्षितत्वात्। ननु उक्तप्रतीतिजननयोग्यतायाः किमवच्छेदकमिति चेत्। शक्तिरिति ब्रूमः। न च शक्तिकल्पने गौरवं शंक्यम्। मीमांसकानां मते सर्वत्र तस्या एव क्लृप्तत्वात्। यथा वन्ह्यादिनिष्ठदाहादिजनकतावच्छेदिका शक्तिः, एवं तात्पर्यनिष्ठशाब्दज्ञानजनकतावच्छेदिका शक्तिरिति न विरोधः।

इदानीं तात्पर्यावधारणकारणं कथयति—न्यायेति। न्यायो नाम मीमांसापरिशोधितो विचारः। मीमांसा च पूर्वोत्तरभेदेन द्विविधा। वेदे मीमांसापरिशोधितविचारैः लोके पुनः प्रकरणादिना तात्पर्यमवधार्यते। आद्यपदेन उपपदादिकं ग्राह्यमिति॥१२१-१२२॥

एवमिति। वेदविदः वेदान्तिनः एवमित्थं प्रमाणचतुष्टयमाहुः वर्णयन्ति। अन्यदपि प्रमाणद्वयं अर्थापत्तिर्योग्यानुपलब्धिश्च तैरङ्गीक्रियते। तद्वयं अग्रे षड्भेदकथनावसरे स्फुटं यथा स्यात् तथा वक्ष्यत इति॥ १२३॥

लयो विक्षेपकश्चैव कषायश्च रसज्ञता ।
समाधिविघ्नान्येतानि चत्वार्याहुर्मनीषिणः ॥ १२४ ॥
मैत्री च करुणोपेक्षा मुदिता चेति चेतसः ।
परिकर्मकरं ह्येतन्मैत्र्यादिकचतुष्टयम् ॥ १२५ ॥
जरायुजं चाण्डजं च स्वेदजं चोद्भिदं तथा ।
समाहृत्य वदन्त्यत्र भूतग्रामचतुष्टयम् ॥ १२६ ॥
उपासाविधयस्त्वत्र चत्वारः परिकीर्तिताः ।
संपदारोपसंवर्गाध्यासा इति मनीषिभिः ॥ १२७ ॥
अल्पस्य चाधिकत्वेन गुणयोगाद्विचिन्तनम् ।
अनन्तं वै मन इति संपद्बुधैरुदीरितः ॥ १२८ ॥

एवं प्रमाणचतुष्टयं व्युत्पाद्य समाधिं प्रति विघ्नचतुष्टयमाह—लय इति । विक्षेप एव विक्षेपकः स्वार्थे कः । रसज्ञता रसास्वादनम् । लयस्तावदखण्डवस्त्ववलम्बनेन चित्तवृत्तेर्निद्रा । अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेरन्यावलम्बनं विक्षेपः । लयविक्षेपाभावेऽपि रागादिवासनया चित्तवृत्तेः स्तब्धीभावादखण्डवस्त्वनवलम्बनं कषायः । अखण्डवस्त्वनवलम्बनेऽपि चित्तवृत्तेः सविकल्पानन्दास्वादनं समाध्यारम्भसमये सविकल्पानन्दानुभवो वा रसज्ञता इति समाधिविघ्नचतुष्टयविवेकः ॥ १२४ ॥

मैत्र्यादिचतुष्टयमाह—मैत्रीति । सुखितेषु साध्वेषां सुखित्वमिति विभावनं मैत्री । दुःखितेषु कथं तु नामैषां दुःखविमुक्तिः स्यादिति चिन्तनं करुणा । पुण्यवत्सु पुण्यानुमोदनेन हर्षकरणं मुदिता । अपुण्यवत्सु औदासिन्येनावस्थानं उपेक्षा । औदासीन्यमनुमोदनद्वेषयोरभावः । एतन्मैत्र्यादिचतुष्टयं चेतसः परिकर्मकरं समाध्याद्यनुकूलसंस्कारविशेषापादकम् ॥ १२५ ॥

भूतग्रामचतुष्टयमाह—जरायुजेति । जरायुर्गर्भवेष्टनम् । तस्मान्निष्क्रम्य जायन्त इति जरायुजा मनुष्यपश्वाद्याः । अण्डाज्जायन्त इति अण्डजाः पक्षिप्रभृतयः । अत्रेदं वचनं "अण्डं सूते गिलाहारी" इति । स्वेदात् पूतिभावप्रापात् मलाद्वा जायन्त इति स्वेदजा दंशमशकाद्याः । भूमिमुद्भिद्य जायन्त इत्युद्भिजा वृक्षतृणाद्याः ॥ १२६ ॥

इदानीमुपासनायाः प्रकारचतुष्टयमाह—उपासाविधय इति । अत्र अस्मिन्नध्यात्मशास्त्रे वेदान्ते । सुगमा योजना ॥ १२७ ॥

सम्पदुपासनां लक्षयति—अल्पेति । अल्पस्य परिच्छिन्नस्य मनसः अनन्तवृत्तिरूपगुणयोगात् अधिकत्वसादृश्येन "अनन्ता विश्वेदेवाः । अनन्तं वै मनः"

विधावारोप्य योपासा सारोपः परिकीर्तितः ।
यद्वदोंकारमुद्गीथमुपासीतेत्युदीर्यते ॥ १२९ ॥
क्रियायोगेन योपासा छान्दोग्यादौ विधीयते ।
वायुर्वावेति संवर्गः सोच्यते ध्यानवेदिभिः ॥ १३० ॥
आरोपो बुद्धिपूर्वेण य उपासाविधिश्च सः ।
योषित्यग्निमतिर्यद्वदध्यासः स प्रकीर्तितः ॥ १३१ ॥

इति यत् चिन्तनं ध्यानं असौ सम्पद्विधिः सम्पदाख्या उपासना । उपासनानि तावदत्र मुख्यतो द्विविधानि—अहंग्रहाणि प्रतीकानि चेति । प्रतीकान्यपि द्विविधानि, लौकिकानि कर्माङ्गानि चेति । तत्र "मनो ब्रह्मेत्युपासीत" इत्यादीनि लौकिकानि । "ओमित्यक्षरमुद्गीथमुपासीत" इत्यादीनि तु कर्माङ्गानि । सोऽहं, अहं स इत्यादि प्रणाल्या यान्युक्तानि तान्यहंग्रहाणि । मन एव ब्रह्म, आदित्य एव ब्रह्म, प्रतिमैव देवता इत्यादि प्रणाल्या यान्युपासनान्युक्तानि तानि प्रतीकानि । अत एव "उपास्यदृष्टौ सुसंस्कृतमन-आद्यप्रतीकमुपास्यम्" इति वृद्ध-वचनम् । अत्रायं निष्कर्षः—सम्पदुपासना तावदारोप्यप्रधाना यथा सगुणमूर्ति-चिन्तनम् । अध्यासोपासना तु अधिष्ठानप्रधाना । अधिष्ठानमुद्दिश्य आरोपित-स्यापि ध्यानमिति यावत्, यथा सगुणचिन्तनेऽपि निर्गुणब्रह्मानुसन्धानमिति १२८

आरोपोपासनां वर्णयति—विधाविति । विधीयते प्रधानविधिनेति विधिः, क्रियाङ्गमिति यावत् । तस्मिन् आरोपे अध्यस्य या उपासना सा आरोपः । अङ्गावबद्धाध्यास इति यावत् । उदाहरणमाह—यद्वदिति । उद्गीथः सामगा-नविशेषस्य प्रथमा भक्तिः । ओंकारमुद्गीथमुपासीतेत्यन्वयः । क्रियाकाले यत् उद्गीथदृष्ट्या ओमित्यक्षरमुपास्यते तत् उपासनं आरोपसंज्ञान्तर्गतमिति विशदार्थः ॥ १२९ ॥

संवर्गोपासनामाह—क्रियेति । छान्दोग्ये तावत् "वायुर्वाव संवर्गः" इत्या-दिना या क्रियायोगिनी उपासा विहिता सा उपासा उपासना संवर्ग इत्युच्यते । वायुः प्रलयकाले भूतानि संवृणोति संहरति, अतो वायुः संवर्ग इत्यादिक्रया प्रणा-ल्या छान्दोग्योपनिषदि संवर्गोपासना विहिता, तत्र तद्विस्तारो द्रष्टव्यः ॥ १३० ॥

अध्यासोपासनामाह—आरोप इति । बुद्धिपूर्वेण बुद्धिपूर्वकं ज्ञात्वेत्यर्थः । य आरोप अध्यास इति योजना । यथा योषिति अग्निमतिः । इयमप्युपासना छान्दोग्ये "योषा वाव गोतमाग्निः" इत्यादिवाक्ये विहिता । अत्र यद्यप्य-ङ्गावबद्धोपासना अध्यासान्तर्गता तथापि किञ्चिद्भेदोऽस्त्येव ॥ १३१ ॥

उपसंगम्य बुद्धया यदासनं देवतात्मनोः ।
तदुपासनमन्तः स्याद्बहिः स्युः संपदादयः ॥ १३२ ॥
ज्ञानान्तरानन्तरितसजातिज्ञानसंततेः ।
संपन्नदेवतात्मत्वमुपासनमुदीरितम् ॥ १३३ ॥
संपदादिषु बाह्येषु दृढबुद्धिरुपासनम् ।
कर्मकाले तदङ्गेषु दृष्टिमात्रमुपासनम् ॥ १३४ ॥
संन्यासी स्याच्चतुर्भेदः कुटीचकबहूदकौ ।
हंसः परमहंसश्च तेषां संज्ञा इमे बुधैः ॥ १३५ ॥
वाङ्निरोधोऽमनस्कत्वमनहङ्कारिता तथा ।
महत्तत्वविहीनत्वं क्रमाद्भूमिचतुष्टयम् ॥ १३६ ॥

एवमुपासनाभेदमुपवर्ण्य उपासनासामान्यं लक्षयति–उपेति । बुद्धया गुरूपलब्धेन ज्ञानेन देवतायाः स्वस्य चाभेदरूपेण उपसङ्गम्य देवतासामीप्यं लब्ध्वा यत् आसनं अवस्थानं, पूजार्थमितिशेषः, तत् अन्तः स्यात् अन्तरङ्गभूतमुपासनं भवति । सम्पदादयस्तु प्राग्वर्णितास्ततो बहिः बहिरङ्गभूताः । ब्रह्मज्ञानपक्षे तु बुद्धया श्रवणादिजन्यया ब्रह्माहमस्मीति विषयीकृत्य यत् आसनं ध्यानं तत् अन्तरङ्गं, अन्यत्तु प्रतीकत्वेन बहिरङ्गमित्यर्थः कार्यः ॥ १३२ ॥

ज्ञानेति । ज्ञानान्तरेण विजातीयज्ञानेन । शिवध्यानकाले कामिनीध्यानरूपेणेत्यर्थः । अनन्तरितानि अविच्छिन्नानि यानि सजातीयज्ञानानि तेषां सन्ततिः तैलधारावदविच्छिन्नप्रवाहः तस्मात् अनन्तरं यत् सम्पन्नः स्वाभेदेन साक्षात्कृतः देवतात्मा येन तथात्वं तत् उपासनम् । अनेन साक्षात्कारपर्यन्तं निदिध्यासनं कर्तव्यमित्युपदेशो लब्धः ॥ १३३ ॥

सम्पदादिष्विति–बाह्येषु बहिरङ्गोपासनासु बुद्धेर्दार्ढ्यमेव अवधिः । यावन्न बुद्धिर्विचलिता सम्पद्यते तावदेवोपासनीयमितिभावः । कर्माङ्गोपासनायां तु तत्कालव्यापितज्ज्ञानमात्रेणोपासा सिद्ध्यतीति निष्कृष्टार्थः ॥ १३४ ॥

संन्यासिचतुष्टयमाह–संन्यासीति । यतः संन्यासश्चतुर्भेदः ततः तेषां भेदानां इमे कुटीचकाद्याः संज्ञाः बुधैः पण्डितैः । अभिहिता इति वाक्यशेषः ॥ १३५ ॥

तत्त्वविदामसंप्रज्ञातसमाधेर्भूमिकाश्चत्वारस्ता इदानीमाह–वागिति । भूमिर्भूमिका चावस्थेति नार्थान्तरम् । अस्ति तत्त्वविदोऽपि क्लेशप्रहाणाय असम्प्रज्ञातसमाध्यपेक्षा । तस्यासम्प्रज्ञातसमाधेः गोश्वादीष्विव वाङ्निरोधः प्रथमा भूमिः । जडमूकादिष्विव निर्मनस्कत्वं द्वितीयः । तन्व्यामिवाहंकाररहित्यं

अभिज्ञा चाभिवदनमुपादानं तथैव च ।
तथा चार्थक्रिया चेति व्यवहारश्चतुर्विधः ॥ १३७ ॥
आभासप्रतिबिम्बावच्छेदैकजीवनामकाः ।
वादाः स्युर्वेदविन्मध्ये चत्वारस्ते सुसङ्गताः ॥ १३८ ॥

तृतीया । तन्त्री मूर्च्छा । सुषुप्ताविव महत्तत्त्वराहित्यं चतुर्थी भूमिरिति । एतद्भूमिचतुष्टयमभिप्रेत्य "शनैः शनैरुपरमेत्" इत्युक्तं भगवता ॥ १३६ ॥

व्यवहारचातुर्विध्यमाह—अभिज्ञेति । अभिज्ञा घटोऽयमिति प्रतिपत्तिः । अभिवदनं घटोऽयमिति कथनम् । उपादानं स्वसम्बन्धितया हस्तादिना वा ग्रहणम् । अर्थक्रिया जलाहरणादिकम् । एवं सर्वत्र ॥ १३७ ॥

वेदान्तिनां मध्ये जीवेश्वरादिविभागव्यवस्थायां यत् वादचतुष्टयं प्रचरद्रूपमस्ति तदिदानीमाह—आभासेति । आदावितरेतरद्वन्द्वः, पश्चात् नामशब्देन बहुव्रीहिः । आभासवादः प्रतिबिम्बवादः अवच्छेदवादः एकजीववादश्चेति चत्वारो वादाः सन्तीत्यर्थः । ते सर्वे वादाः सुसङ्गता एव । तथाहि—अज्ञानोपहितात्मा अज्ञानतादात्म्यापन्नः स्वचिदाभासाविवेकादन्तर्यामी साक्षी जगत्कारणमिति च कथ्यते । बुद्ध्योपहितश्च तत्तादात्म्यापन्नः स्वचिदाभासाविवेकात् जीवः कर्ता भोक्ता प्रमाता इति च कथ्यते इति वार्तिककारमतम् । प्रतिदेहं च बुद्धीनां भिन्नत्वात् तत्तद्गतचिदाभासभेदेन तत्तदतिरिक्तं चैतन्यमपि भिन्नमिव प्रतीयते । अज्ञानस्य सर्वत्राभिन्नत्वात् तद्गतचिदाभासभेदाभावात् तदतिरिक्तसाक्षिचैतन्यस्य न कदाचिदपि भेदभानमिति पक्षान्तरम् । अस्मिंश्च पक्षे तत्त्वमादिपदेषु जहल्लक्षणैव । साभासस्यैवोपाधेर्वाच्यांशस्य हानादाभासस्यापि जडाजडविलक्षणत्वेनानिर्वचनीयत्वाच्च । तदुक्तं संक्षेपशारीरके—" साभासाज्ञानवाची भवति तु जहती लक्षणा तत्र पक्षे " इति । न चाभासस्यैव बद्धत्वात् केवलचैतन्यस्य च मुक्तत्वात् बन्धमोक्षयोर्वैयधिकरण्यं स्वनाशार्थप्रवृत्त्यनुपपत्तिश्चेति वाच्यम्, केवलचैतन्यस्यैव आभासद्वारा बद्धत्वाभ्युपगमात् । तेन शुद्धचैतन्यस्याभास एव बद्धस्तन्निवृत्तिश्च मोक्ष इति न किञ्चिदप्यसमञ्जसम् । अथवा चिदाभासाविविक्तचैतन्यमपि तत्त्वमादिपदवाच्यम् । तेन वाच्यैकदेशस्यात्यागादस्मिन्पक्षे जहदजहल्लक्षणैवेति न कोऽपि दोषः । अयमेव पक्ष आभासवाद इत्यभिधीयते ।

अज्ञानोपहितं बिम्बचैतन्यमीश्वरः, अन्तःकरणतत्संस्कारावच्छिन्नज्ञानप्रतिबिम्बितं चैतन्यं च जीव इति विवरणकारमतम् । अज्ञानप्रतिबिम्बितं चैतन्यमीश्वरः, बुद्धिप्रतिबिम्बितं चैतन्यं जीवः, अज्ञानानुपहितं तु बिम्बचैतन्यं शुद्ध-

प्रमाता च प्रमाणं च प्रमितिश्च प्रमेयकः ।
इत्थं वेदे व्यवहृतं प्रमात्रादिचतुष्टयम् ॥ १३९ ॥

मिति संक्षेपशारीरककृन्मतम् । अनयोः पक्षयोर्बुद्धिभेदात् जीवनानात्वम् । बिम्बस्य पारमार्थिकत्वात् प्रतिबिम्बस्य चापारमार्थिकत्वात् जहदजहल्लक्षणैव तत्त्वमादिपदेषु । इममेव प्रतिबिम्बवादमाचक्षते विद्वांसः ।

अज्ञानविषयीभूतं चैतन्यमीश्वरः, अज्ञानाश्रयीभूतं च चैतन्यं जीवः, इति वाचस्पतिमिश्रमतम् । अस्मिंश्च पक्षे अज्ञाननानात्वात् जीवनानात्वं, प्रतिजीवं च प्रपञ्चभेदः, प्रत्यभिज्ञा चातिसादृश्यात् । ईश्वरस्य सप्रपञ्चजीवाविद्याधिष्ठानत्वेन कारणत्वमुपचारादिति । अयमेव चावच्छेदवाद इति गीयते ।

अज्ञानोपहितं बिम्बचैतन्यमीश्वरः, अज्ञानप्रतिबिम्बितं चैतन्यं जीवः, अज्ञानानुपहितं शुद्धचैतन्यमीश्वरः अज्ञानोपहितं चैतन्यं जीव इति वा सुप्रसिद्धो वेदान्तसिद्धान्त एकजीववादाख्यः । इममेव च दृष्टिसृष्टिवादमाचक्षते । अस्मिंश्च पक्षे जीव एव स्वाज्ञानवशात् जगत उपादानं निमित्तं च । दृश्यं च सर्वं प्रातीतिकं, देहभेदाच्च जीवभेदभ्रान्तिः । एतस्यैव स्वकल्पितगुरुशास्त्राद्युपबृंहितश्रवणमननादिदार्ढ्यादात्मस्वरूपसाक्षात्कारे सति मोक्षः । एतन्मते नाद्यापि मोक्षः सञ्जातः । शुकादीनां मोक्षश्रवणं चार्थवाद एव । महावाक्ये च तत्पदमनन्तसत्यादिवदज्ञानानुपहितचैतन्यस्य लक्षणयोपस्थापकमित्यवगन्तव्यम् । एवमन्येऽप्यवान्तरभेदा ऊहनीयाः ।

ननु वस्तुनि विकल्पासम्भवात्कथं परस्परविरुद्धमतप्रामाण्यम् । तथा च किमत्र हेयं किमुपादेयमिति चेत । क एवमाह वस्तुनि विकल्पो न सम्भवतीति । स्थाणुर्वा पुरुषो वा चोरो वेति विकल्पस्य वस्तुन्यपि दर्शनात् तदसम्भवस्याभावात् । नन्वतात्त्विकी सा कल्पना पुरुषबुद्धिमात्रप्रभवा, इयं तु शास्त्रीया जीवेश्वरविभागादिव्यवस्थेति चेत् । अत्रोच्यते । अद्वितीयात्मतत्त्वं प्रधानं फलवत्त्वात् अज्ञातत्वाच्च प्रमेयं शास्त्रस्य । जीवेश्वरविभागादिकल्पनास्तु पुरुषबुद्धिप्रभवा अपि शास्त्रे ता अनूद्यन्ते, तत्त्वज्ञानोपयोगित्वात् । "फलसन्निधावफलं तदङ्गम्" इति न्यायात् भ्रमसिद्धानामपि श्रुत्यानुवादसम्भवात् । अत एव तत्र तत्र तत्तद्विध एव विरोधे तत्परिहाराय वार्तिककारपादाः "यया यया भवेत् पुंसां व्युत्पत्तिः प्रत्यगात्मनि । सा सैव प्रक्रिया ज्ञेया साध्वी सा चानवस्थिता" इत्याहुः । ततश्च श्रुतितात्पर्यभूतार्थविरुद्धमेव हेयमिति सिद्धान्तः ॥ १३८ ॥

प्रमात्रादिचतुष्टयमाह—प्रमातेति । वेदे वेदान्तशास्त्रे । एकमपि ब्रह्मचैतन्यमुपाधिभेदात् प्रमातृचैतन्यं प्रमाणचैतन्यं प्रमितिचैतन्यं प्रमेयचैतन्यमिति

५ अथ पञ्चविधाः संज्ञाः सन्ति यास्ता यथायथम् ।
निर्दिश्यन्ते मयेदानीं यत्नादत्र समासतः ॥ १४० ॥
पञ्चैवान्नमयः प्राणमयश्चैव मनोमयः ।
विज्ञानमय आनन्दमयो नाम्नात्र कोषकाः ॥ १४१ ॥
षण्णामन्नविकाराणां समूहोऽन्नमयो भवेत् ।
यदा प्राणादयो देहे स्थिताः प्राणमयस्तदा ॥ १४२ ॥

चतुर्धा व्यवहृतं वेदान्तिभिः । अत एव यत्र प्रमात्रादिचतुष्टयमित्युक्तिस्तत्र शास्त्रीयप्रक्रियोक्तचैतन्यभेदरूपस्तदर्थो विज्ञेयः । सा शास्त्रीया प्रक्रिया चेत्थं—शरीरमध्यस्थितः सर्वशरीरव्यापकः सत्त्वप्राधान्येन सूक्ष्मपञ्चमहाभूतारब्धान्तःकरणाख्योऽविद्याविवर्तो दर्पणादिवदतिस्वच्छो नेत्रादिद्वारा बहिर्निर्गत्य योग्यान् घटादिविषयान्व्याप्य तत्तदाकारो भवति द्रुतताम्रादिवत् । तस्य च सौरालोकादिवत् झटित्येव संकोचविकाशौ उपपद्येते । स च सावयवत्वात् परिणममाणो देहाभ्यन्तरे घटादौ च सम्यक् व्याप्य देहघटयोर्मध्येऽपि चक्षुर्वदविच्छिन्नो व्यवतिष्ठते । तत्र देहावच्छिन्नान्तःकरणभागोऽहंकाराख्यः कर्तेत्युच्यते । देहविषयमध्यवर्ती दण्डायमानस्तद्भागो वृत्तिज्ञानाख्या क्रियेत्युच्यते । विषयव्यापकस्तद्भागो विषयस्य ज्ञानकर्मतासम्पादकत्वेन अभिव्यक्तियोग्यत्वमित्युच्यते । तस्य च त्रिभागस्यान्तःकरणस्यातिस्वच्छत्वाच्चैतन्यं तत्राभिव्यज्यते । तस्याभिव्यक्तस्य चैतन्यस्यैकत्वेऽपि अभिव्यञ्जकान्तःकरणभागभेदात् त्रिधा व्यपदेशो भवति । तत्र कर्तृभागावच्छिन्नचिदंशः प्रमाता । क्रियाभागावच्छिन्नचिदंशः प्रमाणम् । विषयगताभिव्यक्तियोग्यत्वभागावच्छिन्नचिदंशः प्रमितिरित्याख्यायते । प्रमेयं तु विषयगतं ब्रह्मचैतन्यमेवाज्ञातम् । तदेव च ज्ञातं सत् फलमिति ॥ १३९॥

एवं चतुर्भेदवतीं संज्ञामभिधायेदानीं पञ्चभेदवतीं संज्ञां वक्तुं पातनिकामादत्ते—**अथेति** । अथ चतुर्भेदवतीसंज्ञानिर्देशानन्तरम् । या वेदान्तशास्त्रे पञ्चविधाः संज्ञाः सन्ति ताः संज्ञा यथायथमिदानीं मया अत्र अस्मिन् ग्रन्थे यत्नेन समासतः संक्षेपेण निर्दिश्यन्त इति योजना ॥ १४० ॥

तत्र प्रथमं तावदतिप्रख्यातरूपं कोषपञ्चकं निर्दिशति—**कोष इति** । अत्र अस्मिन् वेदान्तशास्त्रेऽन्नमयः प्राणमयो मनोमयो विज्ञानमय आनन्दमयश्चेति नाम्ना प्रसिद्धाः पञ्चकोषा इत्यर्थः । कोषा इति वक्तव्ये यत्कोषका इत्युक्तं तत्कुत्सितत्वद्योतनायेति बोद्धव्यम् ॥ १४१ ॥

तान् कोषान् व्युत्पादयति—**षण्णामित्यादिना** । मिलितानां षण्णामन्नविकाराणां भुक्तान्नकार्याणां अस्थिमज्जामेदस्त्वङ्मांसशोणितानां समूहोऽन्नमयकोषः ।

ताभ्यां युतो यदा चात्मा करणैर्मनआदिभिः ।
शब्दादिविषयान् याति मनोमयस्तदोच्यते ॥ १४३ ॥
तत्कोषत्रयसंयुक्तस्तद्विशेषाविशेषकान् ।
विजानाति यदा तस्माद्विज्ञानमय उच्यते ॥ १४४ ॥
यदा स्वकारणज्ञाने वर्तते तच्चतुष्टयम् ।
तदानन्दमयः कोषो वटबीजे वटो यथा ॥ १४५ ॥
बुद्धीन्द्रियाणि पञ्चैव प्रवदन्ति मनीषिणः ।
श्रोत्रं त्वगक्षि रसनं घ्राणमित्यभिधानतः ॥ १४६ ॥

यदा प्राणादयः प्राणापानव्यानोदानसमाननागकूर्मकृकरदेवदत्तधनञ्जयाख्या दश तथा "वैरम्भणः स्थानमुख्यः प्रद्योतः प्रकृतस्तथा। वैरम्भणादयस्तत्र सर्ववायुवशं गताः" ॥ इत्युक्ताश्चत्वारो मिलित्वा चतुर्दश वायुभेदा देहे स्थिताः कृतास्पदा वृत्तिमन्तस्तदा प्राणमयः कोषः। यदा च आत्मा जीवस्ताभ्यामन्नमयप्राणमयाभ्यां युतः संयुक्तस्तत्तादात्म्यापन्नः सन्नित्यर्थः। मनआदिभिश्चतुर्भिः करणैः शब्दादिविषयान् शब्दादयः पञ्चविषया येषां ते तान्, चकारात् संकल्पादयो ये धर्मास्तान् याति प्राप्नोति करोतीति वा तात्पर्यार्थः। तदा असौ व्यूहः मनोमयकोष इत्युच्यते। तदा च पूर्वोक्तकोषत्रयेण संयुक्तः सन् तद्विशेषाविशेषान् तद्गतान् शब्दादिगतान् संकल्पादिगतांश्च विशेषाविशेषान्, विशेषः ब्राह्मणत्वादिः, अविशेषः मनुष्यत्वादिसामान्यं, तान् याति विजानाति तेषां ज्ञाता भवति तदा विज्ञानमयः कोषः। यदा च तच्चतुष्टयं पूर्वोक्तकोषचतुष्टयं स्वकारणज्ञाने स्वस्य कारणीभूतं ज्ञानं ब्रह्म तस्मिन् वटबीजे वट इव वर्तते प्रलीनभावेनावतिष्ठते तदा आनन्दमयः कोषः। असौ च निर्विषये जाग्रति तथा सुप्ते मनसि भवतीति बोद्धव्यम्। "स्वकारणाज्ञाने" इति पाठे अविद्यायामिति तदर्थः कार्यः॥ १४२-१४३-१४४-१४५ ॥

पञ्चज्ञानेन्द्रियाण्याह—बुद्धीति। बुद्धीन्द्रियाणि ज्ञानेन्द्रियाणि अभिधानतः नामतः। एवशब्दस्तु मनोव्यावृत्त्यर्थः। श्रोत्रादिपञ्चकमेवेन्द्रियं न तु मन इत्यभिसन्धिः। अन्यत्रादिपरिकल्पितं तु मनस इन्द्रियत्वं "इन्द्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः" इति श्रुतिबाधितमेव। न चार्था मनोव्यतिरिक्तेन्द्रियेभ्यः परा इति व्याख्यानस्य सम्भवोऽस्ति। श्रुत्यन्तरे हि "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च" इत्यादौ इन्द्रियाणां मनसो भेदेनोत्पत्तिश्रवणात्। "इन्द्रियाणि प्रसूतानि मनसो नेन्द्रियान्मनः" इति

शब्दः स्पर्शो रूपरसौ गन्धश्चेति यथाक्रमम्।
पञ्चैव विषयास्तेषां वेदविद्भिरुदाहृताः ॥ १४७ ॥
वाक्च पाणिश्च पादश्च पायुश्चोपस्थमित्यपि।
पञ्च कर्मेन्द्रियाण्याहुः कर्माण्येषां प्रचक्ष्महे ॥ १४८ ॥

वाशिष्ठवचने इन्द्रियाणां मनोधीनत्वस्मरणाच्च। यत्तु "इन्द्रियाणां मनश्चास्मि" इति गीतावचनं तत् "नक्षत्राणामहं शशी" इति वत् व्याख्यातव्यम्। यथा च नक्षत्राणामहं शशीति वचनं न शशिनो नक्षत्रतायां प्रमाणं, तथा इन्द्रियाणां मनश्चास्मीति वाक्यमपि मनस इन्द्रियत्वे न प्रमाणमिति भावः। तत् सिद्धमेव मनसोऽनिन्द्रियत्वम्। अथवा आलोचनज्ञानासाधारणकारणत्व-मिन्द्रियत्वमितीन्द्रियसामान्यलक्षणम्। तद्विशेषाणां लक्षणं तु शब्दालोचनज्ञा-नासाधारणकारणत्वं श्रोत्रेन्द्रियत्वमित्येवमादिक्रमेणोन्नेयम्। आलोचनज्ञानं तु तन्त्रान्तरोक्तं संमुग्धमेव। तथा हि "संमुग्धं वस्तुमात्रं तु प्राक् गृह्णन्त्यविक-ल्पितम्। तत्सामान्यविशेषाभ्यां कल्पयन्ति मनीषिणः"। इति, "अस्ति ह्यालो-चनं ज्ञानं प्रथमं निर्विकल्पकम्। बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम्। ततः परं पुनर्वस्तुधर्मैर्जात्यादिभिर्यथा। बुद्ध्यावसीयते सा हि प्रत्यक्षत्वेन संमता"। इति च। अत्रेयं प्रक्रिया—इन्द्रियाणि तावत् प्रथमं अविकल्पितमेव निर्विक-ल्पमेव गृह्णन्तीदमिति, तच्च ग्रहणमालोचनसंमुग्धशब्दाभ्यामुच्यते। ततः परं तत् मन एव इदमेवं नैवं वेति विशेषणविशेष्यभावेन विवेचयति। तदेव विवे-चनं संकल्पशब्देनोच्यते। ततश्च संकल्पासाधारणकारणत्वं मनस्त्वमिति मनसः पृथगेव लक्षणं प्राप्तमिति नेन्द्रियं मनः। इन्द्रियशब्दस्य व्युत्पत्तिरित्थम्—इन्द्रं कार्यकरणस्वामिनं जीवभावापन्नं परमेश्वरमानन्दयति भोगैः प्रीणयतीति इन्द्रि-यम्। अत्रैवार्थे "इन्द्रजुष्टमिन्द्रियं" इति पाणिनिमुनेरनुशासनमित्यास्तां तावत् ॥ १४६ ॥

श्रोत्रादीनां पञ्चानां पञ्चविषयानाह—शब्द इति। शब्दोऽत्र ध्वन्यात्मको नतु वर्णात्मकः। तस्य निरवयवत्वेन नित्यतया अतीन्द्रियत्वात्। योजना त्वस्य सुगमा। अत्रेदं बोध्यं—त्वक् चक्षुषी स्वग्राह्यगुणाश्रयद्रव्यमपि गृह्णीतः। श्रोत्रमपि चक्षुर्वत् विषयदेशं वृत्त्यात्मना गत्वा तस्य ग्राहकं भवति, दूरे शब्द इति प्रतीतेः ॥ १४७ ॥

पञ्चकर्मेन्द्रियाण्याह—वाक्चेति। वचनसाधनमिन्द्रियं वाक्। तच्च कण्ठ-ताल्वादिवर्ति। एवं ग्रहणसाधनमिन्द्रियं पाणिः, गतिसाधनमिन्द्रियं पादः,

वचनं ग्रहणं चैव गमनं च विसर्जनम्।
आनन्दश्चेति कर्माणि वागादीनां क्रमाद्विदुः ॥ १४९ ॥
एकैकभूतजातिभ्यः शक्तिभेदाद्द्वयं द्वयम्।
इन्द्रियं जायते चादौ मनस्त्वव्याकृताद्विदुः ॥ १५० ॥
आकाशाच्छ्रोत्रवाचौ च वायोस्त्वक्पाणिकौ तथा।
तैजसौ नेत्रपादौ स्तो जिह्वापायू तथाप्यकौ ॥ १५१ ॥
घ्राणोपस्थौ तथा जातौ पृथिव्याश्चेति निर्णयः।
मनः पञ्चगुणग्राहि यतोऽतो भिन्नमेव तत् ॥ १५२ ॥

विसर्गसाधनमिन्द्रियं पायुः, रमणीसंयोगजानन्दविशेषसाधनमिन्द्रियमुपस्थम्। विसर्गश्चोदरात् मलादेरपनयनेन त्यागः। अत्रापीदं बोद्धव्यम्। इन्द्रस्यात्मन इदमिति व्युत्पत्त्यनुसारेणेन्द्रियशब्दो ज्ञानकर्मोभयसाधनचक्षुरादिवागादिषु वर्तत इति ॥ १४८–१४९ ॥

इन्द्रियाणामुपादानान्याह–एकैकेति। शक्तिभेदात् ज्ञानक्रियाशक्तिभेदात् एकैकस्मात् भूतात् द्वयं द्वयमिन्द्रियं जायते। ज्ञानशक्त्यात्मना ज्ञानेन्द्रियाणि, क्रियाशक्त्यात्मना कर्मेन्द्रियाणीति विभागः। भूतानां ज्ञानक्रियाशक्तिमत्त्वे सत्त्वरजस्तमोमयत्वमेव हेतुः। आदौ कल्पारम्भकाले। एतेनेन्द्रियाणां कल्पान्तस्थायित्वं ध्वनितम्। मनस्तु अव्याकृताज्जातम्। अव्याकृतं नाम साभासाविद्यामूर्तामूर्तप्रपञ्चबीजशक्तिरूपेश्वरोपाधिः। तस्मात् मनः अन्तःकरणं जातम्। एतच्च ज्ञानशक्त्यात्मकमेकं स्वच्छद्रव्यं चित्संनिधानात् चिद्रूपमिव, वृत्तिभेदाच्च बुद्धिर्मन इति च वाच्यमानम् ॥ १५० ॥

कस्मात् किं जातमित्याकांक्षायामाह–आकाशादिति। आकाशस्य ज्ञानशक्तिप्रधानांशात् श्रोत्रेन्द्रियं, क्रियाशक्तिप्रधानांशात्तु वागिन्द्रियम्। एवं सर्वत्र। अत्र च "तेजो वै वाक्" इत्यादि श्रुतेस्तैजसी वाक्, पादस्तु नाभस इति केचित्। वयं तु शब्दव्यञ्जकेन्द्रियत्वेन श्रोत्रवाचोर्नाभसत्वं पादचिकित्सया चक्षुःस्वास्थ्यदर्शनात् चक्षुर्वत् पादस्य तैजसत्वमिति युक्तमुत्पश्यामः। निदर्शितश्रुतिस्तु मनसः पञ्चभूतकार्यस्यापि अन्नमयत्वश्रुतिरिव तदुपकार्यतया व्याख्येया। यत्तु मतं "दिशः श्रोत्रे" इति श्रवणात् श्रोत्रेन्द्रियस्य दिङ्मयत्वमिति तदपि नादरभूमिरस्माकम्। अप्रामाणिकत्वेन दिक्कालयोरनभ्युपगमात्। आकाशस्यैव हि दिग्व्यवहारत्वसम्भवात् "दिशः श्रोत्रे" इति श्रुतिराकाशपरत्वेनैव व्याख्येया।

प्राणोऽपानः समानश्च व्यानश्चोदान इत्यपि ।
पञ्चप्राणाः समाख्यातास्तत्राद्यो मुख्य उच्यते ॥ १५३ ॥
नागः कूर्मः कृकरश्च देवदत्तधनञ्जयौ ।
पञ्चोपवायवः प्रोक्ताः केचिन्नैतान्वदन्ति हि ॥ १५४ ॥

कालस्त्वविद्यैव । अस्माकं मते तस्या एव सर्वकार्याधारत्वादिति । मन इति । यतः यस्मात् पञ्चगुणग्राहि अतस्तत् मनः भिन्नं चक्षुरादीनामिन्द्रियाणामन्यत् । मनसः पञ्चगुणग्राहित्वं च पञ्चभूतकार्यत्वप्रयुक्तमेव ॥ १५१–१५२ ॥

पञ्चप्राणानाह–प्राण इति । प्राक् अनिति गच्छतीति प्राग्गमनवान् शारीरवायुः प्राणः, प्राग्गमनं अग्रतो निःसरणम् । असौ तावन्नासाग्रवर्तीत्युच्यते । यद्यपि "प्राणा हृदये" इति श्रुतेः "हृदि प्राणः" इत्यभिधानाच्च हृदयस्थानः प्राणः, तथापि नासाग्रे प्रत्यक्षमुपलभ्यमानत्वात् नासाग्रवर्तीत्युच्यते । वस्तुतस्तु हृदयमेव तस्य स्थानं वृत्तिलाभस्तु नासायाम् । वृत्तिश्च श्वासप्रश्वासरूपा । एवमपकृष्टतया अनिति नाभेरधस्तात् मलाद्यानयनव्यापारेण गच्छतीत्यपानः । अस्य तु वृत्तिलाभः पायावुपस्थे च । ताभ्यामपि मार्गाभ्यामपानो मलमूत्ररेतःप्रभृतीनि शरीरादपनयति । एवं विष्वक् परितः सर्वतो वा गमनं विद्यते यस्य सः व्यानः प्राणापानयोर्नियमनकर्मा निखिलशरीरवर्ती । अयं हि भारोत्तोलनधनुराकर्षणादिवीर्यवत् कर्महेतुः । तथा च श्रुतिः "अथ यः प्राणापानयोः सन्धिः स व्यानः" इत्युपक्रम्य "यथाग्नेर्मन्थनमोजःसरणं दृढस्य धनुष आयमनं अप्राणन् अनपानन् तानि करोति" इति । एवं समं अनति नयतीति समानः शरीरमध्यगोऽशितपीतादिसमीकरणहेतुर्वायुः । समीकरणं तु परिपाककरणं यथाविभागं रसरक्तशुक्रपुरीषादिकरणं च । एवं उत् ऊर्ध्वं अनितीति उदानः ऊर्ध्वगमनवान् कण्ठस्थानीयो वायुः । असावेवोत्क्रमणवायुः । यद्यपि "चक्षुषो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्यः" इति श्रुतेर्जीवोत्क्रमणस्य चक्षुरादिद्वारेष्वनियमः, तथापि कण्ठसम्बन्धस्य प्रायेण नियतत्वात् कण्ठस्थानीय इत्युक्तम् । एतेषां मध्ये प्राण एव मुख्यः श्रेष्ठोऽन्येषां तदधीनत्वमिति ॥ १५३ ॥

पञ्चोपप्राणानाह–नागेति । उद्गीरणहेतुर्नागः, निमीलनोन्मीलनहेतुः कूर्मः, क्षुधाकरः कृकरः, जृम्भणहेतुः देवदत्तः, पुष्टिकरो धनञ्जय इत्युपवायुपञ्चकमकेषां मते । औपनिषदास्तु नागादीनां पञ्चानां प्राणादिष्वन्तर्भावान्न पृथक्त्वमिति वदन्ति अन्तर्भावप्रकारश्चेत्थं–उद्गीरणं हि ऊर्ध्वमुखस्य वायोः क्रिया । ऊर्ध्व-

मुखश्च वायुरुदानं इत्युक्तत्वात् । तथा चोदानेनैव उद्गीरणस्यापि सिद्धत्वात् नागस्य तत्कर्तुरुदानेऽन्तर्भावः । उन्मीलननिमीलनयोरङ्गचेष्टान्तर्गतत्वात्, अङ्गचेष्टायाश्च व्यानकार्यत्वात् उन्मीलननिमीलनकर्तुः कूर्मस्य व्यानेऽन्तर्भावः । समानेन अशीतपीतादीनां पाकेन रसरक्तादिभावमापाद्य सकलशरीरदेशेषु तत्प्रवेशने कृते सत्येव क्षुधोत्पत्तिदर्शनात् तत्कर्तुः कृकरस्य समानेऽन्तर्भावः । जृम्भणस्य निद्रालस्यादिहेतुत्वात् निद्रालस्यादेश्च वातुलाद्यन्नोपयोगनिमित्तकत्वात् अन्नस्वीकरणस्य चापानकर्मत्वात् अपान एव परम्परया जृम्भणहेतोर्देवदत्तस्यान्तर्भावः। अपानाख्यस्य वायोरन्तर्मुखतया शरीरान्तः प्रविशतो वायोरन्नस्वीकरणे हेतुत्वमैतरेयके श्रुतं—"तदपानेनाजिघृक्षत् तदावयत्" इति । एवं रसलोहितमांसादिक्रमेण शरीरेऽन्नपरिणामे सत्येव पोषणपर्यायायाः पुष्टेः सम्भवात् रसादिकर्तरि समाने धनञ्जयस्यान्तर्भावः । एवं च सति प्राणादीनामेव यथाथर्यं उद्गारादिक्रियानिमित्ततया अवस्थान्तरमापद्यमानानां नागादिसंज्ञायाश्चोपपत्तौ तत्तत्त्वान्तरकथनमयुक्तमेव, गौरवादप्रमाणिकत्वाच्च । श्रुतौ तु पञ्चानामेव प्राणादीनां तत्र तत्र श्रवणात् तद्विरुद्धा कल्पना श्रुतिशरणैर्हेयैव। वस्तुतस्तु, प्राणादयोऽपि मुख्यस्यैकस्य वृत्तिविशेषा एव न तत्त्वान्तरभूताः । "प्राणोऽपानउदानः समानोऽनः" इति बृहदारण्यके वृत्तिमतः प्राणस्य निरुपसर्गाऽनशब्दवाच्यस्य पृथक् निर्देशात् । अत्रैवार्थे सूत्रं "पञ्चवृत्तिर्मनोवत् व्यपदेशात्" इति । अयं मुख्यः प्राण एतन्मते न शरीरमध्ये नभोवत् वृत्तिलाभमात्रेणावस्थितो बाह्यो वायुः, न वा वागादीनामिन्द्रियाणां सामान्यवृत्तिरूपा क्रिया, किं तर्हि, सूत्रात्मरूपस्य वायोः कार्यभूतं तत्त्वान्तरमेव । "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च खं वायुः" इति हि श्रुतौ वायोरिन्द्रियाणां च प्राणात् पृथगेव निर्देशात् । तथा च वैयासिकं सिद्धान्तसूत्रं—"न वायुक्रिये पृथगुपदेशात्" इति । अत्र च "अणुश्च" इति सूत्रात् इन्द्रियवत् सूक्ष्मत्वादिकमपि प्राणस्यानुसन्धेयमित्यलमतिपल्लवितेन ॥ १५४ ॥

---

१ सूत्रात्मा तु समष्टिक्रियाशक्त्यात्मकात् अव्याकृतादुत्पन्न इति सिद्धान्तबिन्दुराह । तथाहि "अयं चाव्याकृतपदार्थ ईश्वरोपाधिः । तानि सूक्ष्मभूतान्यपञ्चीकृतानि पञ्चमहाभूतानि अमूर्ताख्यानि कारणैक्यात् सत्वरजस्तमोगुणात्मकानि सत्त्वांशप्राधान्येन ज्ञानक्रियाशक्त्यात्मकमेकं स्वच्छद्रव्यं चिद्रूपमिव मिलित्वा जनयति । तस्य च ज्ञानशक्तिप्रधानोंऽशः अन्तःकरणं, क्रियाशक्तिप्रधानोंऽशः सूत्रात्मरूपः प्राणः । स च शरीरे वृत्तिभेदात् पञ्चधा ।" इति ।

नित्यं नैमित्तिकं काम्यं प्रायश्चित्तं निषिद्धकम् ।
कर्मपञ्चकमेतद्धै विज्ञेयं वेदवादिभिः ॥ १५५ ॥

एवं वायुपञ्चकं निरूप्य कर्मपञ्चकं निरूपयति—नित्यमिति । येषां कर्मणां अकरणं विज्ञायमानं सत् पुंसां समर्थाधिकारिणां प्रत्यवायस्य लक्षणं ज्ञापकं भवति तानि कर्माणि सन्ध्योपासनादीनि नित्यानीति पदयोजना । प्रत्यवायशब्देनागामिदुःखमुच्यते । तत् येषामकरणे विज्ञायमाने लक्ष्यते ज्ञाप्यते तानि कर्माणि नित्यानीति वाक्यनिर्गलितार्थः । ननु "अकुर्वन् विहितं कर्म निन्दितं च समाचरन् । प्रसजंश्चेन्द्रियार्थेषु नरः पतनमृच्छति ॥" इति मनुस्मृतौ शतृप्रत्ययात् अकरणस्य प्रत्यवायहेतुत्वमवगम्यते, तत् कथमकरणस्य प्रत्यवायलक्षकत्वमुक्तमिति चेत् । उच्यते । "लक्षणहेतोः क्रियायाः" इति पाणिनिना लक्षणार्थेऽपि शतुर्विधानात् निर्निमित्तान्युपात्तदुरितक्षयार्थानि नित्यानि न तु अकरणे प्रत्यवायोत्पादकानि । तथा च "विचिकित्सं श्रोत्रियः" इतिवत् शतृप्रत्ययस्य अन्यथाप्युपपत्तेर्न तद्वशादभावस्य हेतुत्वाशंका युक्ता । तदुक्तं "नित्यानामक्रिया यस्माल्लक्षयित्वेति सत्वरा । प्रत्यवायक्रियां तस्माल्लक्षणार्थे शता भवेत्" ॥ इति । ननु हेत्वर्थेऽपि शतुर्विधानस्य तुल्यत्वे कथं लक्षणार्थावगम इति चेत् । अभावात् भावोत्पत्तेरनुपपत्तेरिति वदामः । भावरूपस्य हि कार्यस्य भावरूपं कारणमिति सर्वत्र प्रत्यक्षादिभिरवधारितम् । तेन शतृप्रत्ययात् अभावस्य भावहेतुताभ्युपगमो विरुद्ध्यत एव । नन्वेवं सति कथं तथापि अकरणस्य प्रत्यवायलक्षकत्वसिद्धिरिति । नैष दोषः । अस्माभिरकरणस्य न स्वरूपेण प्रत्यवायलक्षकत्वमिष्यते किन्तु तज्ज्ञानस्य । न च तस्यैव प्रत्यवायजनकत्वमस्त्विति वाच्यं, नित्याकरणाज्ञाने प्रत्यवायाभावप्रसङ्गात् । यत्तु भाट्टैरनुपलब्धस्याभावप्रमितिहेतुत्वं तार्किकैश्च प्रतिबन्धकाभावस्य तत्तत्प्रागभावस्य च कारणत्वमिष्यते तन्न साधुमन्यामहे, विकल्पासहत्वात् । तथा हि—न तावत् योग्यानुपलब्धेः सत्तामात्रेणाभावप्रमितिहेतुता युक्ता । तथा सति अज्ञानकारणत्वेनाभावज्ञानस्य प्रत्यक्षत्वाभावप्रसङ्गात् । ज्ञाताया एवानुपलब्धेरभावप्रमाहेतुत्वे तज्ज्ञानस्यैव भावरूपस्य अभावज्ञानकारणता बलादायास्यति । प्रतिबन्धकाभावः कारणं इति तु पक्षे स किं दृष्टकारणकलापकुक्षौ निक्षिप्तः, उत अदृष्टकारणकलापकुक्षौ । आद्ये दाहादिकार्यार्थिनः काष्ठादिसमवधानाधिगम इव प्रतिबन्धकाभावसमवधानाधिगमे सत्येव वह्निप्रज्वलनादौ प्रवृत्तिः स्यात् । न च तथा प्रवर्तमानो दृश्यते । अन्यथा सत्यपि प्रतिबन्धकसमवधाने

येषामकरणं पुंसां प्रत्यवायस्य लक्षणम् ।
विज्ञायमानं तान्येव नित्यानीति विदुर्बुधाः ॥ १५६ ॥

तदभावनिश्चयेन प्रवर्तमानस्य कदाचित् कार्यानुदयो न भवेत् । यद्येवं मनुषे सति प्रतियोगिनि तदभावनिश्चयो भ्रम एवेति, तर्हि प्रतिबन्धकस्य अयोग्यत्वेन तदभावोऽप्ययोग्य एवेति न तस्य दृष्टकारणकलापकुक्षिनिक्षेपः । नापि द्वितीयः । अस्मदाद्यप्रत्यक्षाणां ईश्वरतज्ज्ञानेच्छाप्रयत्नप्राण्यदृष्टानां देशकालयोश्च सूर्यादिग्रहचारक्रियायाश्च भावरूपतया प्रतिबन्धकाभावत्वायोगात् तदतिरिक्तस्य कस्यचित् सर्वकार्यसाधारणकारणत्वस्य कल्पकाभावात् । किं च सत्यपि प्रतिबन्धके उत्तेजकसमवधाने कार्यदर्शनात् न प्रतिबन्धकाभावस्य कारणता । उत्तेजकाभावविशिष्टप्रतिबन्धकाभावस्य कारणत्वे तादृक्प्रतिबन्धकाज्ञाने तदभावाग्रहात् न तस्य कारणतासिद्धिः । न चान्यथासिद्धनियतपूर्ववर्तित्वमपि प्रतिबन्धकाभावस्य । तदन्वयव्यतिरेकयोर्विरोधिसंसर्गाभावविषयतया अन्यथासिद्धत्वात् । तर्हि विरोधिसंसर्गाभावत्वेनैव कारणतेति चेत् । न । सत्येवोत्पत्तिहेतुकलापसमवधाने स्थितिहेतुसमवधाने वा उत्पत्तेः स्थितेर्वा विघटकभावस्य विरोधित्वप्रसिद्धेर्न तदभावस्य सामग्र्यन्तर्भावः । विरोधिसंसर्गाभावस्य तत्प्रवेशे तत्प्रतियोगिनो विरोधित्वसिद्धिः, तस्मिंश्च सति तत्संसर्गाभावस्य सामग्रीप्रवेश इत्यन्योन्याश्रयदोषस्य दुरुद्धारत्वात् । प्रागभावस्यापि नियतप्राक्कालवर्तित्वेन कारणत्वे ऽभावविशेषणस्य कालस्यात्माश्रयताप्रसङ्गः । न च प्राग्वत्त्वेनैव कारणत्वं, तावन्मात्रे कारणलक्षणाभावात् । किञ्च कारणत्वं नाम धर्मो भावात्मको वा अभावात्मको वा । उभयथापि नाभावनिष्ठत्वं तस्य सम्भवति । विरोधिनोर्भावाभावयोर्बाध्यबाधकभावानुपपत्तेरभावस्य निर्विशेषत्वान्निरतिशयत्वाच्च । तस्मान्नाभावाद्भावोत्पत्तेर्दृष्टान्तः । तन्तुनाशात् पटनाश इत्यपि स्वप्रक्रियामात्रम् । अस्तु वा कदाचिदभावस्यापि कारणत्वं, तथापि न प्रत्यवायस्य अकरणहेतुत्वम् । प्रत्यवायशब्दवाच्यस्य पापादृष्टस्य तज्जन्यागामिदुःखस्य वा निषिद्धक्रियाजन्यत्वात् "पापकारी पापो भवति । अथ य इह कपूयचरणा अभ्यासो ह वा यत्ते कपूयां योनिमापद्येरन्" इति श्रुतेः । तस्मादकरणे प्रत्यवायज्ञापकानि नित्यानीति सुव्याख्यानमेव । तानि च सन्ध्यावन्दनपञ्चमहायज्ञादीनि । तेषां नित्यत्वे "नित्यं सदा यावदायुर्न कदाचिदतिक्रमेत् । उपेत्यातिक्रमे दोषश्रुतेरत्यागदर्शनात् । फलाश्रुतेर्वीप्सया च तन्नित्यमिति कीर्त्यते" इत्युक्ताष्टधाऽन्यतमद्योतकत्वमित्यास्तां विस्तरः ॥ १५५–१५६ ॥

निमित्तमात्रमासाद्य चोदितं यच्छ्रुतौ स्मृतौ ।
अवश्यकर्तव्यतया तन्नैमित्तिकमुच्यते ॥ १५७ ॥
कामिनां काम्यलाभार्थं चोदितं काम्यमुच्यते ।
ज्योतिष्टोमादिकं यद्वत्प्रायश्चित्तमथ ब्रुवे ॥ १५८ ॥
वृजिनक्षयमात्रार्थं विहितं यच्छ्रुतौ स्मृतौ ।
प्रायश्चित्तं तदेवाहुर्यथा चान्द्रायणादिकम् ॥ १५९ ॥
लिङादिसक्तनञ्योगिवाक्यगम्यं निषिद्धकम् ।
नरकादिकरं कर्म ब्रह्महत्यादिकं यथा ॥ १६० ॥

नैमित्तिकं व्युत्पादयति—निमित्तमिति । निमित्तमात्रमासाद्य पुत्रजन्मादिरूपकारणमवलम्ब्य श्रुतौ स्मृतौ वा यत् अवश्यकर्तव्यतया चोदितं विहितं तत् कर्म नैमित्तिकमिति उच्यते, वेदान्तविद्भिराचार्यैरिति शेषः । तथा च निमित्तनिश्चयवदधिकारिकर्तव्यत्वं नैमित्तिककर्मत्वमिति तल्लक्षणम् । अस्योदाहरणानि जातेष्टिक्षामवतीष्टिप्रभृतीनि । इष्टिर्यागः । जातेष्टिर्नाम "वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते" इत्यादिना विहिता । क्षामवती चेष्टिः "यस्याहिताग्नेरग्निर्गृहान् दहेत् स अग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेत्" इति विहिता । स्मार्तं चोपरागस्नानादिनैमित्तिकमेव ॥ १५७ ॥

काम्यं निरूपयति—कामिनामिति । कामिनां स्वर्गाद्यर्थिनां काम्यलाभार्थं स्वर्गादिफलप्राप्तये यत् कर्म चोदितं विहितं तत् कर्म काम्यम् । यद्वत् यथा ज्योतिष्टोमादिकम् । ज्योतिष्टोमो नाम "स्वर्गकामो यजेत" इति विहितो यागविशेषः । तथा च स्वर्गादिफलोल्लेखेन विहितानि कर्माणि काम्यानीति काम्यकर्मलक्षणम् । न च "विश्वजिता यजेत" इत्यादावव्याप्तिः । तत्रापि "स स्वर्गः स्यात् सर्वान् प्रत्यविशिष्टत्वात्" इत्यस्मिन् सूत्रे स्वर्गफलत्वस्य सिद्धान्तितत्वात् । सर्वत्र हि स्वर्गफलोद्देशेन विधेरभिसन्धितत्वाच्च ॥ १५८ ॥

प्रायश्चित्तं लक्षयति—वृजिनेति । वृजिनं पापम् । मात्रशब्दोऽन्ययोगव्यवच्छेदार्थः । विहितं विधिना बोधितम् । तथा च पापक्षयेतरसाधनत्वे सति पापक्षयसाधनं विधिबोधितं कर्म प्रायश्चित्तमिति प्रायश्चित्तलक्षणम् । चान्द्रायणादिकमित्यादिपदात् कृच्छ्रव्रतादीनां संग्रहः । अत्र विहिताकरणप्रतिषिद्धाचरणरूपनिमित्तविशेषानुबन्धित्वात् प्रायश्चित्ते नैमित्तिकत्वमप्यस्तीति विज्ञेयम् ॥ १५९ ॥

निषिद्धं लक्षयति—लिङादीति । "ब्राह्मणो न हन्तव्य" इत्यादाविव लिङाद्यनुषक्तनञ्पदयोगिवाक्यगम्यं नरकाद्यनिष्टसाधनं कर्म निषिद्धं इति योजना ।

अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ।
एते पञ्चयमाः प्रोक्ता योगिभिस्तत्त्वदर्शिभिः॥ १६१॥
शौचं संतोषकश्चैव तपः स्वाध्याय एव च।
ईश्वरप्रणिधानं च नियमाः पञ्च एव हि॥ १६२॥
क्षिप्तं मूढं च विक्षिप्तमेकाग्रं च निरुद्धकम्।
पञ्चैता भूमयः प्रोक्ता योगिभिस्तत्त्वदर्शिभिः॥ १६३॥
नित्यश्चावान्तरश्चैव तथा दैनंदिनाह्वयः।
ब्राह्मश्चात्यन्तिकश्चैते प्रलयाः पञ्चधेरिताः॥ १६४॥

स्वार्थे कः। लिङादीत्यादिपदात् तव्यादिविधिप्रत्ययः संग्राह्यः। नरकादीत्यादिपदात् "भुजङ्गायाङ्गुलिर्न देयः" इत्यादिवाक्यगम्यैहिकदुःखोऽपि संग्राह्यः। एतेन भ्रमावगतेष्टसाधनतानिषेधकनञ्योगिवाक्यगम्यत्वं निषिद्धकर्मत्वमिति तल्लक्षणं सम्पन्नम्॥ १६०॥

अहिंसादिपञ्चकं यमशब्दवाच्यमाह—अहिंसेति। प्राणवियोगप्रयोजनव्यापारो हिंसा। सा च सर्वानर्थहेतुः। तदभावोऽहिंसा। हिंसायाः सर्वकालमेव परिहार्यत्वम्। सत्यं वाङ्मनसोर्यथार्थत्वम्। स्तेयं परद्रव्यापहरणं, तदभावोऽस्तेयम्। ब्रह्मचर्यं उपस्थसंयमः। अपरिग्रहो देहयात्रानिर्वाहातिरिक्तभोगसाधनानामनङ्गीकरणम्॥ १६१॥

शौचादिपञ्चकं नियमशब्दवाच्यं योगाङ्गभूतमाह—शौचमिति। शौचं द्विविधं बाह्यमाभ्यन्तरं च। बाह्यं मृजलादिभिः कायक्षालनम्। आभ्यन्तरं मैत्र्यादिभिश्चित्तमलरागद्वेषादिक्षालनरूपम्। सन्तोषस्तुष्टिः। तपः शास्त्रान्तरोपदिष्टं चान्द्रायणव्रतादि। स्वाध्यायः प्रणवपूर्वाणां मन्त्राणां जपः। ईश्वरप्रणिधानं सर्वक्रियाणां फलनिरपेक्षतया परमगुरौ परमेश्वरे समर्पणरूपम्॥ १६२॥

भूमिपञ्चकमाह—क्षिप्तमिति। भूमयश्चित्तस्यावस्थाविशेषाः। तासां विभागः क्षिप्तमित्यादिना क्रियते। यदा खलु चित्तं लोकशास्त्रदेहवासनासु वर्तमानं तदा क्षिप्तभूमिका। यदा च निद्रातन्द्रादिग्रस्तं चित्तं तदा मूढभूमिका। कदाचिज्ज्ञानयुक्तं चित्तं क्षिप्ताद्विशिष्टं तदा विक्षिप्तभूमिका। एकाग्रभूमिस्तु सम्प्रज्ञातयोगः। सर्ववृत्तिनिरोधरूपोऽसम्प्रज्ञातसमाधिर्निरुद्धभूमिकेति भूमिपञ्चकविवृतिः॥ १६३॥

पञ्चप्रलयानाह—नित्येति। प्राणिनां सुषुप्तिर्नित्यप्रलयः। "चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते" इत्येकस्मिन्ब्राह्मेऽहनि चतुर्दशमनूनां चतुर्दशेन्द्राणां चाधि-

जीवो भिन्नश्च सङ्गी च कर्तृत्वं तस्य वास्तवम्।
विकारित्वं महेशस्य प्रपञ्चस्य च सत्यता ॥ १६५ ॥
इति पञ्चभ्रमानाहुः पण्डितास्तत्त्वदर्शिनः।
तेषां निवर्तनायोक्ता दृष्टान्ताः पञ्चसङ्ख्यकाः ॥ १६६ ॥
बिम्बानुबिम्बदृष्टान्तो रक्तस्फटिक इत्यपि।
सूर्याग्न्युत्पादकमणिर्घटाभ्रं स्वर्णकुण्डलम् ॥ १६७ ॥
भ्रान्त्या जगदिदं भाति तद्बोधाय विपश्चितः।
दृष्टान्तपञ्चकं प्राहुरन्यत्तद्ब्रूमि साम्प्रतम् ॥ १६८ ॥

पत्यं, तदेकस्यापगतेऽन्यस्य प्राप्ते सति तत्तदाधिपत्यविच्छेदावसरे चतुर्दशावान्तरप्रलया भवन्ति। ते च प्रलयाः पुराणादौ नैमित्तिकप्रलया मन्वन्तरप्रलया इति चोच्यन्ते। युगप्रलयानामपि तेष्वन्तर्भावः। ब्रह्मणः सुषुप्तिस्तु दैनंदिनप्रलयः। ब्रह्मणो हिरण्यगर्भस्य नाशावस्था ब्राह्मप्रलयः। तदानीं आकाशादिरहितं सन्मात्रं वर्तते। इममेव प्रलयं "सदेव सौम्येदमग्र आसीत्" इत्याद्याः श्रुतय आहुः। एतस्य ब्राह्मप्रलयस्य महाप्रलय इति संज्ञा। तथा प्राकृतप्रलयः सुषुप्तिरिति च। या मुक्तावस्था कथ्यते सैवात्यन्तिकप्रलय इति उच्यते। तत्समये अज्ञानस्य सर्वात्मना अभावः स्यादिति प्रलयपञ्चकविवेकः ॥ १६४ ॥

जीव इति। भिन्नः परमेश्वरादन्योऽहमिति। सङ्गी शरीरावच्छिन्नत्वात् तत्सम्बन्धविशिष्टः। कर्मणा तत्फलेन च युक्त इत्यर्थः। तस्य तदीयस्य कर्तृत्वं वास्तवं अनारोपितम्। महेशस्य परब्रह्मणः। विकारित्वं जगत्कारणत्वेन।

तेषामिति। तेषां भ्रमाणां निवर्तनाय विनाशार्थम्। तान् दृष्टान्तानाह—बिम्बेति। बिम्बानुबिम्बः बिम्बप्रतिबिम्बः। स च भेदभ्रमनिवर्तनाय उक्तः। रक्तस्फटिकदृष्टान्तो जीवकर्तृत्वादि वास्तवत्वभ्रान्तिनिवर्तनायोक्तः। सूर्याग्न्युत्पादकमणिः सूर्यमणिः अग्न्युत्पादकमणिश्च। सूर्यमणिः सूर्यकान्तः "आतस् पाथर" इति भाषा। अग्न्युत्पादकमणेस्तु "चक्मक्" इति भाषा। ब्रह्म विकारीति भ्रमनिवर्तनाय तावेव दृष्टान्ततया ग्राह्यौ। घटाभ्रं घटाकाशस्तद्दृष्टान्तेन सङ्गित्वभ्रमो निवर्तनीयः। स्वर्णकुण्डलदृष्टान्तेन कारणाद्भिन्नत्वेन प्रतीयमानस्य प्रपञ्चस्य सत्यत्वभ्रमो निवर्तनीय इति भ्रमपञ्चकविवृतिः ॥ १६५–१६६–१६७ ॥

अन्यत् दृष्टान्तपञ्चकं कथयति—भ्रान्त्येति। ब्रह्मणि इदं जगत् भ्रान्त्या भाति प्रतिभासते। तद्बोधाय जगद्भानस्य भ्रान्तित्वबोधनार्थम्। विपश्चितः

स्रक् सर्पः शुक्तिरूप्यं च स्थाणुचौरः खनीलता ।
मरीचिकाजलं चेति दृष्टान्ता भ्रान्तिनाशकाः ॥ १६९ ॥
आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा ।
तथाऽनिर्वचनख्यातिरित्येतत्ख्यातिपञ्चकम् ॥ १७० ॥

पण्डिताः । तान् दृष्टान्तान्नामतः कथयन्ति—स्रगिति । स्रक् माला । यथा स्रजि रज्वां वा सर्पभ्रमो दृष्टस्तथा ब्रह्मणि जगद्भ्रमो मन्तव्यः । सुगममन्यत् १६८–१६९

ख्यातिपञ्चकमाह—आत्मेति क्रमादित्यस्मात् परं विज्ञेयमिति योजनीयम् । तथा च विज्ञानवादिनामात्मख्यातिः, शून्यवादिनामसत्ख्यातिः, मीमांसकानामख्यातिः, तार्किकाणमन्यथाख्यातिः, अद्वैतविदां वेदान्तिनामनिर्वचनीयख्यातिः मतमित्यर्थो लब्धो भवति । ख्यातिः ज्ञानं, भ्रमज्ञानमिति यावत् । विज्ञानवादिनः बौद्धविशेषाः । तेषां मते न बाह्यं किञ्चित् वस्तु समस्ति, सर्वमान्तरं प्रतीत्यात्मकम् । बाह्यं तु अनाद्यविद्यावासनारोपितमलीकम् । तादृग्लक्षणके बाह्ये शुक्तिकादौ ज्ञानाकारस्य रजतादेरारोपादेतन्मतीयभ्रमस्यात्मख्यातित्वेन प्रसिद्धिः । आत्मशब्देनात्र बुद्धिरुच्यते । अस्मिंश्च मते रजतं नाध्यस्तं किन्तु आन्तरस्य संविदात्मकरजतस्य बहिष्ठतया प्रतीतिरेव भ्रमः । अत एव नेदं रजतमिति बाधोऽपि न रजतासत्त्वमावेदयति किन्तु इदंतापरपर्यायं बहिष्ठमेव प्रतिषेधयति । वेदान्तिकास्तु एतदेव मतमनया प्रणाल्या निराकुर्वन्ति—किं ज्ञानाकारता बाह्येऽध्यस्यते उत ज्ञानात्मनि रजते बहिष्ठत्वम् । नाद्यः । विज्ञानवादिमते बाह्यस्यालीकत्वादसत्त्वेन अधिष्ठानतानुपपत्तेः । न द्वितीयः । तस्यासत्त्वात् तद्विषयज्ञानस्य अपरोक्षता न स्यात् असत्ख्यात्यापत्तेः, रजतस्य च ज्ञानाकारत्वे प्रमाणाभावाच्च । दिङ्दर्शनमात्रमेतदिति ।

---

१ यथा जले प्रतिबिम्बितः सूर्य आदर्शे वा प्रतिबिम्बितं मुखं सूर्यात् स्वग्रीवास्थमुखाच्च नातिरिच्यते प्रतिबिम्बस्य मिथ्यात्वात्, तथा जीवोऽपि परमेश्वरान्नातिरिच्यते, तस्य तत्प्रतिबिम्बभूतत्वेन मिथ्यात्वात् । यथा स्फटिकरक्तताप्रतीतिः जपापुष्पाद्यौपाधिकी न तु पारमार्थिकी, तथा जीवकर्तृताप्रतीतिरपि अन्तःकरणौपाधिकी नतु पारमार्थिकी । यथा सूर्यः सूर्यकान्तमणिसम्बन्धात् जनयन्नपि वन्हिमविकारी, तथा मायासम्बन्धात् जनयदपि विश्वं ब्रह्म अविकारि । यथा घटाकाशो घटधर्मेण न संसृज्यते, तथा शरीरस्थमपि जीवाख्यं ब्रह्म वस्तुतः शरीरधर्मेण न संसृज्यते । यथा सुवर्णकटकयोः लोहखड्गयोर्वा मृद्घटयोर्वा सुवर्णस्यैव लोहस्यैव मृत्तिकाया एव वा सत्यता, तथा ब्रह्मजगतोर्ब्रह्मण एव सत्यता न जगत इत्येवं रीत्या बोधनीयाः ।

विज्ञानशून्यमीमांसातर्काऽद्वैतविदां क्रमात् ।
सांख्यानां सदसत्ख्यातिरख्यातिर्वा मतं क्वचित् ॥ १७१ ॥

शून्यवादिनोऽपि बौद्धविशेषाः । ते हि मन्यन्ते आद्यन्तयोरभावरूपत्वात् मध्ये यत्किञ्चित् सांवृतिकत्वेन शून्यमेव जगतस्तत्त्वमिति । एतेषां मते असत्प्रकाशनसमर्थं ज्ञानं असदेव रजतादिकं भासयतीति असत्येव ख्यातिरित्यसत्ख्यातिरितिसंज्ञा । अतो नेदं रजतमिति बाधोऽपि रजतासत्त्वमेवावेदयतीति । एतन्मतनिराकरणप्रकारस्त्वित्थं—असतोऽपरोक्षप्रतीत्यदर्शनात् सामर्थ्यस्य च कुत्र सामर्थ्यमिति विषयसापेक्षत्वेन विषयस्य चासतः कार्यज्ञाप्यविकल्पासहत्वाच्च असत्येव ख्यातिरित्यसत्ख्यातिरिति मतं ह्येयमेव । विस्तरस्त्वन्यत्र ।

मीमांसकाः जैमिनेयशास्त्रव्यवसायिनो भट्टकुमारिलादयः । एतदीयमते सर्वे प्रत्यया यथार्थाः प्रत्ययत्वादिति ज्ञानस्य संग्राहकस्वभावत्वम् । भ्रमस्थले तु ग्रहणस्मरणज्ञानद्वयत्वम् । तत्र तु ग्रहणमेव स्मरणात् अगृहीतभेदं बाध्याभेदव्यवहारप्रसञ्जकत्वात् भ्रम इति संज्ञा । भेदाग्रहस्तु दोषादिवशात् । दोषस्तु मन्दान्धकारादिः । अत एव नेदं रजतमिति बाधोऽपि शुक्तिरजतयोस्तज्ज्ञानयोश्चाभेदमेव निषेधति न तु रजतमेव निषेधतीति ते वदन्ति । अत्राप्यनिर्वचनीयवादिनो वैदान्तिका एवं विकल्पयन्ति—किं ग्रहणस्मरणे भासेते उत न भासेते । न चेत् भासेते, तर्हि न स्तः । तन्मते ज्ञानस्य स्वप्रकाशत्वात् अभासनेन स्वरूपाभावनिश्चयात् । भासेते चेत्, कथं तर्हि तयोर्भेदाग्रहः, भेदस्य स्वरूपत्वात् । ततश्च न अभेदव्यवहारप्रसञ्जकत्वेन भ्रमत्वव्यवस्थापनं सङ्गच्छते । तथा बाधव्यवस्थापनमपि अनुपपन्नम् । यत्र त्वयक्तैषणस्य व्यवहार एव नोदेति तत्र नेदमिति ज्ञानस्य बाधकत्वं न स्यात् । अतोऽख्यातिमते भ्रमादिसर्वव्यवस्थानुपपत्तिरित्यवधेयम् ।

तार्किका नैयायिका वैशेषिकाश्च । एतेषां मते इदं रजतमिति प्रत्ययः पुरोवर्तिविशेष्यको रजतत्वप्रकारकः । तत्र च पुरोवर्तिनि शुक्तिकाशकले शुक्तिकाशकलं वा न रजतं किन्तु सादृश्यात् उद्बुद्धसंस्कारोपनीतरजतात्मना पुरोवर्ति भातीति भवति भ्रमः । विषयस्य रजतस्य तत्रासत्त्वात् । ततश्च नेदं रजतमित्यनेन इदं रजतमिति प्रत्ययस्य व्यधिकरणप्रकारत्वनिश्चयो बाध इति ।

अनिर्वचनख्यातिवादिनस्तु एतस्मिन्मते दोषमित्थमर्पयन्ति—पूर्वप्रत्यये व्यधिकरणप्रकारकत्वनिश्चयोऽधिष्ठानविषयकाज्ञानं बाधते न वा । नाद्यः । भिन्नविषयत्वात् । अज्ञानं हि शुक्तिविषयं बाधश्च ज्ञानस्य व्यधिकरणप्रकारत्वविषयः ।

न च भिन्नविषययोर्ज्ञानाज्ञानयोर्बाध्यबाधकभावः, अतिप्रसङ्गात् । नापि द्वितीयः । वैयर्थ्यात् । स्वमते तु पुरोवर्तिनि मिथ्यारजतस्य तदानीमेवोत्पन्नत्वेन इदन्त्वेन प्रकारस्य व्यधिकरणत्वाभावान्नापसिद्धान्तापात इति दिङ्मात्रमेतत् ।

अद्वैतविदो वैदान्तिकाः शङ्करप्रभृतयः । त एवमाहुः—दोषवशात् साक्षात्कारानुकूलसंनिकर्षस्यासिद्ध्या अप्रमुष्टपुरोगतशुक्तिकाद्यज्ञानं सादृश्यधीसमुपोद्बलितस्वविक्षेपशक्त्या स्वाश्रय एव रजताद्यात्मना परिणम्यावभासते । स एवावभासः भ्रमारोपाध्यासादिशब्दवाच्यः । दोषाश्च मन्दान्धकारदूरत्वकाचदुष्टचक्षुष्ट्वादयो यथायथमूहनीयाः । तत्र योऽवभास्यते रजतादि तस्य आज्ञानिकत्वेन ज्ञानबाध्यत्वात् मिथ्यात्वं तथा अनिर्वाच्यत्वमपि । अत एव सर्वत्र भ्रमस्थले सत्यानृतज्ञानद्वयसंवलनमित्याहुः । तत्र च इदमंशे सत्यत्वमबाधात्, रजताद्यंशे मिथ्यात्वं बाधादित्यवसितम् । ततश्च नेदं रजतमिति नञा रजतमेव निषिध्यते न त्विदन्त्वम् । निषिध्यत इति तस्य त्रैकालिकाभावप्रतियोगित्वं ज्ञाप्यत इत्यर्थः । ततश्च प्रतिपन्नोपाधावध्यस्यमानं कालत्रयेऽपि नास्तीति योऽधिष्ठाननिश्चयानन्तरं बोधः स एव बाध इति साम्प्रदायिकानां बाधलक्षणं साधु संगच्छते । अत्र च परोक्षभ्रमे परोक्षमधिष्ठानज्ञानं अपरोक्षभ्रमे तदपरोक्षमिति विभागः । अध्यस्तस्य त्रैकालिकाभावनिश्चयस्य बाधत्वे साम्प्रदायिकानां अनिर्वचनीयलक्षणमुपपन्नं भवति । अध्यस्यमानस्य बाधोत्तरकालेऽसत्त्ववत् ततः पूर्वमपि तस्यासत्त्वमेवेत्यनिर्वाच्यवादरहस्यम् । तथा च अन्यथाख्यातौ भ्रमविषयो रजतादि अन्यत्र सत्, अनिर्वाच्यवादे तु यत्रैवाधिष्ठाने अध्यस्यते रजतादि तत्रैव तदात्मना तत् सत् न स्वातन्त्र्येण इति भवत्यधिष्ठानात् पार्थक्येन त्रिकालं तदसदेवेतिविशेषः । अत एव कादाचित्कसत्त्वमात्रत्वं नानिर्वचनीयत्वं, अतिव्याप्तेः । आविद्यकत्वे सति कादाचित्कत्वमनिर्वचनीयत्वमित्यपि लक्षणं न । तथा अविद्याजन्यं कादाचित्कमनिर्वचनीयमित्युक्तेऽप्यतिव्याप्तिः स्यात् । ततश्च ज्ञानबाध्यत्वान्यथानुपपत्त्या वर्तमानातीतकालयोरप्यध्यस्तं स्वरूपतोऽप्यसदेवेति अधिष्ठाने त्रैकालिकाभावप्रतियोगित्वमनिर्वचनीयत्वमित्यनवद्यं लक्षणम् । यद्यप्येतन्मते शुक्तिकादेरप्यनिर्वाच्यता, तथापि व्यावहारिकसत्तामादायैव तत्र रजताध्यासः साधयितव्यः । वस्तुतः शुक्त्यादेरप्यधिष्ठानब्रह्मचैतन्येऽध्यस्तत्वात्तस्य तत्र त्रैकालिकाभावप्रतियोगित्वमक्षतमेवेति दिक् ।

सांख्यानामिति । सदसत्ख्यातिः कचिच्च अख्यातिर्मतम् । कचिदित्यनेन सांख्यविशेषस्याक्षेपः क्रियते ॥ १७०–१७१ ॥

अविद्या चास्मिता रागो द्वेषश्चाभिनिवेशकः।
क्लेशाः पञ्च समाख्यातास्तथा तेऽपि विपर्ययाः ॥ १७२ ॥
अनात्मन्यात्मबुद्धिर्या साऽविद्या परिकीर्तिता।
बुद्ध्यात्मनोरस्मिता स्यादभेदारोप एव यः ॥ १७३ ॥
सुखे लोभश्च रागः स्याद्दुःखे द्वेषो जिघांसिका।
आशिः स्वाभाविके या सा पञ्चमः क्लेश उच्यते ॥ १७४ ॥

---

६ वक्ष्येऽथ षड्गणीं संज्ञां वेदान्तेषु व्यवस्थिताम्।
काम: क्रोधश्च लोभश्च मोहश्चैव मदस्तथा ॥ १७५ ॥
मात्सर्यं च षडेवैतान्यरिषड्वर्ग उच्यते।
ज्योतिरस्तिश्च वृद्धिश्च परिणामोऽप्यपक्षयः ॥ १७६ ॥

पञ्चक्लेशानाह—अविद्येति। ये तु पञ्चक्लेशाः क्लेशसंज्ञया व्यवहृतास्ते विपर्यया अपि। विपर्ययसंज्ञया तेषां व्यवहार इत्यर्थः। अभिनिवेशक इति कुत्सितार्थे कः ॥ १७२ ॥

अविद्यालक्षणमाह—अनात्मनीति। अनात्मनि देहादौ। उपलक्षणमेतत्। अनित्याशुचिदुःखेषु नित्यशुचिसुखबुद्धिरप्यविद्याशब्देनोक्ता। तादृश्या एव बुद्धेर्विद्याविपरीतत्वात् विद्याविरोधित्वाद्वा अविद्येति नाम। विद्या तत्त्वज्ञानम्।

अस्मितालक्षणमाह—बुद्ध्येति। यश्च बुद्ध्यात्मनोरभेदारोपः स एव अस्मिताख्यः क्लेशः। बुद्धिरन्या पुरुषोऽन्य इत्यत्यन्तविविक्तयोः अत्यन्तासंकीर्णयोरविभागप्राप्तौ भोगः स्यात्, अतोऽस्य क्लेश इति संज्ञा। क्लिश्नातीति क्लेशः॥ १७३॥

रागाख्यक्लेशमाह—सुखेति। सुखे चकारात् तत्साधने द्रव्यादौ यो लोभस्तृष्णा स एव रागाख्यः क्लेशः। तथा दुःखे चकारात् तत्साधने या जिघांसा द्वेषः सैव द्वेषनामा क्लेशः। या स्वाभाविकी नित्या आशिः "मा न भूवं भूयासमेव" इत्याकृमेरपि सर्वस्य जन्तोरुच्छेददृष्ट्यात्मको मरणत्रास इति यावत्, स एव पञ्चमोऽभिनिवेशाख्यः क्लेशः ॥ १७४ ॥

संक्षेपेण पञ्चगणीं संज्ञां समाप्य क्रमप्राप्तां षड्गणीं वक्तुं प्रतिजानीते—वक्ष्य इति। तत्रादावरिषड्वर्गमाह—कामेति श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामात्मसंयुक्तेन मनसा अधिष्ठितानां स्वेषु स्वेषु विषयेष्वानुकूल्यतः प्रवृत्तिः कामः, स्पर्शविशेषविषये त्वाभिमानिकसुखानुविद्धा फलवत्यर्थप्रतीतिरपि कामः। एवं क्रोधादिशब्दानामर्थो यथायथमूहनीयः।

नाशश्चेति च भावानां विकाराः स्युः षडेव हि ।
त्वगसृङ् मांसमेदोऽस्थिमज्जानः षट्कोषका मताः ॥ १७७ ॥
जरा च मरणं क्षुच्च पिपासा शोकमोहकौ ।
षडेते ऊर्मयः प्रोक्ताः पण्डितैस्तत्त्वचिन्तकैः ॥ १७८ ॥
उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥ १७९ ॥

षड्भावविकारानाह—जातिरिति । जातिर्जन्म उत्पत्तिरिति च पर्यायाः । अस्तिः सत्ता जन्मनिबन्धना स्थित्यभिधेया । वृद्धिः अवयवोपचयः । अपक्षयः अवयवह्रासः । विपरिणामः विक्रिया अवस्थान्तरापत्तिर्वा । नाशो ध्वंसः ।

षट्कोषसंज्ञायाः संज्ञिनमाह—त्वगिति । सुगममेतत् पद्यार्धम् ॥ १७५–१७६–१७७ ॥

ऊर्मिषट्कमाह—जरेति । जरा वार्धक्यं, मरणं प्रसिद्धं, क्षुत् क्षुधा, पिपासा गर्धस्तृष्णाख्यः, शोकः इष्टवियोगादिजनितं दुःखं, मोहो बुद्धिकौण्ठ्यम् ॥ १७८ ॥

ग्रन्थतात्पर्यनिर्णायकलिङ्गषट्कं कथयति—उपेति । तात्पर्यनिर्णये शास्त्रीयसन्दर्भादेर्मुख्यार्थनिर्णयं प्रति उपक्रमादिरेव लिङ्गं चिह्नभूतं बोधकमिति यावत् । तत्र उपक्रम आरम्भः । यथा छान्दोग्योपनिषत्षष्ठप्रपाठकस्य "सदेव सौम्येदमग्र आसीत्" इति सृष्टेः पूर्वं नामरूपरहितं सत्तामात्रमिदं जगत् आसीत् इत्यनेनैव प्रकारेण य आरम्भः कृतः स एव उपक्रमनामधेयं लिङ्गं श्रुतीनामद्वैतात्मप्रतिपादकत्वे गमकम् । उपसंहारः अन्तेऽप्युपक्रान्तस्यार्थस्य प्रतिपादनम् । यथा तस्मिन्नेवोपनिषदि तत्प्रपाठकशेषे "ऐतदात्म्यमिदं सर्वम्" इत्युक्त्या प्रतिपाद्यमानं प्रक्रान्तं वा सर्वमिदं जगत् पूर्वोक्तं सत् स्वयमेव नान्यदिति प्रतिपादनम् । मध्येऽपि अभ्यासः पौनःपुन्येन प्रक्रान्तस्यैवार्थस्य उपदेशः । यथा तदुपनिषत्तत्प्रपाठकमध्ये "तत्त्वमसि श्वेतकेतो, तत्त्वमसि श्वेतकेतो" इत्यादिना नवसंख्याकोपदेशेन तस्यैवाद्वितीयात्मभावस्य प्रतिपादनम् । अपूर्वता प्रमाणान्तरागम्यत्वम् । यथा तत्रैव "तं त्वौपनिषदं पुरुषं" इत्याद्युक्त्या प्रमाणानां मध्ये उपनिषत्प्रमाणेनैवात्मा अवगम्यते नेतरेणेति विवेकोऽवधारणं वा । फलं तद्विज्ञानफलकथनम् । यथा तत्रैव "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये" इत्यादिना वाक्यजातेन प्रारब्धक्षयपर्यन्तं देहेन्द्रियादौ मिथ्याप्रतीतिः, प्रारब्धे तु निःशेषतां प्राप्ते तदप्रतीतिपूर्वकं अद्वितीयात्मस्वरूपेणावस्थानमिति फलप्रतिपादनम् । अर्थवादः प्रक्रान्तस्य प्रशंसा ।

अर्थापत्तिस्तथा योग्यानुपलब्धिश्चतुष्टयैः।
प्रागुक्तैश्च सहाऽमुष्मिन्प्रमाणानि षडेव हि॥ १८०॥
ज्ञानेनैवोपपाद्यस्य योऽपपादककल्पना।
अर्थापत्तिप्रमा सा तत्करणं च तदाह्वयम्॥ १८१॥
यद्विनाऽनुपपन्नं यत्तत्र तच्चोपपाद्यकम्।
यदभाववशाद्यस्याऽनुपपत्तिः स चापरः॥ १८२॥

यथा तत्रैव "श्रुतं भवतां मतं मतं विज्ञानं विज्ञातं" इत्याद्युक्त्या प्रक्रान्तस्यैवाद्वितीयात्मतत्त्वस्य प्रशंसनम्। उपपत्तिर्युक्तिः। यथा तस्मिन्नेव "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इत्यादिवाक्यजातैः यथा मृत्तिकाजातघटशरावादीनां मृत्तिकाऽभिन्नत्वं, यथा वा सुवर्णजातमुकुटादीनां सुवर्णाभिन्नत्वं तथा ब्रह्मजातजगतः सद्ब्रह्माऽभिन्नत्वमिति युक्त्या प्रबोधनम्। अनेन षड्विधेन लिङ्गेन उपनिषदां अद्वैतब्रह्मात्मन्येव तथा तद्विज्ञानस्य मोक्षरूपे फले तात्पर्यमित्यवसीयते॥ १७९॥

प्रमाणषट्कं कथयति—अर्थेति। प्रागुक्तैश्चतुष्टयैः पूर्वोक्तप्रत्यक्षादिभिः प्रमाणैः सह अर्थापत्तिस्तथा योग्यानुपलब्धिश्चेति षडेव प्रमाणानि अमुष्मिन् मते अमीषां वा वेदान्तिनां मते हि प्रसिद्धानीति पदयोजना॥ १८०॥

प्रत्यक्षादीनां लक्षणं पूर्वमुक्तम्। इदानीं त्वर्थापत्त्यनुपलब्ध्योर्लक्षणं वक्तव्यम्। तत्र प्रथमं तावदर्थापत्तेर्लक्षणादिकमाह—ज्ञानेति। उपपाद्यस्य ज्ञानेन या उपपादककल्पना सा अर्थापत्तिप्रमा। तत्करणं च तस्याः प्रमायाः यत्करणं तदपि तदाह्वयं, अर्थापत्तिसंज्ञकमित्यर्थः। ततश्च उपपाद्यज्ञानं करणं, उपपादकज्ञानं तु फलमित्युभयत्राप्यर्थापत्तिशब्दो वर्तत इत्यभिहितं भवति। तत्र प्रमापक्षे अर्थस्यापत्तिः कल्पनेति षष्ठीसमासः। प्रमाणपक्षे तु अर्थस्यापत्तिः कल्पना यस्मादिति बहुव्रीहिसमासः कार्यः॥ १८१॥

उपपाद्योपपादकयोर्लक्षणं विशदयति—यदिति। यद्विना येन विना यत् अनुपपन्नं तत्र तदेव उपपाद्यकं उपपाद्यम्। स्वार्थे कः। चोऽवधारणे। उपपादकाभावव्यापकाभावप्रतियोगित्वमुपपाद्यत्वमित्यर्थः। यस्य तु पदार्थस्य अभाववशात् यस्य अनुपपत्तिः स्यात् स एव पदार्थस्तत्र अपरः उपपादकः स्यात्। तथा च उपपाद्याभावव्याप्याभावप्रतियोगित्वमुपपादकत्वमिति लक्षणं भवति॥ १८२॥

यथा चैत्रादि वाऽभोजी पीन इत्यादिके स्थले।
पीनत्वमुपपाद्यं स्यान्नक्ताशयस्तूपपादकः॥ १८३॥
दृष्टश्रुतविभेदेन सेयं द्वेधा प्रकीर्तिता।
शुक्तिरूप्यादिके त्वाद्या तरतीत्यादिकेऽपरा॥ १८४॥
तत्राप्यन्त्या द्विधा ज्ञेयाऽभिधानानुपपत्तितः।
तथा चाभिहितस्यैवाऽनुपपत्तिवशाद्यथा॥ १८५॥

उदाहरणमाह—यथेति। नक्ताशः रात्रिभोजनम्। रात्रिभोजनं विना दिवाऽभोजिनः पीनत्वं पीवरत्वमनुपपन्नमिति तादृशं पीनत्वमुपपाद्यम्। तथा रात्रिभोजनाभावे तादृशपीनत्वस्यात्रानुपपत्तिरिति रात्रिभोजनमुपपादकम् १८३

उक्तलक्षणलक्षितामर्थापत्तिं विभजते—दृष्टेति। दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेत्यर्थः। इदं रजतमित्यादौ दृष्टार्थापत्तिः। "तरति शोकमात्मवित्" इत्यादौ तु श्रुतार्थापत्तिः। तथा हि—इदं रजतमिति पुरोवर्तिनि प्रतीतस्य रजतस्य शब्दात् नेदं रजतमिति तत्रैव पुरोवर्तिनि निषिध्यमानत्वं रजतस्य सत्त्वे सत्यत्वे वा अनुपपन्नमिति रजतस्य सद्भिन्नत्वं सत्यतात्यन्ताभाववत्त्वरूपं वा मिथ्यात्वं कल्पयतीति भवति दृष्टार्थापत्त्युदाहरणम्। श्रुतार्थापत्तिस्तु श्रूयमाणवाक्यस्य स्वार्थानुपपत्तिमुखेनार्थान्तरकल्पनम्। यथा "तरति शोकमात्मवित्" इति श्रुतस्य शोकशब्दवाच्यबन्धस्य ज्ञाननिवर्त्यत्वान्यथानुपपत्त्या बन्धस्य मिथ्यात्वं कल्प्यते। लौकिके तु "जीवी देवदत्तो गृहे न" इति वाक्यश्रवणानन्तरं जीविनो गृहासत्त्वं बहिःसत्त्वं कल्पयत्येवेति भवति तत्रापि श्रुतार्थापत्तिः॥ १८४॥

श्रुतार्थापत्तेरपि द्वैविध्यमस्तीति तत् कथयति—तत्र इति। तत्र तयोरर्थापत्त्योर्मध्ये अन्त्या श्रुतार्थापत्तिः द्विधा द्विप्रकारा। एका अभिधानानुपपत्तिरूपा द्वितीया त्वभिहितानुपपत्तिरूपा इति विभागः। आद्या अभिधानानुपपत्तिः अपरा अभिहितानुपपत्तिः। यत्र वाक्यैकदेशश्रवणे अन्वयाभिधानानुपपत्त्या अन्वयाभिधानोपयोगिपदान्तरं कल्प्यते तत्राभिधानानुपपत्तिरूपा अर्थापत्तिः। यथा द्वारमित्युक्तौ पिधेहीति पदाध्याहारः क्रियते। वैदिकेऽपि "विश्वजिता यजेत" इत्यादौ स्वर्गकामपदमध्याह्रियते।

न च द्वारकर्मकपिधानं इत्यन्वयाभिधानात् प्राक् पिधानोपस्थापकं पदं विना न द्वारमित्यन्वयाभिधानमुपपद्यत इति कथं ज्ञातमिति वाच्यम्। अभिधीयते अनेनेति करणव्युत्पत्त्या अभिधानपदेन तात्पर्यस्य विवक्षितत्वात्। ततश्च द्वारकर्मकक्रियासंसर्गावबोधकतात्पर्येणैव अनेन द्वारमित्युच्चरितमिति ज्ञानवतोऽ-

द्वारमित्यादिके त्वाद्या यजेतेत्यादिकेऽपरा।
लौकिके वाक्यसन्दर्भे दृश्यते वैदिकेऽपि च ॥ १८६ ॥
अभावानुभवे यत्स्यादसाधारणकारणम्।
तदेवाऽनुपलब्ध्याख्यं प्रमाणं षष्ठमुच्यते ॥ १८७ ॥

न्वयाभिधानवत् प्रागपि तथा ज्ञानं सम्भाव्यत इति सन्तोष्टव्यम्। अभिहितानुपपत्तिस्तु यत्र वाक्यावगतोऽर्थोऽनुपपन्नत्वेन ज्ञातः सन् अर्थान्तरं कल्पयति तत्र। यथा "स्वर्गकामो यजेत" इत्यादौ क्रियाकलापात्मकस्य यागादेः क्षणिकतया कालान्तरभाविस्वर्गसाधनत्वानुपपत्त्या मध्यवर्त्यपूर्वं कल्प्यत इति।

न चास्यानुमानान्तर्भावः शङ्कनीयः। अन्वयव्याप्त्यज्ञानेनान्वयिन्यनन्तर्भावात् व्यतिरेकव्याप्तिज्ञानस्य चानुमितिकरणत्वे वेदान्तिभिर्दोषस्योक्तत्वाच्च। अत एव पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वादित्यादौ गन्धवत्त्वं इतरभेदं विना अनुपपन्नं इत्यादिज्ञानस्यार्थापत्तिरेव करणम्। अत एवानुव्यवसायः पृथिव्यामितरभेदं कल्पयामीति। वस्तुतस्तु नानुमिनोमि नोपमिनोमि न शब्दयामि किन्त्वर्थापत्त्या कल्पयामीत्यनुभववशादेवार्थापत्तेर्मानान्तरत्वमिति ॥ १८५–१८६ ॥

षष्ठं योग्यानुपलब्धिप्रमाणं व्युत्पादयति—अभावेति द्वाभ्याम्। अभावानुभवासाधारणकारणमिति लक्षणं, अनुपलब्ध्याख्यमिति लक्ष्यम्। आद्ये लक्षणभागे ज्ञानकरणाजन्येति तथा लक्ष्यभागे योग्येति च विशेषणं देयमिति सम्बन्धः। ततश्च तेन तेन विशेषणेन दोषोद्धारः अतिव्याप्त्यादिलक्षणदोषाणां उद्धारः परिहारो भवेत्। तथा च यत् ज्ञानकरणाजन्याभावानुभवासाधारणं कारणं तदेव योग्यानुपलब्ध्याख्यं प्रमाणमिति लक्षणकायालाभः। अनुमानादिजन्या अतीन्द्रियाभावानुभवहेतौ अनुमानादौ अतिव्याप्तिवारणाय ज्ञानकरणजन्येति। भावानुभवकरणे चक्षुरादावतिव्याप्तिवारणाय भावेति। अदृष्टादौ साधारणकारणेऽव्याप्तिवारणाय असाधारणेति। अभावस्मृत्यसाधारणकारणसंस्कारेऽतिव्याप्तिवारणाय अनुभवेति च विशेषणम्। धर्माधर्मादेरनुपलब्ध्या तत्र तदभावनिश्चयो मा भूदिति लक्ष्यांशेऽपि योग्येति विशेषणं देयम्। तथा च योग्यानुपलब्धेरेव अभावप्रमितिहेतुत्वं न तु उपलब्धिमात्रस्य। अत्र च योग्यस्य प्रतियोगिनोऽनुपलब्धिरिति षष्ठीसमासो, योग्याधिकरणे वा प्रतियोगिनोऽनुपलब्धिरिति सप्तमीसमासो नाश्रयितव्यः। षष्ठीसमासपक्षे स्तम्भे पिशाचादिभेदस्याप्रत्यक्षत्वापत्तिदोषः, सप्तमीसमासपक्षे तु आत्मनि धर्माधर्माद्यभावस्यापि प्रत्यक्षत्वापत्तिदोषः। कर्मधारयाश्रयणे तु नोक्तदोषावतारः। योग्या चासौ अनुपलब्धि-

आद्ये तु ज्ञानकरणाऽजन्येति हि विशेषणम् ।
देयं योग्येति लक्ष्यांशे दोषोद्धारस्ततो भवेत् ॥ १८८ ॥
प्रागभावस्तथा ध्वंसाभावो ऽत्यन्ताभाव एव च ।
अन्योन्याभाव इत्येवं स्यादभावश्चतुर्विधः ॥ १८९ ॥

योग्यानुपलब्धिरिति विग्रहः । अर्थस्तु दर्शनयोग्यस्य अदर्शनं दर्शनाभाव इति यावत् । यत्र "यदि स्यात्तदा दृश्येत" इत्याकारकस्य आपादनस्य सम्भवस्तत्रैव दर्शनयोग्यस्य दर्शनाभावो न तु सर्वत्र । अत एव "स्फीतालोकवर्ती भूतले यदि घटः स्यात् तदा घट उपलब्धः स्यात्" इत्यापादनसम्भवात् तादृशभूतले घटाभावोऽनुपलब्धिगम्यः । अन्धकारे तु तादृशापादनासम्भवात् नानुपलब्धिगम्यता । स्तम्भे तादात्म्येन पिशाचसत्त्वे स्तम्भवत् प्रत्यक्षत्वापत्त्या तदभावोऽनुपलब्धिगम्यः । आत्मनि धर्मादिसत्त्वेऽप्यस्यातीन्द्रियतया निरुक्तोपालम्भापादनासम्भवात् न धर्माद्यभावस्यानुपलब्धिगम्यत्वमित्युक्तं परिभाषादौ । अत एव योग्यप्रतियोगिकत्वयोग्याधिकरणकत्वादिरूपा योग्यता तत्तदभावग्रहे नानैवेति सिद्धान्तितम् । अत्र च प्रतियोगिप्रत्यक्षाभावः करणं, अनुमितिरवान्तरव्यापारः, अभावज्ञानं फलम् । अर्थापत्तौ तु ज्ञानं करणं, अनुपपत्तिज्ञानमवान्तरव्यापारः, उपपादकज्ञानं फलमिति तयोर्भेदः । न चाभावस्य केवलाधिकरणात्मकतया प्रत्यक्षेण ग्रह इति वाच्यम् । तस्य अधिकरणात्मकत्वे भूतले घटाभाव इत्याधाराधेयभावप्रतीत्यनुपपत्तेः । किञ्च घटो नास्ति नायं पट इत्यादिव्यवहारस्य सघटे प्रसङ्गान्न भूतलमात्रं विषयः । घटविविक्तस्य विषयत्वे अभावातिरिक्तस्य विवेकस्य असम्भवात् सिद्धमभावेन । तद्ग्राहकं च योग्यानुपलब्धिरेव न प्रत्यक्षम् । तथा हि—अभावो नेन्द्रियग्राह्यः संनिकर्षाभावात् । न च विशेषणत्वादिः संनिकर्षः । तस्य प्रत्येकवृत्तितया उभयनिष्ठत्वाभावेन संनिकर्षत्वायोगात् । न च तत्र अभावस्मरणम्, पूर्वं तदनुभवाभावात् । एवं च तस्यानुपलब्धिरूपप्रमाणान्तरवेद्यत्वमेवेति सिद्धं योग्यानुपलब्धेर्मानान्तरत्वमिति ॥ १८७–१८८ ॥

एवमनुपलब्धिप्रमाणमुपवर्ण्य प्रासङ्गिकत्वेन तत्प्रमाणविषयमभावं विभजते—प्रागिति । कारणे कार्योत्पादात् पूर्वं योऽभावः स प्रागभावः । कार्यसमवायिकालान्यावृत्तित्वे सति कार्योत्पत्तिपूर्वकालीनत्वं प्रागभावत्वमिति तदर्थः । स च भविष्यतीति प्रतीतिविषयः । घटो भविष्यतीति प्रत्ययो घटप्रागभावमेव विषयीकरोति न त्वन्यत्किमपि । एवं कार्यसमवायिकालान्यावृत्तिप्रतियोग्य-

अन्त्यः सादिरनादिश्च सोपाधिर्निरुपाधिकः।
इत्थं चतुर्विधो ज्ञेयो वेदान्ताध्यायिभिः क्रमात् ॥ १९० ॥
स्नानं सन्ध्या जपो होमो देवतापूजनं तथा।
आतिथ्यं वैश्वदेवश्च षट्कर्माणि प्रचक्षते ॥ १९१ ॥

जनको ध्वंसाभावः। स च विनष्ट इति प्रत्ययगोचरः। यत्राधिकरणे यस्य कालत्रयेऽप्यभावः सोऽत्यन्ताभावः, यथा वायौ रूपस्यात्यन्ताभावः। इदमिदं नेति प्रत्ययविषयोऽन्योन्याभावः। तादात्म्यसंसर्गावच्छिन्नप्रतियोगिताक इति यावत्। अयमेव विभागो भेदः पृथक्त्वं चेति व्यवह्रियते। प्रकारान्तरेण अन्योन्याभावं विभजते–अन्त्य इति। अन्त्यः अन्योन्याभावः। साद्यादिक्रमेण चतुर्विधः। तत्र तावदधिकरणस्य सादित्वेन सादिरन्योन्याभावः यथा घटे पटभेदः। अधिकरणस्यानादित्वे त्वनादिरेव अन्योन्याभावः। यथा जीवे ब्रह्मभेदः ब्रह्मणि वा जीवभेदः। द्विविधोऽपि भेदो ध्वंसप्रतियोग्येव, अविद्यानिवृत्तौ तत्परतन्त्राणां निवृत्त्यवश्यंभावात्। अस्य सोपाधिकत्वं [1]उपाधिसत्ताव्याप्यसत्ताकत्वमेव। निरुपाधिकं तु तच्छून्यत्वम्। यथा एकस्यैवाकाशस्य घटाद्युपाधिभेदेन भेदः। यथा वा एकस्य सूर्यस्य जलभाजनादिभेदेन भेदः। प्रकृते तु एकस्यैवात्मनोऽन्तःकरणभेदाद्भेद इत्यवगन्तव्यम्। निरुपाधिकभेदस्तु यथा घटे पटभेद इति दिङ्मात्रमुक्तम् ॥ १८९–१९० ॥

एवं प्रासङ्गिकमभावभेदं व्युत्पाद्य पुनः प्रक्रान्तमनुशास्ति–स्नानमिति। स्नानं वैधम्। सन्ध्या सन्ध्योपासना। जपः विधिबोधितेन प्रकारेण गायत्र्या-

---

१ उपाधिसत्ताया व्याप्या सत्ता यस्य भेदस्य तस्य भावस्तत्त्वम्। यत्र यत्राकाशादिभेदसत्ता तत्र तत्र घटाद्युपाधिसत्तेति भेदोपाधिसत्तयोर्व्याप्यव्यापकभावः। अत्र च घटध्वंसस्यापि स्वाधिकरणकपालनाशे नाश इत्यङ्गीक्रियते। न च घटोन्मज्जनापत्तिः। घटध्वंसध्वंसस्यापि घटप्रतियोगिकध्वंसत्वात्। अन्यथा प्रागभावध्वंसात्मकघटस्य विनाशे प्रागभावस्याप्युन्मज्जनापत्तिः। अयमभिसन्धिः–नात्र नाशकाभावः शक्यः। अधिकरणनाश एव तस्य नाशकः। न चास्ति प्रागभावध्वंसानाधारकालस्य प्रतियोगिताकालतानियमो येन घटोन्मज्जनापत्तिर्भवेत्। घटध्वंसकालस्य तु घटकालत्वाभाववत् तत्प्रतियोगिकध्वंसकालस्यापि तथात्वात्। नापि ध्वंसजनककालस्य तत्प्रतियोगित्वनियमात् कथमजनकस्य घटस्य तत्प्रतियोगित्वमिति शंक्यम्। नष्टो घट इति प्रतीतिसम्भवात् घटध्वंसध्वंसस्यापि घटजनकत्वोपचारात् तत्प्रतियोगिकत्वमास्थेयम्। अन्यथा अतिप्रसङ्गः स्यादित्यनुसन्धातव्यम्।

शमो दमस्तथा चात्र तितिक्षोपरतिस्तथा।
शमादिषट्कमित्युक्तं समाधिः श्रद्धया सह ॥ १९२ ॥

सर्वज्ञता तृप्तिरनादिबोधः।
स्वतंत्रता नित्यमलुप्तशक्तिः॥
अनन्तशक्तिश्च विभोर्विधिज्ञाः।
षडाहुरङ्गानि महेश्वरस्य ॥ १९३ ॥

अजिह्वः षण्डकः पङ्गुरन्धो बधिर एव च।
मुग्धश्च मुच्यते भिक्षुः षड्भिरेतैर्न संशयः॥ १९४ ॥

कुलं गोत्रं तथा जातिर्वर्णाश्चाश्रमनामके।
एतैर्विशेषणैः शास्त्रे षड्भ्रमाः परिकीर्तिताः॥ १९५ ॥

दिमन्त्राणामुच्चारणम्। आतिथ्यमतिथिसेवनम्। वैश्वदेवः अहरहः कर्तव्यं बलिकर्म। एतत्षट्कं षट्कर्मसंज्ञया व्यवह्रियते ॥ १९१ ॥

शमादिषट्कमाह—शम इति। शमः बहिरिन्द्रियनिग्रहः। दमः अन्तरिन्द्रियसंयमः। तितिक्षा शीतोष्णादिद्वंद्वसहनम्। उपरतिः रूपादिविषयानुभववर्जनम्। समाधिः समाधानं, आत्मतत्त्वे मनःस्थैर्यमिति यावत्। श्रद्धा गुरुषु शास्त्रवाक्येषु च विश्वासः। एतत् शमदमादिषट्कं शमादिसाधनसम्पच्छब्देनाप्यभिधीयते ॥ १९२ ॥

षडैश्वर्यमाह—सर्वेति। सुगममेतत्पद्यम् ॥ १९३ ॥

अजिह्वादिषट्कं कथयति—अजिह्वेति। अजिव्हादीनां लक्षणं प्राचीनैरेवमुक्तं "इदमिष्टमिदं नेति योऽश्नन्नपि न सज्जते। हितं सत्यं मितं वक्ते तमजिह्वं प्रचक्षते ॥१॥ अद्य जातां यथा नारीं तथा षोडशवार्षिकीम्। शतवर्षां च यो दृष्ट्वा निर्विकारः स षण्डकः॥ २ ॥ भिक्षार्थमटनं यस्य विण्मूत्रकरणाय च। योजनान्न परं याति सर्वथा पङ्गुरेव सः ॥ ३ ॥ तिष्ठतो व्रजतो वापि यस्य चक्षुर्न दूरगम्। चतुर्दिक्षु भुवं गत्वा परिव्राट् सोऽन्ध उच्यते ॥ ४ ॥ हिताहितं मनोरामं वचः शोकावहं च यत्। श्रुत्वापि न शृणोतीह बधिरः स प्रकीर्तितः ॥ ५ ॥ सांनिध्ये विषयाणां च समर्थोऽविकलेन्द्रियः। सुप्तवत् वर्तते नित्यं स भिक्षुर्मुग्ध उच्यते" ॥ १९४ ॥

षड्भ्रमानाह—कुलमिति। कुलभ्रमो गोत्रभ्रमो जातिभ्रमो वर्णभ्रम आश्रमभ्रमो नामभ्रमश्चेति षड्भ्रमाः। तत्र गौडद्राविडकर्णाटकादिभेदाभिमानव्यव-

ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥ १९६ ॥
उत्पत्तिनिधने यो वै भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥ १९७ ॥

---

७ अथाज्ञानावृतिस्तद्वद्विक्षेपश्च परोक्षधीः ।
अपरोक्षमतिः शोकमोक्षस्तृप्तिर्निरङ्कुशा ॥ १९८ ॥
सप्तावस्था इमाः सन्ति चिदाभासस्य तास्विमौ ।
बन्धमोक्षौ स्थितौ तत्र तिस्रो बन्धकृतः स्मृताः ॥ १९९ ॥

हारः कुलभ्रमः । काश्यपभारद्वाजादिव्यवहारो गोत्रभ्रमः । ब्रह्मक्षत्रवैश्यशूद्र-भेदाभिमानव्यवहारो जातिभ्रमः । अहं ब्राह्मणः अतः क्षत्रियात् श्रेष्ठः, अहं क्षत्रियः अतः शूद्रात् श्रेष्ठ इत्येवमाभिमानिकव्यवहारो वर्णभ्रमः । विस्पष्ट-मन्यत् ॥ १९५ ॥

षडैश्वर्यमाह—ऐश्वर्यस्येति । सर्वत्र समग्रशब्दो योजनीयः ॥ १९६ ॥

प्रकारान्तरमाह—उत्पत्तीति । भूतानामिति जन्यवस्तुमात्रोपलक्षणम् । आगतिमाविर्भावं, गतिं तिरोभावं, उत्पत्तिनिधने इति यावत् । विद्यां तत्त्व-ज्ञानम् । अविद्यां संसारकारणमज्ञानम् ॥ १९७ ॥

एवं संक्षेपतः षड्गणीं संज्ञामुपवर्ण्य सप्तगणीं वक्तुमाह—अथेति । षड्गणीसंज्ञां समाप्य सप्तगणीं वक्तुमारभ्यते इत्यथशब्दतात्पर्यार्थः । योजना त्वित्थं— । चिदा-भासस्य जीवस्य इमाः संनिहितोक्ता अज्ञानाद्याः सप्त अवस्थाः सन्ति । तासु अव-स्थासु इमौ प्रसिद्धौ बन्धमोक्षौ स्थितौ । तत्र तिस्रो बन्धकृतः, शेषा मोक्षानुकूलाः । अज्ञानं च आवृतिश्च अज्ञानावृती । तथा च तत्त्वविचारात् प्राक् "न जानामि" इत्यनुभूयमानमज्ञानं प्रथमावस्था । ततश्च शास्त्रोक्तप्रकारमभिलंघ्य केवलं तर्केण विचार्य "न भाति, नास्ति च कूटस्थः" इत्येवंविधा मतिरावृतेस्तन्नामका-ज्ञानशक्तेः कार्यमिति तद्द्वितीयावस्था । अत एव हि प्रबन्धान्तरे अज्ञानावरण-मसदावरणं चेत्यावरणस्य द्वैविध्यमुक्तम् । "अहं शरीरी कर्ता भोक्ता च" इत्यादिविधा मतिर्विक्षेपस्याज्ञानशक्तेः कार्यमिति तत्तृतीयावस्था । एतास्तिस्रो बन्धकृतोऽनादिश्च । मोक्षकृतस्त्ववस्थाश्चतस्रः सादिश्च, साधनानुष्ठानजन्यत्वात् । तद्यथा—गुरुशास्त्राद्युपबृंहितसाधनप्रवृत्तिकाले "अस्त्यात्मा शुद्धबुद्धमुक्तस्वभावः" इत्युपदेशश्रवणजामतिः परोक्षधीशब्दवाच्या प्रथमा । ततस्तन्मननिदिध्यासना-

मौनं योगासनं योगस्तितिक्षैकान्तशीलता ।
निस्पृहत्वं समत्वं च सप्तैतान्येकदण्डिनः ॥ २०० ॥
आत्माश्रयोऽनवस्था च व्याहतिश्चक्रकाश्रयः ।
अन्योन्याश्रयको दोषाश्चैतेऽनिष्टप्रसञ्जनात् ॥ २०१ ॥
प्रमाणबाधितार्थोऽपि गौरवाख्यस्तथाऽपरः ।
आहुर्दोषद्वयं केचिल्लक्षणं कथ्यतेऽधुना ॥ २०२ ॥
स्वापेक्षापादकत्वेन मूलक्षतिकरत्वतः ।
स्वोक्तिभङ्गतया सापेक्षणीयापेक्ष्यपेक्षिणा ॥ २०३ ॥
प्रसञ्जनमनिष्टस्य पञ्चानां लक्षणं क्रमात् ।
शेषोक्तयोर्द्वयोर्लक्ष्म स्फुटं तस्मान्न कथ्यते ॥ २०४ ॥

नन्तरं या स्वरूपसाक्षात्कारानुकूला चित्तवृत्तिरुदेति सैवापरोक्षधीशब्दवाच्या द्वितीया । ततश्च सर्वदुःखप्रहाणं निरुपचरितसुखाभिव्यक्तिश्चेति तृतीया चतुर्थी चेत्यवस्थासप्तकविवृतिः ॥ १९८–१९९ ॥

संन्यासिनां सप्तगुणानाह—मौनमिति । सुगममेतत् ॥ २०० ॥

तर्कापरनामधेयान् सप्त दोषान् कथयति—आत्मेत्यादि श्लोकद्वयेन । एते आत्माश्रयादयः पञ्च तथा परमतोक्तौ द्वौ । अनिष्टप्रसञ्जनात् अभिमतसिद्धिविघ्नकरणात् दोषा दोषशब्दवाच्याः । चकारात् तर्कशब्दवाच्या अपि तेषामूहरूपित्वात् ॥ २०१–२०२ ॥

उक्तानां लक्षणमावेदयति—स्वेत्यादिना । अपेक्षिणेत्यत्र अपेक्षितत्वेनेति वक्तव्यम् । ततश्च स्वापेक्षापादकत्वेनानिष्टप्रसङ्गत्वमात्माश्रयस्य, मूलनाशकरत्वेनानिष्टप्रसङ्गत्वमनवस्थायाः, स्वोक्तिभङ्गकरत्वेनानिष्टप्रसङ्गत्वं व्याहतेः, स्वापेक्षणीयापेक्षितसापेक्षितत्वेनानिष्टप्रसङ्गत्वमन्योन्याश्रयस्य लक्षणं सम्पद्यते । व्याघात इति व्याहतेस्तथा परस्पराश्रय इतरेतराश्रयश्चेत्यन्योन्याश्रयस्य पर्याया भवन्ति । अपेक्षा च सर्वत्र ज्ञप्तावुत्पत्तौ स्थितौ चेति द्रष्टव्या । सर्वेऽपि ते ज्ञप्त्युत्पत्तिस्थितिप्रतिबन्धका इति तत्र तत्र विभाव्यम् । अत एव हि ज्ञप्तिपक्षे पण्डितानां "स्वग्रहसापेक्षग्रहकत्वमात्माश्रयत्वम्" "स्वग्रहसापेक्षग्रहकत्वमन्योन्याश्रयत्वम्" "स्वग्रहसापेक्षग्रहसापेक्षग्रहसापेक्षकग्रहकत्वम् चक्रकत्वम्" "अप्रामाणिकानन्तप्रवाहमूलकानिष्टप्रसङ्गत्वं अनवस्थात्वम्" "आत्माश्रयाद्यन्यतमान्यनिबन्धनानिष्टप्रसङ्गत्वं प्रमाणबाधितार्थत्वम्" इत्यादिविधं लक्षणमनवद्यमेव । उत्पत्त्यादिपक्षे तु "स्वोत्पत्तिसापेक्षोत्पत्तिकत्वमात्माश्रयत्वम्" एवमाद्यं लक्षणाकारं रचयितव्यम् ।

प्रत्यक्तत्त्वविवेकीयश्लोके तेषां निदर्शनम् ।
आत्माश्रयादिपञ्चानामस्ति सोऽत्र प्रदर्श्यते ॥ २०५ ॥
विकल्पो निर्विकल्पस्य सविकल्पस्य वा भवेत् ।
आद्ये व्याहतिरन्यत्राऽनवस्थाचक्रकादयः ॥ २०६ ॥

अनवस्थालक्षणे यदप्रमाणिकेति विशेषणमर्पितं तत् "प्रामाणिकी अनवस्था न दोषाय" इति प्रदर्शनार्थम् । बीजाङ्कुरादौ कारणकार्ययोरनन्तप्रवाहकल्पनापातेऽपि न तत्र दोषमुद्घोषयन्ति विद्वांसः, प्रामाणिकत्वात् । शेषोक्तयोः प्रमाणबाधितार्थगौरवयोः ॥ २०३--२०४ ॥

सुखबोधार्थमुदाहरणं स्थलं वा निर्दिशति—प्रत्यगिति । प्रत्यक्तत्त्वविवेको नाम पञ्चदश्याख्यवेदान्तप्रकरणस्य प्रथमं प्रकरणम् । तस्य पञ्चाशच्छ्लोके आत्माश्रयादीनां पञ्चानामेव निदर्शनं उदाहरणमस्ति । स श्लोकः अत्र प्रदर्श्यते उल्लिख्यते ॥ २०५ ॥

तं श्लोकं कथयति—विकल्पेति । सिद्धान्तिना "तत्त्वमस्यादिवाक्येन परं ब्रह्मैव लक्ष्यते" इत्युक्ते कश्चित् वादी तत्र विकल्पयन् दोषमर्पयत्यनेन श्लोकेन । "सविकल्पस्य लक्ष्यत्वे लक्ष्यस्य स्यादवस्तुता । निर्विकल्पस्य लक्ष्यत्वं न दृष्टं न च सम्भवि ।" अस्यार्थः—भवता महावाक्येन तत्त्वमस्यादिवाक्येन ब्रह्म लक्ष्यत इति यदुक्तं, तत्रैवं पृच्छ्यते—त्वयोक्तं महावाक्यलक्ष्यं ब्रह्म किं सविकल्पकं उत निर्विकल्पकम् । यदि सविकल्पकं तर्हि तस्य अवस्तुता मिथ्यात्वं स्यात् वाक्यबोध्यत्वात् । भवन्मते हि सत्यं ब्रह्म वाचामगोचरमेव । यदि निर्विकल्पकं तर्हि दृष्टविरोधोऽसम्भवश्च । यतो निर्विकल्पकस्य नामजात्यादिरहितस्य लक्ष्यत्वं न दृष्टं न कुत्रापि दृष्टं, न च सम्भवि उपपद्यमानमपि न भवति । लक्ष्यत्वधर्मवतो निर्विकल्पकत्वव्याघातादिति भावः । अत्र सिद्धान्ती तद्वाक्यस्य असदुत्तरत्वं मत्वा तदुक्तिमपि विकल्प्य दूषयति—**विकल्पो निर्विकल्पस्य** इत्यादिना । अस्यार्थः—हे वादिन्, त्वयापि "विकल्पो निर्विकल्पस्य सविकल्पस्य वा भवेत्" इति कृत्वा यो विकल्पः कृतः, स विकल्पः किं निर्विकल्पस्य कृतः उत सविकल्पस्य । निर्विकल्पस्य चेत् तर्हि तत्रापि पक्षे व्याघाताख्यो दोषः । निर्विकल्पस्य सविकल्पत्वं प्राग्वत् व्याहतमेव । यदि सविकल्पस्य, तर्हि अनवस्थादयश्चत्वारोऽपि दोषास्त्वत्पक्षे दुर्निवारा एव । तथा हि—"सविकल्पस्य विकल्पः" इत्यत्र विकल्पेन सह वर्तमानो यः स सविकल्प इति तृतीयान्तविकल्पपदेन

"विकल्प:" इति प्रथमान्तविकल्पपदेन च एक एव विकल्पोऽभिधीयते उत "यावन्तः शब्दास्तावन्तोऽर्थाः" इति कृत्वा द्वौ विकल्पौ । यद्येक एव विकल्पः प्रथमान्तरूपेण तृतीयान्तरूपेणाभिधीयते, तर्हि स्वयमेक एव विकल्पो विकल्पाश्रयब्रह्मविशेषणतया आश्रयस्तदाश्रितश्चेति भवत्येवात्माश्रयता । अयमभिप्रायः, दण्डी गच्छतीत्यादौ विशिष्टे वर्तमानधर्मो विशेषणेऽप्यनुवर्तमानो दृष्टः । तत्र हि दण्डिनिष्ठपूर्वदेशत्यागोत्तरोत्तरदेशप्राप्त्यात्मकगमनरूपो धर्मो विशेषणभूते दण्डेऽप्यनुवर्तते, दण्डस्यापि दण्डिदेशे दर्शनात् । तत्र यथा दण्डी विशेष्यो दण्डो विशेषणं तथा अत्रापि सविकल्पब्रह्म विशेष्यं, तृतीयान्तविकल्पो विशेषणम् । तत्र यथा दण्डविशिष्टे दण्डिनि गमनरूपो धर्मस्तथात्र तृतीयान्तनिर्दिष्टविकल्पविशिष्टसविकल्पके ब्रह्मणि प्रथमान्तनिर्दिष्टविकल्परूपो धर्मः । तत्र यथा गमनधर्माश्रयो दण्डी तथा दण्डोऽपि, तथात्र प्रथमान्तविशिष्टविकल्परूपधर्मस्याश्रयो ब्रह्म तथा तृतीयान्तनिर्दिष्टविकल्पोऽपि । तथा च विकल्पो विकल्पाश्रय इत्यात्माश्रयता । किञ्च विकल्प इत्येतत्सिद्धिं प्रति विकल्पस्यैवापेक्षणात् भवत्येवात्माश्रयाख्यो दोषः ।

अथोच्येत प्रथमान्तेन तृतीयान्तेन च द्वौ विकल्पावभिधीयेते, तदा तृतीयान्तपदनिर्दिष्टविकल्पस्य विकल्पत्वाविशेषात् तदाश्रयस्य च निर्विकल्पकत्वायोगात् सविकल्पकस्तदाश्रय इत्यङ्गीकर्तव्यमेव । ततश्च तस्य सविकल्पकत्वसिद्ध्यर्थं कश्चित् तृतीयो विकल्पः कल्पनीयो भवति । तत्रैवं पृच्छा जायते—कल्पनीयः स विकल्पः किं प्रथमान्तनिर्दिष्टविकल्पादभिन्न उत ताभ्यामन्यः । आद्ये अन्योन्याश्रयता एव । अपेक्षते हि प्रथमान्तः स्वसिद्धौ तृतीयान्तं तथा तृतीयान्तोऽपि प्रथमान्तमिति ।

अन्य इति पक्षेऽपि स किं प्रथमान्तनिर्दिष्टादभिन्नः उत तेभ्योऽन्यः इति प्रश्नः समुपजायते । तत्राप्याद्ये चक्रकाश्रयः । तथा हि—अभिन्नत्वात् पूर्ववत् तृतीयविकल्पाश्रयस्य सविकल्पकत्वसिद्ध्यर्थं अन्यश्चतुर्थो विकल्पः कल्पनीयो भवति । पूर्ववत् तत्रापि प्रश्नो भवति स किं प्रथमान्तरूपादभिन्नः इति, उत तेभ्यो भिन्नः इति । अभिन्नपक्षे प्रथमान्तरूपस्तृतीयान्तं तृतीयान्तरूपोऽपि धर्मिविशेषणीभूततृतीयविकल्पं सोऽपि पुनश्चतुर्थविकल्पमपेक्षत एव । अयं चतुर्थो विकल्पः प्रथमान्तनिर्दिष्टविकल्पादभिन्न इत्यङ्गीकरणात् पुनस्तथैव प्रश्नः समुपजायते न पृच्छाविरामो भवतीति चक्रवत् भ्रमणमात्रफलकचक्रकाख्यो दोषो भवत्येव ।

८ भूमिस्त्वापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीत्थं स्याद्भिन्ना प्रकृतिरष्टधा ॥ २०७ ॥
यमश्च नियमस्तद्वदासनं प्राणसंयमः ।
प्रत्याहारो धारणा च ध्यानं चैव समाधिना ॥ २०८ ॥
इत्थमङ्गानि योगस्य प्राहुरष्टौ विपश्चितः ।
निर्विकल्पसमाध्याख्यो योगोऽङ्गीति कचिन्मते ॥ २०९ ॥

भिन्नपक्षेऽपि तदाश्रयस्य सविकल्पकत्वसिद्ध्यर्थं पुनरन्यो विकल्पः कल्पनीयो भवति, तथा तस्याप्यन्यस्तस्याप्यन्य इत्यनन्तविकल्पकल्पनापाते मूललाभाभावात् अनवस्थाख्यो दोष एव भवेत् । एवमन्यत्राप्यूह्यमिति ॥ २०६ ॥

भूमीति । तु शब्दोऽथशब्दसमानार्थकः । अष्टगणीसंज्ञासङ्ग्रथनारम्भसूचक इति यावत् । भूमिर्गन्धतन्मात्रलक्षणा कारणात्मिका सूक्ष्मा न तु स्थूला कार्यात्मिका । आपोऽपि रसतन्मात्राः । अनलो रूपतन्मात्रः । वायुः स्पर्शतन्मात्रः । खं आकाशं शब्दतन्मात्रम् । मन इति सङ्कल्पविकल्पयोरहङ्कारप्रधानत्वात् तदात्मकेन मनसा तत्कारणमहङ्कारो गृह्यते । बुद्धिशब्देनाहङ्कारकारणं महत्तत्त्वम् । अहङ्कारशब्देन च तद्वासनाविशिष्टमविद्यात्मकमव्यक्तमुच्यते । बीजे शाखापर्णपुष्पादिवासनावस्थानवत् अव्यक्ते सर्वकारणे महदादिसर्वविकारवासनासम्भवात् । इत्थमनेन प्रकारेण प्रकृतिः अष्टधा भिन्ना अष्टभेदवती । श्लोकश्चैषः भगवद्गीतायाः समाकृष्यात्र अक्षरव्यत्ययं कृत्वा संयोजितः । तत्र च मे इति भगवदुक्तिरस्ति । तत्र तदभिप्रायस्त्वित्थं—मम निर्गुणस्याप्येतद्द्वारा गुणित्वे सृष्ट्यादिकारणत्वे च हेतुरुपाधिः । सैषैव हि माया यत्कार्यमेतन्मरुमरीचिकाकल्पं जगज्जालमिति ॥ २०७ ॥

अष्टावङ्गानि योगस्येति प्रसिद्धिरस्ति तान्याह—यमश्चेति । योगस्य निर्विकल्पसमाधेरिति केचित् । तेषां मते अष्टाङ्गघटकसमाधिशब्देन सविकल्पकाख्यः सम्प्रज्ञातसमाधिरुच्यते । सम्प्रज्ञातसमाधेरेवोक्तान्यङ्गानीत्यन्ये । तेषां तु मते अङ्गघटकसमाधिः सम्प्रज्ञाताद्भिन्न इत्यङ्गीकरणीयम् । अङ्गाङ्गिनोर्भेदस्यावश्यकत्वात् । तथा च विच्छिद्य विच्छिद्य प्रत्ययावृत्तिर्ध्यानं, सावधानेन अविच्छिद्य प्रत्ययावृत्तिरङ्गघटकसम्प्रज्ञाताख्यसाधनरूपसमाधिः, तथा निर्वाणेन अविच्छिद्याविच्छिद्य प्रत्ययावृत्तिरङ्गिस्वरूपसम्प्रज्ञाताख्यसाध्यरूपः समाधिरिति भेदः । त्रयाणां विषयैक्येऽपि चित्तपरिपाकतारतम्येनाङ्गीकरणीयो भेदः । अन्यदुक्तप्रायम् ॥ २०८–२०९ ॥

घृणा शङ्का भयं लज्जा जुगुप्सा चेति पञ्चमी।
कुलं शीलं च वित्तं च ह्यष्टौ पाशाः प्रकीर्तिताः॥ २१०॥
अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा।
ईशित्वं च वशित्वं च यत्र कामावसायिता॥ २११॥
ऐश्वर्याष्टकमित्युक्तं तथा सिद्ध्यष्टकं क्वचित्।
ऐश्वर्यं बुद्धितत्त्वस्य धर्म इत्यूचिरे बुधैः॥ २१२॥
पृथिवी सलिलं तद्वत्पावकः शशिवायुकौ।
अम्बरं रविरात्मेति नाम्ना स्युर्मदमूर्तयः॥ २१३॥

घृणेति। बन्धहेतुत्वात् पाशा इव पाशाः॥ २१०॥

अष्टैश्वर्यमाह—अणिमेति। ऐश्वर्यवत् सिद्धिशब्दोऽपि प्रयुज्यते। तत्र महानपि भवत्यणुरिति अणिमासिद्धेः फलम्। तथा महानपि लघुर्भूत्वा ईषिकातूल इव आकाशे विहरतीति लघिमासिद्धेः फलम्। अल्पोऽपि नागनगगगनपरिमाणो भवतीति महिमासिद्धेः फलम्। प्राप्तिरिति सर्वभावसन्निहितत्वम्। तत्फलं यथा भूमिष्ठोऽपि योगी चन्द्रमसमङ्गुल्यग्रेण स्पृशतीति। प्राकाम्यमिच्छानभिघातः। प्राकाम्यसिद्धिमतो योगिनो भूतस्वरूपादिभिरिच्छा न विहन्यते, ततश्च भूमावुन्मज्जति निमज्जति च गभीरोदके। वशित्वं नाम भूतेषु पृथिव्यादिषु भौतिकेषु च गोघटादिषु स्वतन्त्रत्वम्। तथा च तत्सिद्धिं गतेन योगिना यानि यथा व्यवस्थाप्यन्ते तानि तथैवावतिष्ठन्त इति वशित्वसिद्धेः फलम्। ईशित्वं नाम नियन्तृत्वम्। ईशित्वसिद्धो योगी भूतानां भौतिकानां च उत्पत्तिं विनाशं व्यूहनं च कर्तुं शक्नोतीत्यर्थः। यत्र कामावसायित्वं नाम सत्यसंकल्पता तया च यत् यदर्थतया संकल्पयति योगी तत्तस्मै तत्प्रयोजनाय कल्पते। यथा विषमप्यमृतकार्ये संकल्प्य भोजयन् मृतं जीवयतीति। एतत् सर्वं बुद्धिधर्म इत्युक्तं बुधैः सांख्याचार्यैरित्यर्थः॥ २११–२१२॥

पृथिवीति। कुलधनरूपयौवनराज्यतपआदिकृतगर्वविशेषो मदशब्देनोच्यते। स चावस्थाविशेषेण पृथिवीत्यादिनाम्ना प्रसिद्धः। पृथिवीमदः सलिलमदः पावकमदः पवनमद आकाशमदो रविमद आत्ममदश्चेत्यष्टमूर्तिमदो वेदान्तिभिस्तत्र तत्र वर्ण्यमानो दृश्यते। तत्कार्यमप्येवमाभाष्यते—पृथिवीमदाविर्भावे तद्गुणभरितो वस्त्रादीच्छावान् भवति जीवः। सलिलमदाविर्भावे संसारभरितः ममेदमावश्यकमिति चिन्तायुक्तो भवति। पावकमदाविर्भावे कामरसभरितः

९ अथ संसारचक्रस्य वक्ष्ये रूपं समासतः ।
ज्ञाता ज्ञानं तथा ज्ञेयं कर्ता च करणं तथा ॥ २१४ ॥
क्रियेति नवधा रूपं संसारस्य सदाऽसतः ।
भूतं ज्ञानेन्द्रियं तद्वत्कर्मेन्द्रियमथाऽपरम् ॥ २१५ ॥
प्राणादिपञ्चकं चैव मनआदिचतुष्टयम् ।
शरीरं कर्मणस्त्रित्वमवस्थात्रयमेव च ॥ २१६ ॥
एतेषां कारणीभूतमज्ञानं चेति केचन ।
आहुः संसारचक्रस्य बभ्रमुर्यत्र जीवकाः ॥ २१७ ॥

---

१० अथेडा पिङ्गला चैव सुषुम्ना च तथाऽपरा ।
गान्धारी हस्तिजिह्वा च पूषा चैव पयस्विनी ॥ २१८ ॥
लकुहाऽलम्बुषा चैव शङ्खिनी दश नाडिकाः ।
एताः समुपयुज्यन्ते योगकाले विशेषतः ॥ २१९ ॥

---

११ अथ वर्णाभिधः शब्दः पञ्चभूतं तथा तमः ।
एतद्धि सप्तकं ज्ञेयं बहिर्द्रव्यं सहैव तैः ॥ २२० ॥

स्त्रीसम्भोगेच्छया तदनुकूलव्यापारवान् भवति । शशिमदाविर्भावे चिन्ताभरितः करिष्यमाणकार्यं भविष्यति न वा, कृतं चेत् अन्यथा भविष्यति न वा, इत्येवं संशयात् तूष्णीं स्थितो भवति । पवनमदाविर्भावे प्रयाणभरितः परदेशेच्छावान् भवति । आकाशमदाविर्भावे वाहनभरितः गजाश्वादीच्छावान् भवति । सूर्यमदाविर्भावे पुरोधाग्निभरित इदं संहर्तव्यमितीच्छावान् भवति । आत्ममदाविर्भावे अहंकारभरितो विवादिभिर्मम समः कोऽस्ति, को वा वेत्ति इति गर्वितो भवति इति मदमूर्त्यष्टकविवृतिः ॥ २१३ ॥

नवधा संसारमाह—अथ संसारेति । सदा असतः कालत्रयेऽपि स्वाधीनसत्तारहितस्येति यावत् । अन्यत्सुबोधम् । २१४–२१५–२१६–२१७ ॥

दशनाडिका आह—अथेति । इडा चन्द्रनाडी । पिङ्गला सूर्यनाडी । सुषुम्ना मध्यनाडी । गान्धारी दक्षिणनेत्रिका । हस्तिजिह्वा वामनेत्रिका । पूषा दक्षिणकर्णिका । पयस्विनी वामनासिकागता । लकुहा गुदनाडी । अलम्बुषा मेढ्रनाडी । शंखिनी नाभीनाडीति विवेकः ॥ २१८–२१९ ॥

अथेति । दशगणीसंज्ञाकथनानन्तरमेकादशगणीं कथयतीत्यर्थः । शब्दो हि द्विविधः, ध्वन्यात्मको वर्णात्मकश्च । तत्र वर्णात्मकः शब्दो द्रव्यम् । स च

सत्त्वं रजस्तमश्चान्तःकरणं चेति संख्यया ।
एकादशविधं द्रव्यं द्वयोर्मीमांसयोर्मतम् ॥ २२१ ॥

---

१५ अथ भूतगुणानाहुः संक्षेपाद्दश पञ्च च ।
श्लोकेन ग्रथितांस्तांश्च वक्ष्याम्यत्र यथायथम् ॥ २२२ ॥
शब्दस्पर्शौ रूपरसौ गन्धश्चेति यथाक्रमम् ।
पञ्च क्षितिगुणाः प्रोक्ता गन्धस्तत्र निजो मतः ॥ २२३ ॥

नित्यो विभुर्निरवयवः कण्ठताल्वाद्यभिघातजध्वनिव्यङ्ग्यश्च । तम इत्यन्धकारापरपर्यायमविद्याप्रभवमविद्यावत् भावरूपं चाक्षुषज्ञानप्रतिबन्ध्यालोकनाश्यं च । भाट्टा अप्येतस्य द्रव्यत्वमङ्गीकुर्वन्ति, तद्यथा—"तमस्तमालमालाभं चलतीति निगद्यते । रूपवत्त्वात् क्रियावत्त्वात् द्रव्यं तु दशमं तमः" ॥ इति । शब्दतमसोर्द्रव्यत्वप्रतिपादनप्रकारस्तु विस्तृतिभिया नात्र संगृहीतः । ततश्च शब्दस्तमः क्षितिर्जलं तेजो वायुराकाशश्चेति सप्तकं बहिर्द्रव्यं, तैः सह सत्त्वं रजस्तमश्चेति गुणत्रयं तथा अन्तः करणमित्येकादशविधं द्रव्यमिति द्वयोः पूर्वोत्तरयोर्मीमांसयोर्मतम् । ततश्च द्रव्यत्वेनाभिमते सत्त्वादौ यो गुणशब्दप्रयोगः स औपचारिकः । गुणो रज्जुः, स यथा पशुबन्धनहेतुस्तथा सत्त्वादयोऽपि जीवपशुबन्धनहेतव इति सत्त्वादयो गुणा इव गुणाः । अन्तःकरणमित्यनेनान्तःकरणस्य ज्ञानशक्तिप्रधानोंऽशो ग्राह्यो यस्यापरं नाम बुद्धिस्तथा मन इति । अन्तःकरणं तावदेतन्मते ज्ञानक्रियाशक्त्यात्मकमेकं स्वच्छं द्रव्यं चित्सांनिध्यात् चिद्रूपमिव, तथा प्रतिशरीरवर्ति, तस्य च ज्ञानशक्तिप्रधानोंऽशः कार्यभेदात् बुद्धिशब्देन तथा मनःशब्देन चोच्यते, क्रियाशक्तिप्रधानांशस्तु प्राणशब्देन । अत एव प्राणशब्देनोच्यमानं क्रियाशक्तिप्रधानांशं विहाय बुद्धिमनःशब्दाभिहिते ज्ञानशक्तिप्रधानांश एव द्रव्यपरिभाषाप्रवृत्तिरिति सुधीभिर्विभावनीयम् । अत एव हि तन्त्रान्तरे यन्मनसो देहिनश्च द्रव्यत्वमभिहितं तन्नैतन्मतविरुद्धम् । देही जीवः । यतोऽन्तःकरणमेव चित्प्रतिबिम्बवशाज्जीवः, अतोऽन्तःकरणस्य द्रव्यत्वाभिधानेन जीवस्यापि द्रव्यत्वाभिधानं सेत्स्यत्येव । अप्रामाणिकत्वादाकाशस्यैव दिग्व्यवहारत्वसम्भवाच्च द्रव्यसंख्यागणनायां दिशां तथा कालोऽप्यविद्यैव तस्या एव सर्वाधारत्वादिति कालस्याप्यत्राग्रहणमिति द्रष्टव्यम् ॥ २२०–२२१ ॥

एवं द्रव्यभेदानभिधाय गुणान् कथयितुमाह—अथेति । सुगममेतत्पद्यम् २२२

तान् विभज्य कथयति—शब्देत्यादिना पद्यचतुष्टयेन । यथाक्रमं क्रममनतिक्रम्य । कार्ये कारणगुणानुप्रवेशस्य यः क्रमस्तदनुसारेणेत्यर्थः । तथा च

शब्दः स्पर्शस्तथा रूपं रसश्चापां गुणाः स्मृताः।
रसो नैजो गुणस्तासामन्ये स्युः कारणागताः॥ २२४॥
शब्दः स्पर्शस्तथा रूपं वह्नेस्तस्यान्तिमं स्वकम्।
शब्दस्पर्शगुणो वायुः स्पर्शस्तस्य विशेषकम्॥ २२५॥
आकाशस्य गुणः शब्दो ध्वन्यात्मा स प्रकीर्त्यते।

---

३५ अध्यात्मभावे भूतानां गुणाः स्युः पञ्चसप्ततिः॥ २२६॥
अस्थि मांसं त्वचा नाडी रोम चैव तु पञ्चमम्।
पञ्च क्षितिगुणाः प्रोक्तास्तथैवांशाः प्रकीर्तिताः॥ २२७॥
श्लेष्मा मूत्रं तथा स्वेदः शुक्रं शोणितमेव च।
अपां पञ्चगुणाः प्रोक्तास्तथैवांशाः प्रकीर्तिताः॥ २२८॥
क्षुधा तृष्णा तथा निद्रा ह्यालस्यं सङ्ग एव च।
अग्नेः पञ्च गुणाः प्रोक्तास्तथैवांशाः प्रकीर्तिताः॥ २२९॥
धावनं चलनं चैव कुञ्चनं च प्रसारणम्।
वियोगश्चेति विज्ञेयं वायोः पञ्च गुणा इति॥ २३०॥

शब्दस्पर्शरूपरसगन्धाः। क्षितेः पृथिवीभूतस्य गुणाः पञ्च। तत्र तेषां मध्ये गन्धो निजः स्वकीयोऽसाधारणो गुणः अनेनैवासाधारणगुणेन परैरपि "गन्धवती पृथिवी" इति पृथिव्या लक्षणं क्रियते। शब्दादयस्तु कारणानुक्रान्तत्वात् साधारणा न त्वसाधारणाः॥ २२३॥

शब्द इति। कारणागताः कारणेभ्यः आकाशादिभ्यः आगताः प्राप्ताः॥२२४॥

शब्द स्पर्श इति। अन्तिमं रूपम्। विशेषकृत् अन्यव्यावर्तकः। असाधारणो धर्म इति यावत्॥ २२५॥

आकाशस्येति। ध्वन्यात्मा ध्वन्याख्यः शब्दः। तु पुनः। अध्यात्मे आत्मानं देहमधिकृत्य प्रवर्तत इत्यध्यात्मं तद्भावे देहाकारपरिणताविति यावत्। तेषां भूतानां गुणाः पञ्चसप्ततिः॥ २२६॥

तान् कथयति—अस्थीति। अस्थ्यादयः पञ्च क्षितेः पृथिव्याः गुणाः। अस्थ्यादयो हि भुक्तान्नस्य पार्थिवांशेनोपजायन्ते चीयन्ते च। अतस्ते पृथिवीभूतस्यैव गुणा धर्माः। अंशा भागाः। तथा च क्षितौ आकाशादीनां ये भागाः सन्ति पञ्चीकृतत्वात् तेऽपि भागाः तथैव स्वैः स्वैः गुणैः भागानुरूपैरेव क्षितौ विद्यन्त इति प्रकीर्तिताः शास्त्रकृद्भिरभिहिताः। एवमपां तेजसो व्योम्नश्च। अत्रेदं

रागद्वेषौ भयं लज्जा मोहश्च नभसस्तथा।
इति पञ्च गुणाः प्रोक्तास्तथैवांशाः प्रकीर्तिताः ॥ २३१ ॥
एवं बहुविधाः संज्ञाः सन्ति शास्त्रस्य गोचरे।
तासां मध्ये प्रसिद्धा यास्ता एवात्र प्रपञ्चिताः ॥ २३२ ॥
अथाधिष्ठानमात्रत्वे ह्यारोप्यस्यावशेषणम्।
अपवादो यथारोप्यफणिनो रज्जुमात्रता ॥ २३३ ॥
तथा वस्तुविवर्तस्य विज्ञेया वस्तुमात्रता।
विपरीतक्रमेणास्य क्रम उक्तो मनीषिभिः ॥ २३४ ॥

बोद्धव्यं—एकैकस्य शब्दगुणादेः श्लोकोक्तपञ्चविशेषगुणत्वकथनात् शब्दादिपञ्चगुणसम्बन्धिन्यां पृथिव्यां पञ्चविंशतिर्गुणाः, अग्नेः पञ्चदशगुणाः, वायोर्दशगुणाः, आकाशस्य पञ्चगुणाः, इत्याहृत्य पञ्चसप्ततिर्गुणा इति ॥ २२७–२२८–२२९–२३०–२३१ ॥

इत्थमध्यारोपनिबन्धनाः शास्त्रकृत्परिभाषिताः प्रसिद्धाः संज्ञाः संक्षेपेण संकलय्य प्राक्प्रतिज्ञातस्यापवादस्य लक्षणं तद्विज्ञानफलं च वक्तुकामः पातनिकां करोति—एवमिति। गोचरे विषये ॥ २३२ ॥

तत्रादावपवादस्य लक्षणं कथयति—अथेति। अत्राथ शब्दोऽध्यारोपव्युत्पादनानन्तरमित्यर्थे प्रयुक्तः। आरोप्यस्य अधिष्ठानमात्रत्वे पर्यवशेषणमपवाद इति कारिकोक्तमपवादलक्षणम्। आचार्यास्तु कार्यस्य कारणमात्रसत्तावशेषणं कारणस्वरूपव्यतिरेकेण कार्यस्यासत्तावधारणं वेति विशदमेव लक्षणं वदन्ति। कारणं च सर्वत्रोपादानरूपमेव ग्राह्यं, तदेव दृष्टान्तप्रदर्शनेन स्फोरयति—यथेति। फणिनः सर्पस्य। दृष्टान्तोक्तमर्थं दार्ष्टान्तिके योजयति—तथेति। वस्तुविवर्तस्य प्रपञ्चस्य वस्तुमात्रता वस्तुसत्तातिरिक्तसत्ताकत्वाभावावधारणमित्यर्थः। वस्तु ब्रह्मैव न त्वन्यत्। ततश्च "सर्वं खल्विदं ब्रह्म" इत्यादिमहावाक्यतात्पर्यं श्रवणेन ज्ञात्वा मननेन च दृढीकृत्य सर्वस्यास्य प्रपञ्चस्य ब्रह्ममात्रतामवधारयेत्, ततश्च निदिध्यासेदिति शिष्यं प्रत्युपदेशोऽर्थात् गम्यते।

सः अपवादः येन क्रमेणोपपद्यते तं क्रममाह—विपरीतेति। उत्पत्तिक्रमवैपरीत्येनेत्यर्थः। उत्पत्तिक्रमश्चोपनिषद एवात्र ग्राह्यः। औपनिषदश्चोत्पत्तिक्रमस्त्वित्थम्। यथास्य पुरतोऽवस्थितस्य काण्डशाखाप्रशाखादिभिः प्रविततस्य महतो न्यग्रोधस्य प्रागनेवंविधं बीजपदवाच्यं सूक्ष्ममेकरूपं एकद्रव्यमिव काण्डशाखादिशक्तिमदत एवाव्याकृतावस्थमासीत्, तथेदं जगदपि सृष्टेः प्राक् बीजमिवा-

व्याकृतं, अत एव नामरूपादिविभागवर्जितं नामरूपादिविभागशक्तिमदेकमेकरूपमेकद्रव्यमिवासीदिति "तद्धेदं तर्ह्यव्याकृतमासीत्" इति श्रुतिर्विज्ञापयति। स एव अव्याकृतपदार्थः क्वचिन्माया क्वचिदविद्या क्वचिदपि प्रकृतिरिति परिभाष्यते। स एव मूर्तामूर्तप्रपञ्चबीजशक्तिरूपोऽव्याकृताख्य ईश्वरोपाधिरूपः पदार्थः स्वयं जडोऽपि ऐश्वर्येण चिदाभासेनोज्ज्वलितः पूर्वकल्पीयजीवकर्मप्रयुक्तः सन् क्रमेण शब्दस्पर्शरूपरसगन्धात्मकानि आकाशवायुतेजोजलपृथिव्याख्यानि पञ्चतन्मात्रापरनामानि महाभूतानि जनयतीति "तस्माद्वा एतस्मादाकाशः सम्भूत आकाशाद्वायुर्वायोरग्निरग्नेरापः अद्भ्यः पृथिवी" इतिश्रुतिरप्यावेदयति। तान्यस्मिन् शास्त्रे अपञ्चीकृतपञ्चभूतशब्देन महाभूतशब्देन अमूर्तप्रपञ्चशब्देन च परिभाष्यन्ते। कारणैक्यात् सत्त्वरजस्तमोगुणात्मकानि तानि मिलित्वा सत्त्वांशप्राधान्येन ज्ञानक्रियाशक्तिमदेकं स्वच्छद्रव्यं चिद्रूपमिव जनयन्ति। तस्य च ज्ञानशक्तिप्रधानांशोऽन्तःकरणम्। तस्य द्विधा व्यपदेशो भवति बुद्धिस्तथा मन इति। क्रियाशक्तिप्रधानांशस्तु प्राणः, तस्य च पञ्चधा व्यपदेशो दृश्यते, प्राणोऽपानः समानो व्यानस्तथा उदानश्चेति। तथा तेभ्य एव महाभूतेभ्यः ज्ञानक्रियाशक्तिभेदात् प्रत्येकमिन्द्रियं द्वयं द्वयं जायते। तद्यथा—आकाशात् श्रोत्रवाचौ, वायोस्त्वक्पाणी, तेजसः चक्षुःपादौ, अद्भ्यो रसनापायू, पृथिव्या घ्राणोपस्थाविति। एषामधिष्ठातारोऽपि देवा ज्ञानक्रियाशक्तिप्रधानाः। तद् यथा—दिगग्नी, वाय्विन्द्रौ, आदित्यविष्णू, वरुणमैत्रौ, अश्विप्रजापती चेति। तथा प्रागुक्तशब्दादिग्राहकाणि श्रोत्रादीनि पञ्च ज्ञानेन्द्रियाणि तेभ्य एव भूतेभ्यो जायन्ते। तत्र त्वक्चक्षुषी स्वग्राह्यगुणाश्रयद्रव्यमपि गृह्णीतः। श्रोत्रमपि चक्षुर्वत् शब्दग्राहकं दूरे शब्द इति प्रतीतेः। तथा वचनादानगतिविसर्गानन्दसाधनानि वाक्पाणिपादपायूपस्थाख्यानि कर्मेन्द्रियाण्यपि तेभ्यः सञ्जातानि। एतत्सर्वममूर्तप्रपञ्चान्तर्गतम्। अयममूर्तपदार्थः कार्यत्वात् व्यष्टौ समष्टौ च जीवोपाधिरेव। तानि च अमूर्तप्रपञ्चांतर्गतमहाभूतानि भोगायतनं शरीरं भोग्यं च विषयं विना न भोगं जनयितुं शक्नुवन्तीति जीवकर्मप्रयुक्तत्वात् स्थौल्याय पञ्चीकृतानि भवन्तीति "हन्तासामेकैकां त्रिवृतं त्रिवृतं करवाणि" इति श्रुतिर्विज्ञापयति। पञ्चीकरणप्रकारस्तु उक्तः अधस्तात्। तानि च पञ्चीकृतपञ्चभूतानि मूर्तसंज्ञया व्यवह्रियमाणानि मिलित्वा इन्द्रियाणामधिष्ठानभूतमेकं कार्यं भोगायतनाख्यं तथा शरीराख्यमुत्पादयन्ति। तत्र सत्त्वप्रधानं देवशरीरं, रजःप्रधानं मानवशरीरं, तमःप्रधानं तिर्यगादिस्थावरान्तशरीरम्। ततश्च शरीरस्य पाञ्चभौतिकस्य विचित्ररूपस्येव क्वचि-

वस्तु ब्रह्मेति तत्प्रोक्तं प्रपञ्चस्तद्विवर्तकः ।
ततश्चास्य प्रपञ्चस्य बुध्यतां वस्तुमात्रता ॥ २३५ ॥

न्यूनाधिकभावो भूतानां न विरुध्यते । तथा विषया अपि पञ्चीकृतभूतजन्याश्चतुर्दशभुवनाख्या ऊर्ध्वमध्याधोभावेनावस्थिताः सत्त्वरजस्तमोंऽशप्रधाना गोघटादयश्च । एतत्सर्वं मिलित्वा ब्रह्माण्डाख्यं विराडिति मूर्तमिति चोच्यते । अयमेवौपनिषदः सृष्टिक्रमः संक्षेपतो वर्णितः ।

प्रलयक्रमस्त्वित्थं—एतद्भोगायतनं जरायुजमण्डजं स्वेदजमुद्भिज्जं चेति चरमकार्यरूपं चतुर्विधं स्थूलशरीरं तथा भोग्यान्नपानादिकं तथा चतुर्दशभुवनानि तथा तदाधारभूतं ब्रह्माण्डं इत्येतत्सर्वं तत्कारणस्थूलभूतमात्रं भवति । तानि च स्थूलभूतानि शब्दादिसहितानि तथा सूक्ष्मशरीराणि च तेषां कारणभूततन्मात्रात्मकसूक्ष्मभूतमात्रमिति । तानि च सूक्ष्मभूतानि सत्त्वादिगुणसहितानि तत्कारणभूताज्ञानोपहितब्रह्मचैतन्यमात्रमिति । तच्चाज्ञानमज्ञानोपहितचैतन्यं चेश्वरादिकं तदधिष्ठानभूतानुपहितचैतन्यमात्रमित्यपवादस्यावधिः । एतदेव "नेति नेत्यात्मा अस्थूलमनण्वन्ह्रस्वं" इत्यादि श्रुत्या सर्वं निषेधावधित्वेन तुरीयब्रह्मत्वेन चोक्तमिति । अत्रार्थे स्मृतिरपि भवति, यथा, "जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते । ज्योतिःस्वापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते । वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते । अव्यक्तं पुरुषे ब्रह्मन् निष्कले सम्प्रलीयते ॥ पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः" इति ।

अत्रापीदं बोद्धव्यम् । अव्याकृतस्यानादित्वेन जनकाभावात् न मुख्यो लयः । कार्यस्य सूक्ष्मरूपेण शक्तिरूपेण वा कारणेऽवस्थानं लय इति तल्लक्षणात् । अतः "अव्यक्तं पुरुषे ब्रह्मन्" इत्यत्र यत् लयवचनं तन्न मुख्यलयाभिप्रायं किन्तु ब्रह्मज्ञाननिबन्धनापवादप्रान्ताभिप्रायं ब्रह्मज्ञाननिबन्धनाज्ञाननिवृत्त्यभिप्रायं वा । यश्च प्रलयमहाप्रलयादिशब्दवाच्यः स एव हि अव्यक्तशब्दवाच्यः । तस्य च कारणप्रवेशात्मकप्रलयो न सम्भवति तादृशकारणाभावात्, किन्तु पुरुषतत्त्वज्ञानात् रज्जुतत्त्वज्ञानेन सर्पभ्रान्तिनिवृत्तिवत् निवृत्तिः सम्भवत्येव, तदानीं सर्वाभिमानानां निवृत्तेरवश्यंभावस्य श्रुतिसिद्धत्वात् विद्वदनुभवसिद्धत्वाच्च । एतेनैवाभिप्रायेण ऋषिणा सर्वत्र प्रलीयत इत्युक्त्वा प्रान्ते "संप्रलीयते" इत्युक्तम् । पुरुषो ब्रह्म । ततश्च ब्रह्मविवर्तस्य प्रपञ्चस्य ब्रह्मसत्तातिरिक्तसत्ताकत्वाभावावधारणमेवापवाद इत्यपवादलक्षणं साधु सङ्गच्छते । वर्णितं सृष्टिप्रलयादिकं स्वाप्नसृष्टिप्रलयादिवत्

भवति हि यदि जीवः शुद्धचेतोऽधिकारी
गुरुरपि यदि सम्यग्बोधयेत्तं तदासौ ।
यदपवदनसीम ब्रम्ह तत्प्रत्यगात्मा
इति मतिमनुयातः शोकहर्षौ जहाति ॥२३६॥

इयं संज्ञावली निष्ठामत्र प्राप्ता सुमार्जिता ।
एकावलीव बालानां कण्ठशोभां विधास्यतु ॥ २३७ ॥

॥ इति श्री वेदान्तसंज्ञावली समाप्ता ॥

अपारमार्थिकमपि वासनादार्ढ्यात् व्यवहारास्पदमिति न मायिकत्वेऽपि तुच्छताप्रसङ्ग इत्यलमतिविस्तरेण ॥ २३३–२३४–२३५ ॥

निबन्धेऽस्मिन्नादौ सप्रपञ्चमध्यारोपं वर्णितम् । ततश्चापवादस्तल्लक्षणं चाभिहितम् । अथेदानीं तद्विज्ञानफलं संक्षेपेणोक्त्वा निबन्धस्योपसंहारं करोति–**भवतीति**। जीवो यदि शुद्धचेताः काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिककर्मानुष्ठानं कृत्वा निष्कल्मषतया निर्मलान्तःकरणस्तथा अधिकारी विवेकवैराग्यशमदमादिसम्पन्नस्तथा मुमुक्षायुतो भवति, गुरुरपि यदि तं अधिकारिणं शिष्यं बोधयेत् अध्यारोपापवादमाश्रित्य ब्रह्मात्मचैतन्यस्याद्वितीयप्रत्यग्रूपत्वं उपदिशेत्, तदा तर्हि असौ अधिकारी यत् अपवदनसीम ब्रह्म अपवदनस्य प्रोक्तलक्षणस्यापवादस्य सीम चरमप्रान्तस्तत् ब्रह्म तथा तदेव प्रत्यक् प्रतिशरीरवर्ती आत्मा इति एवं प्रकारान् मतिं बुद्धिं अनुयातः प्राप्तः सन् शोकहर्षौ जहाति त्यजति, मुक्तो भवतीत्यर्थः । सर्वप्रपञ्चरहितब्रह्माहमस्मीति प्रत्यगभिन्नब्रह्मतत्त्वज्ञानेन पुण्यपापशोकहर्षाद्यतीतो भवतीति सरलार्थः ॥ २३६ ॥

इयमिति । निष्ठां समाप्तिम् । सुमार्जिता अनुशीलनेन उन्मार्जितदोषा । विधास्यतु जनयतु । प्रार्थनायां लोट् ॥ २३७ ॥

॥ इति वेदान्तसंज्ञावलीविवृतिः समाप्ता ॥

गुजराती न्युस स्थाने क्रय्य-

संस्कृतपुस्तकानि ।

वेदग्रन्थाः

	मू. रु. आ. पै.
शुक्लयजुर्वेदीयरुद्राष्टाध्यायी— ...	०—६—०
ऋग्वेदसंहिता—	३—०—०
ऐतरेयब्राह्मणं—	१—०—०
पुरुषसूक्तश्रीसूक्तलक्ष्मीसूक्तानि— ...	०—३—०
मंत्रसंहिता—(शुक्लजुर्यर्वेदी) ...	०—८—०
गणेशाथर्वशीर्षम्—सभाष्यम् ...	०—६—०

उपग्रन्थाः

आश्वलायनगृह्यसूत्रं—गार्ग्यनारायणीवृत्तिसहितं, गृह्यपरिशिष्टं, गृह्यकारिकाश्च	३—८—०
गृह्यसूत्रम्—(पारस्कराचार्यकृतम्) ...	२—०—०
पारस्करगृह्यसूत्रम्—भाष्यपञ्चकसमलंकृतम्	६—८—०
आश्वलायनगृह्यसूत्रम्—	०—४—०

कर्मकाण्डग्रन्थाः

पौराणकर्मदर्पणं पंच प्रकरणानि— ...	६—०—०
ब्रह्मकर्मसमुच्चयः—ऋग्वेदी ...	२-१२-०
,, यजुःशाखीयकर्मकाण्डप्रदीपः ...	५—०—०
ब्रह्मनित्यकर्म शुक्लयजुर्वेदी— ...	१—८—०
पूजासमुच्चयः	१—०—०
प्रयोगपारिजातः—षोडशसंस्कारकांडम्	४—०—०
प्रयोगरत्नं—(नारायणभट्टी) ...	२—०—०
संस्कारकौस्तुभः—अनंतदेवभट्टकृतः ...	२—०—०

पुराण—इतिहासग्रन्थाः

श्रीमद्भागवतमूलम्—	२—८—०

नीतिशास्त्रग्रन्थाः

चाणक्यनीतिसूत्रं—चाणक्याचार्येण विरचितं, ग्रन्थोऽयं लघुरपि नीतिसिद्धांतपूर्णो व्यवहारजिज्ञासूनामतीवोपकारकः। ...	मू.रु.आ.पै. ०–२–०
तत्त्वज्ञानवतत्प्रतीपाद्य-नीतिशास्त्रविचारः	१–८–०

स्तोत्रग्रन्थाः

दक्षिणामूर्तिस्तोत्रं—सटीकं सं. टीका...	२–०–०
गंगालहरी—(जगन्नाथकृता) सटीका	०–७–०

धर्मशास्त्रग्रन्थाः

प्रायश्चित्तमयूखः—	२–८–०
विशुद्धिमयूखः—	
शान्तिमयूखः—	
मनुस्मृतिः—मन्वर्थमुक्तावलीनामटीकोपेता	२–४–०

व्याकरणग्रन्थाः

सिद्धान्तकौमुदी—तत्त्वबोधिनीटीकासहिता	६–४ ०
अष्टाध्यायीसूत्रपाठः	०–७–०
लघुसिद्धान्तकौमुदी—... ...	०–८–०
अष्टाध्यायी—(पाठचतुष्टयं) ...	०-१२-०
अभिधावृत्तिमातृका तथा शब्दव्यापारविचारः।	०–६–०

न्यायवैशेषिकग्रन्थाः

तर्कामृतम्—तरंगिणीटीकासहितं श्रीजगदीशतर्कालंकारप्रणीतम्	०–६–०
तर्कसंग्रहः—सिद्धान्तचन्द्रोदयाख्यटीकासहितः	०-१०-०
तर्कसंग्रहः—नीलकण्ठीटीकासहितः ...	०-१२-०
तर्कसंग्रहः—न्यायबोधिन्या चन्द्रसिंहकृतपदकृत्येन च सहितः। ...	०-१०-०

पदार्टीकोपेतम् । ... ... १—०—०

कारिकावली—सिद्धान्तमुक्तावलीसहिता ०—६—०

वैशेषिकदर्शनम्—चन्द्रकान्तभट्टाचार्यकृत-
भाष्यं श्रीशंकरमिश्रकृतसूत्रोपस्कारजय-
नारायणपंचाननकृतविवृतिसहितम् । २—०—०

वेदान्तग्रन्थाः

वेदान्तसंज्ञावली— ०-१०-०

भेदरत्नं पूर्वार्धं शंकरमिश्रविरचितम्-
अद्वैतरत्नरक्षणमुत्तरार्धं मधुसूदनसर-
स्वतीविरचितं— } १—४—०

अद्वैतसिद्धिः—विट्ठलेशीयव्याख्योपबृंहि-
तगौडब्रह्मानन्दीव्याख्यासहिता । ... १०-०-०

ब्रह्मसूत्रशांकरभाष्यम्—भामती—कल्प-
तरु-परिमल-व्याख्यात्रयसहितम् । ... १०-०-०

ब्रह्मसूत्रशांकरभाष्यम्—मूलमात्रं सटिप्पनं २—४—०

भगवद्गीता—शंकरानन्दीटीकासहिता ... २—४—०

सर्वतन्त्रसिद्धान्तपदार्थलक्षणसङ्ग्रहः—
भिक्षुगौरीशंकरेण संगृहीतः । ग्रन्थे-
स्मिन्वेदवेदाङ्गदर्शनस्मृतिपुराणकाव्यसा-
म्प्रदायिकादिविविधशास्त्रप्रतिपादितपदा-
र्थानां द्वात्रिंशदुत्तरशतषष्ठाधिकद्विसहस्र-
(२६३२) लक्षणानि सन्ति, सर्वविषयो-
पकारकः सुखप्रवेशसाधनभूतश्च लाक्षणि-
कनिबन्धोऽद्यावधि केनापि न विहितः । १—०—०

सिद्धान्ततत्त्वबिन्दुः-श्रीमधुसूदनविरचितः ०—४—०

उपदेशसाहस्री—पदयोजनासहिता ... १—८—०

अद्वैतसिद्धान्तमाला—रत्नं प्रथमम् ... ०—८—०

वेदान्ताधिकरणमाला—श्रीमत्पुरुषोत्तम-

दीपिका पूर्णानंदेन्दुकौमुदीतिटीकाद्वयोपेता ५-०-०

भगवद्गीता—(चिद्घनानन्दकृतटीकासहिता) ८-०-०

भगवद्गीता—(मधुसूदनी) ... २-८-०

ब्रह्मसूत्रवृत्तिः-अद्वैतमञ्जरीटीकोपेता ... ०-१२-०

वेदान्तचिन्तामणिः— १-४-०

रत्नपञ्चकं—श्रीमच्छंकराचार्यकृतम् ... ०-३-०

अवधूतगीता—(सादा पुट्ठा) ... ०-२-६

„ (रेशमी „) ... ०-५-०

गणेशगीता—(सादी) ... ०-२-६

„ (रेशमी) ... ०-५-०

पाण्डवगीता— ०-१-०

उत्तरगीता— ०-६-०

रामगीता माहात्म्यं च— ... ०-१-६

नारदगीता— ०-१-६

शिवगीता—(सादी) ०-८-०

„ (रेशमी) ०-१०-०

श्रीमद्भगवद्गीता—(सप्तटीकोपेता)... ७-०-०

श्रीमद्भगवद्गीता-(अन्याष्टटीकोपेता)... १०-०-०

+ वेदान्तसिद्धान्तसारः ... ...

+ अद्वैतसिद्धान्तसारः ... ...

+ आत्मतत्त्वविवेकः ... ...

+ मध्वमुखमर्दनं-(सटीक) ...

+ विवेकसिन्धुः ... ...

+ देवीगीता—सादी ... ...

„ रेशमी

+ भगवद्गीता—(शाङ्करभाष्यआनंदगिरिपरमार्थप्रपाटीकोपेता च ।

भगवद्गीता—(श्रीधरस्वामीकृतटीकासह)	१—४—०
ईशोपनिषद्भाष्यसमूहोपेता— ...	२—०—०
अष्टाविंशत्युपनिषदः—	१—४—०
श्रीमद्भगवद्गीता (भाषाटीका—हिन्दी)	०—७—०
तैत्तिरीयोपनिषद्भाष्यम्—श्रीजयगोपालभट्टकृतम्, गुर्जरानुवादयुतम् ...	१—०—०
तैत्तिरीयोपनिषत्—श्रीशंकराचार्यकृतभाष्यं आनंदगिरिकृतटीकोपेतम् । ...	१—०—०
भावप्रकाशिका । ब्रह्मसूत्रवृत्तिः—प्रथमोऽध्यायः । श्रीकृष्णचन्द्रकृता । ...	१—०—०
भावप्रकाशिका—द्वितीयोऽध्यायः । ...	०—८—०

ज्योतिषग्रन्थाः

ज्योतिर्विदाभरणं—सटीकं संस्कृतं. ...	२—८—०
मुहूर्तदीपकः—सटीकः गुर्जरभाषाटीकायुतः	०—५—०
मुहूर्तमार्तण्डः—संस्कृत (गुजराती टीकासहित)...	३—०—०
लघुसाधनग्रहरसायनं—गुर्जरानुवादयुतम् ।	१—०—०

साहित्यशास्त्रग्रन्थाः

दशरूपकम्—धनञ्जयकृतटीकोपेतं सुदर्शनाचार्यकृतप्रभाख्यटीकोपेतम् । ...	१—०—०
काव्यानुशासनं—हेमचन्द्रकृतवृत्तिसहितम्	१—४—०
वृत्तिवार्तिकम्—	०—३—०

काव्यग्रन्थाः

कुमारसम्भवकाव्यम्—(मल्लिनाथ—सीताराम-चारित्र्यवर्धनकृतटीकासह) ...	१—८—०
मेघदूतकाव्यम्—(संजीवनीटीकासह)	०—८—०
किरातार्जुनीयम्—(घंटापथटीकासह)	२—०—०
नैषधीयचरितं—(नारायणीटीकासह)	६—०—०

अमरुशतकं–(रसिकसंजीविनीव्याख्यासह) ०-१०-०
ऋतुसंहारकाव्यं—सटीकम् ... ०–६–०
गीतगोविन्दकाव्यं–(रसिकप्रियारसमंजरीटीकाभ्यां सहितं) १–२–०
भट्टिकाव्यं—(जयमङ्गलाटीकासह) ... ३–०–०
नीतिशतकं—(भर्तृहरिकृतं, सटीकं) ०–६–०
शृङ्गारशतकं— ०–६–०
वैराग्यशतकं— ०–६–०
रघुवंशः–आदितः पंच सर्गाः मल्लिनाथीटीकासहितः। ०–६–०
रघुवंशः–मल्लिनाथीटीकासहितः समग्रः १–८–०
रघुवंशकाव्यम्—(स्थूलाक्षरं) ... २–४–०

गद्यग्रन्थाः

कादम्बरी—(सटीका) ६–०–०
दशकुमारचरितम्—(सटीकं) ... १-१२-०
श्रीबालकृष्णचम्पूः— २–०–०
पञ्चतन्त्रम्— १–४–०
हर्षचरितम्—(सटीकं)... ... २–०–०
हितोपदेशः— ०-१२-०

कामशास्त्रग्रन्थाः

अनङ्गरङ्गः—महाकविश्रीकल्याणमल्लविरचितः। २–०–०
पञ्चसायकः—कविशेखरश्रीज्योतीश्वरविरचितः। १–०–०
कन्दर्पचूडामणिः—वघेलवंशावतंसमहाराजश्रीवीरभद्रदेवविरचितः। ... ३–०–०
कन्दर्पचूडामणिः—उपयुक्तः हिन्दीभाषानुवादसहितः। रीवानरेश—व्यंकटरमणमहाराजानां आश्रयेण प्रका-

नागरसर्वस्वम्—नेपालस्थनृपजगज्ज्योतिर्मल्लभूपकृतटीका च तनसुखरामकृतविवरणसहितम्। ... ... ४—८—०

कामसूत्रं—वात्स्यायनमुनिप्रणीतं जयमङ्गलाख्याटीकासहितम् ... १०—०—०

रतिरहस्यं—दीपिकाख्ययाटीकासहितं ५—०—०

कामरत्नम्—नागभट्टविरचितम् ... २—०—०

कामकलाविलासः—पुण्यानन्दकृतः ... २—०—०

कुचिमारतन्त्रम्—कुचिमारमुनिप्रणीतम् २—०—०

कुट्टनीमतम्—(रसदीपिकाख्याटीकासहितम्।)... ... ... ५—०—०

मीमांसाग्रन्थाः

मीमांसापरिभाषा— ... ... ०—४—०

मीमांसान्यायप्रकाशः—(आपदेवी)... ०-१०-०

मीमांसाशास्त्रसारः— ... ... १—०—०

अर्थसंग्रहः—लौगाक्षीभास्करकृतः ... ० १४-०

योगशास्त्रग्रन्थाः

योगसोपानपूर्वचतुष्कम्—सचित्रग्रंथः १—०—०

त्रिविधनामावली—टीकासमेता ... २ ४—०

अलंकारग्रन्थाः

काव्यालङ्कारः—(रुद्रटकृतः सटीकः) १—०—०

कुवलयानंदः— ... ... १—०—०

रसगङ्गाधरः—(सटीक)... ... ३—८—०

वाग्भटालङ्कारः—(सटीक) ... ०-१२-०

साहित्यदर्पणः—(सटीक) ... ४—०—०

चन्द्रालोकः-वैद्यनाथरचितरमाख्यव्याख्यासहितः ०-१०-०

पुस्तक मिलनेका ठिकाण—

१ "गुजराती" पत्रका ओफिस
काळघोडा, बेक-हाउस लेन,
कोट, मुंबई.

२ पंडित नारायण मुलजी
पुस्तकालय.काळबादेवी रोड,
झवेरबाग, मुंबई.

हिरण्यकेशीयगृह्यसूत्रम्—हिरण्यकेशीयानामुपनयनादिसंस्कारविषयेऽयं ग्रन्थोऽतीवोपयोगी, अद्यावधि केनापि न मुद्रितः।	०–५–०
स्तोत्ररत्नहारः—अत्रास्माभिः अतिप्रयासेन पूर्वस्मात्षष्टिस्तोत्राणि संगृहीतानि (४७६ स्तोत्रसंख्या, पृष्ठसंख्या १०२९)	२–०–०
„ रेशमी पुठा ...	२–८–०
स्तोत्ररत्नहारः—प्रथमो भागः—स्तोत्रसंख्या, २३४	१–४–०
„ द्वितीयो भागः—२३५-४७६	१–४–०
श्रीपुरुषोत्तमनामसहस्रम्—नामचन्द्रिकायुतम्।	०-१०-०
विष्णुसहस्रनामयुतस्तोत्रपंचरत्नं—(मूलं स्थूलाक्षरं) साधें ...	०–३–०
„ „ जले क्लिन्नं न भवत्येवं	०–४–०
„ „ रेशमी पुठा ...	०–६–०
विष्णुसहस्रनाम—(मूलं स्थूलाक्षरं)	
„ „ साधें बाइंडिंग ...	०–३–०
„ „ रेशमी पुठा ...	०–६–०
„ „ जले क्लिन्नं न भवत्येवं	०–४–०
दानमयूखः—मीमांसकश्रीनीलकण्ठभट्टविरचितः। अत्र दानसामान्येतिकर्तव्यता, मण्डपादिलक्षणम, रजतादितुलाविधिः, दानानि दानप्रयोगाश्च विस्तरेण निरूपिताः।	२–०–०
उत्सर्गमयूखः—मीमांसकश्रीनीलकण्ठभट्टविरचितः। अत्र वापीकूपतडागारामाणामुत्सर्गविधिः कथितः। ...	०–४–०
प्रतिष्ठामयूखः—अत्र शिवविष्ण्वादिप्रतिमास्थापनं, तथा जीर्णानामुद्धारः विस्तरेणोपपादितः।	०–६–०

धातुरूपावलिः— ... ... ०—३—०

शब्दरूपावलिः— ... ... ०—२—०

समासचक्रम्— ... ... ०—१—०

सिद्धान्तकौमुदी ... ... २—०—०

भगवद्गीता–(पञ्चरत्नी गु. रा. ३२ पेजी।

„ „ (सादा पुठ्ठा) ... ०-१०-०

„ „ (पक्का „ „) ०-१२-०

„ जले क्लिन्नं न भवेत्तथा कीटोपि नाद्यादेवम् ०-१२-०

„ („ रेशमी „) ... ०-१४-०

भगवद्गीता–(स्थूलाक्षरा–सादा पुठ्ठा) ०-१२-०

„ „ („ रेशमी पुठ्ठा) १—०—०

„ „ (मध्यमाक्षरा सादा पुठ्ठा) ०—६—०

„ („ रेशमी पुठ्ठा) ०—९—०

विशिष्टाद्वैताधिकरणमाला-पञ्चनदीयपण्डितसुदर्शनाचार्यविरचिता। अत्र अथशब्दस्यानन्तर्यपरमतःशब्दस्य च कर्मज्ञानवृत्ततापरत्वं, हिरण्यगर्भादिजीवानां परमेश्वरनिरासः, योगमतनिरासः, ब्रह्मणः प्रपञ्चोपादानत्वं च, सृष्टौ वैषम्यं कर्मापेक्षम्, पशुपतिमतनिरासः, भागवतमतसंस्थापनम्, इत्यादयो विषया रामानुजमतेन सम्यङ्निरूपिताः। ... १—०—०

यह सब पुस्तकें मिलनेका स्थान.

१ "गुजराती" पत्रका ओफिस

काळाघोडा, बेक–हाउस लेन, कोट, मुंबई.

और

२ पंडित नारायण मुलजी पुस्तकालय

कालबादेवीरोड, झवेरबाग, मुंबई.